BIBLIOTHECA INDICA:

A

Collection Of Oriental Works

PUBLISED BY

THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 1180 & 1188.

THE

GOBHILIYA GRIHYA SUTRA,

WITH A

COMMENTARY BY THE EDITOR.

(Thoroughly revised)

EDITED BY

MAHĀMAHOPĀDHYĀYA CHANDRA KĀNTA TARKĀLANKĀRA.

VOL. II.

SECOND EDITION.

CALCUTTA:

PRINTED B HITAVRATA CHATTOPADHYAYA;

AT THE SATYA-PRESS, NO, 27, Ghose's Lane,

1908

गोभिलगृह्यसूत्रम्।



महामहोपाध्यायश्रीचन्द्रकान्ततर्कालङ्कार-
कृतभाष्यसहितम्।

तेनैव परिशोधितं परिवर्त्तितं परित्यक्तं परिवर्द्धितञ्च।

(द्वितीयभागरूपम् द्वितीयसंस्करणम्.)

श्रीलश्री

वङ्गदेशीयासियातिकसोसाइत्याख्यसमाजानामनुमत्या
व्ययेन च,

कलिकाताराजधान्यां

नं २७, घोषिस्लेन—सत्ययन्त्रे
मुद्रितम्।

॥ शाकाः १८१० ॥

गोभिलीयं

गृह्यसूत्रम् ।

तृतीयप्रपाठके प्रथमा खण्डिका ।

ॐ नमः सामवेदाय ।

एवन्तावत् द्वितीये प्रपाठके शिष्यजिज्ञासानुरोधाद्विवाहमेवादित: सूत्रयित्वा गर्भाधानाद्युपनयनान्तः संस्कारकलापः सूत्रितः । अथेदानीमुपनयनान्तसंस्कारसंस्कृतेन ब्रह्मचारिणा गुरौ वसता साङ्गो वेदोऽधिगन्तव्यः । तथाच मनुः ।

"कृतोपनयनस्यास्य व्रतादेशनमिष्यते ।
ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्वकम्" ।

इति ।

"अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः ।
गुरौ वसन् सञ्चिनुयाद् ब्रह्माधिगमिकन्तपः" ।

इति च । तथा चोक्तम् । "संस्कारस्य तदर्थत्वाद्विद्यायां पुरुषश्रुतिः"–इति । अतस्तस्य प्रतिपिपादयिषया तावदिदमुपक्रमते,—

अथातः षोड़शे वर्षे गोदानम् ॥ १ ॥

अथ-शब्दः पूर्वप्रकृतजन्मकालानुकर्षणार्थः । अथ,—जन्मकालादारभ्य षोड़शे वर्षे गोदानम्, न पुनरानन्तर्य्यादुपनयनकालात्–

इति। अथवा। "गर्भादिसङ्ख्या वर्णानाम्"-इति सूत्रान्तराद्-गर्भकाल एवाथशब्देन परामृश्यते। तेनोपनयनवदिदमपि गर्भावधि गणनयैव षोडशे वर्षे स्यात्। क्षत्रियादेः कालविशेषद्योतनार्थो वा अथशब्दो वर्णनीयः। कथन्नाम? ब्राह्मणस्य षोडशे वर्षे गोदानम्, क्षत्रियस्य द्वाविंशे, वैश्यस्य चतुर्विंशे,—इति। तथाच मनोः स्मरणम्।

"केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः"।

इति। अतःशब्दो हेत्वर्थः। यस्मात्,—

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः"।

इत्येवमादिस्मरणाद् वेदाध्ययनमवश्यं कर्त्तव्यम्। यस्माच्च,—

"तपोविशेषैर्व्विविधैर्व्रतैश्च विधिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना"।

इत्यादिवचनाद् व्रताचरणपूर्वकत्वं तदध्ययनस्य। अतः एतस्मात् कारणात्, षोड़शे वर्षे गोदानं नाम व्रतं कर्त्तव्यम्। गावः केशाः दीयन्ते खण्ड्यन्तेऽस्मिन्निति गोदानमिति व्रतस्य नामधेयम्। ततश्च, इतः पूर्वमुपात्तस्योपनयनव्रतस्यायमवधिः—इत्यवगम्यते। एवञ्च, ब्राह्मणस्याष्टवार्षिकमुपनयनव्रतं भवति, क्षत्रियस्यैकादशवार्षिकम्, वैश्यस्य द्वादशवार्षिकम्,—इति सिध्यति।

"ब्रह्मवर्च्चसकामस्य कार्य्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे"।

इत्येतस्मिंश्च पक्षे ब्राह्मणस्यैकादशवार्षिकम्, क्षत्रियवैश्ययोश्च षोड़शवार्षिकमुपनयनव्रतम्। उपनयनकालातिपाते तु सर्वेषां न्यूनतरमपि,—इत्यवगन्तव्यम्। न्यूनतरपक्षेऽप्यन्ततोऽष्टौ दिनानि तत् करणीयम्। तथाच गृह्यासङ्ग्रहः।

"समामासा अहोरात्रास्तुल्या ब्राह्मणचोदिताः।
सावित्रमष्टभिर्वर्षैः कार्य्यं मासैर्दिनैश्च वा"।

इति। सावित्रमुपनयनव्रतम्। तदानीमेव सावित्रीप्रवचनस्योपदेशात्। तथाच पुरुषशक्तिशीलदेशकालवयोऽवस्थाविशेषेण कालव्यवस्था प्रतिपत्तव्या।

अन्ये त्वाहुः। यतः"नाचरिष्यन्तं संवत्सरमुपनयेत्"—इति संवत्सरमात्रव्रताचरणस्यात्यन्तमावश्यकत्वं सूत्रयिष्यति, अतः कारणात् संवत्सरव्रताचरणात् परमर्व्वागपि षोड़शाद्वर्षात्, षोड़शवर्षोपनीतस्य च संवत्सरव्रताचरणानुरोधात् परतोऽपि षोड़शाद्वर्षात् गोदानं कर्त्तव्यम्। तस्मान्नायमवश्यं कालनियमः,—षोड़शे वर्षे गोदानम्—इति। एवं क्षत्रियवैश्ययोरपि द्रष्टव्यम्—इति। तदसङ्गतम्। पूर्व्वोदाहृतगृह्यासंग्रहविरोधात्। 'नाचरिष्यन्तं संवत्सरमुपनयेत्'— इति गोदानादिव्रतविषयमिति तत्रैव वक्ष्यामः।

तत्र तावदुपनयनव्रतं सावित्र्या अध्ययनार्थं सावित्रं सहप्रवचनमाख्यायते। उपनयनव्रतसमकालमेव सावित्रीप्रवचनोपदेशात्। गोदानादीनि व्रतानि देवपर्व्वादीनां वेदानामध्ययनार्थानि अनुप्रवचनीयानि चोच्यन्ते। अमीषां व्रतानां पश्चादेव तत्तद्वेदभागानां

प्रवचनस्योपदेशात्। गुरुश्चैतावता कालेन ब्रह्मचारिणं शौचाचारादिकं शिक्षयेत्। तथाच मनुः।

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेवच"।

इति ॥ ० ॥ १ ॥ ० ॥

चूड़ाकरणेन केशान्तकरणं व्याख्यातम् ॥ २ ॥

गोदानव्रते यत् केशान्तकरणं केशानामन्तकरणं विनाशकरणं छेदनमित्येतत्। तत् चूड़ाकरणेन पूर्व्वोक्तेन व्याख्यातं कथितम्—इति केशान्तकरणे चूड़ाकरणधर्म्मा अतिदिश्यन्ते। तेनात्रापि शिरोऽभितः पश्चाद्भागकेशानां कपुष्णिकाकपुच्छलाख्यानां चूड़ाकरणोक्तरीत्या छेदनं कर्त्तव्यम्। एवञ्चोपनयनव्रतान्ते ब्रह्मचारिणः कियन्तमपि कालं वपनं न कर्त्तव्यम्। अन्यथा शिखाभिः सह कपुष्णिकाकपुच्छलग्रहणच्छेदनादि कर्त्तुमशक्यं स्यात्। तथाच कर्म्मप्रदीपः।

"वपनं नास्य कर्त्तव्यमर्व्वाक् गोदानिकाद्व्रतात्।
व्रतिनो वत्सरं यावत् षण्मासानिति गौतमः"।

इति ॥ ० ॥ २ ॥ ० ॥

समस्तचूड़ाकरणधर्म्मातिदेशे प्राप्ते
विशेषोऽभिधीयते,—

ब्रह्मचारी केशान्तान् कारयते ॥ ३ ॥

ब्रह्मचारी स्वयमेव केशान्तान् कारयते न माता। कथन्नाम?

चूड़ाकरणे तावत् माता कुमारमङ्के कृत्वोपविशति, तथागतञ्च तमन्यः संस्करोति। केशान्तकरणे तु न ब्रह्मचारी मातुरङ्कगतो भवति। अकुमारत्वेनायुक्तत्वात्। गुरुकुले वेदाध्ययनावस्थानात्। स खल्वयं स्वयमेव कारयते न माता इत्ययमर्थः।

एवं वा—

चूड़ाकरणे कुशलीकारयन्ति—इति बहुवचनाद् वापनकर्त्तुरनियम उक्तः। केशान्तकरणे तु ब्रह्मचारिणः स्वयमेव वापनक्रिया नियम्यते ॥ ० ॥ ३ ॥ ० ॥

अयञ्च विशेषः,—

सर्व्वाण्यङ्गलोमानि संहारयते ॥ ४ ॥

संहारो विनाशो वपनमित्यनर्थान्तरम्। ऋज्वन्यत् ॥ ० ॥ ४ ॥ ० ॥

अयमपि विशेषः,—

गोमिथुनं दक्षिणा ब्राह्मणस्य ॥ ५ ॥

मिथुनं स्त्रीपुंसौ ॥ ० ॥ ५ ॥ ० ॥

अश्वमिथुनं क्षत्रियस्य ॥ ६ ॥

दक्षिणा ॥ ० ॥ ६ ॥ ० ॥

अविमिथुनं वैश्यस्य ॥ ७ ॥

दक्षिणा—इत्येव। अविर्मेषः ॥ ० ॥ ७ ॥ ० ॥

गौर्व्वैव सर्व्वेषाम् ॥ ८ ॥

यथोक्तदक्षिणाया अलाभे गौरेव वा सर्वेषां ब्राह्मणादीनां

दक्षिणा भवति। दक्षिणा चेयमाचार्य्यस्यैव न ब्रह्मणः। कस्मात्? तस्यैवोपनयनकेशान्तकरणादिकर्म्मोपदेशात्। कर्म्ममूल्यत्वाच्चास्याः। वक्ष्यति चाचार्य्यः,— "आच्छादयेद्वृषमित्येके"—इति। "आचार्य्य-सकाशे वाचं विसृजेत,—वरं ददामीति, गोमिथुनं दक्षिणा"—इति गृह्यान्तरे चाचार्य्यायैव केशान्तकरणदक्षिणादानावगतेः। ब्रह्मणस्तु पूर्णपात्रादिका दक्षिणा स्यात्। भिक्षोरपि ब्रह्मचारिणः प्रावरणादिवस्त्रगोमिथुनादेर्नासम्भवः—इति द्रष्टव्यम् ॥ ० ॥ ८ ॥ ० ॥

अयमप्यपरो विशेषः,—

अजः केशप्रतिग्राहाय ॥ ९ ॥

केशान् यः प्रतिगृह्णाति वपनार्थम्, स खल्वयं केशप्रतिग्राही-वपनकर्त्ता नापितो भण्यते। तस्मै कर्म्ममूल्यमजो देयः। एवञ्च अत्र व्रीह्यादिपात्रक्षुरसरासादनं न स्यात्, तेषां मूल्यार्थत्वात् इह च मूल्यान्तरस्योपदेशात्। अत्र गोदानव्रताङ्गस्य केशान्त-करणकर्म्मणः परिसमाप्तिः ॥ ० ॥ ९ ॥ ० ॥

लाघवार्थमिदानीं गोदानादीनां सर्व्वेषामेव व्रतानां साधारणां परिभाषां वक्तुमारभते,—

उपनयनेनैवोपनयनं व्याख्यातम् ॥ १० ॥

उपनयनेनैव 'पूर्व्वोक्तेन उपनयनं गोदानादिव्रताङ्गं' व्याख्यातं कथितम् ॥ ० ॥ १० ॥ ० ॥

तत्रापि कञ्चिद्विशेषमाह,—

न त्विड्ढाहतं वासो नियुक्तम् ॥ ११ ॥

इह गोदानादिव्रताङ्गोपनयने पुनरहतं वासो न नियुक्तं न नियमितम्—इति नियमे प्राप्ते अनियमश्चोच्यते। तेन पूर्वस्मिन्नुपनयनेऽहतस्य वाससो नियमोऽवगम्यते ॥ ० ॥ ११ ॥ ० ॥

नालङ्कारः ॥ १२ ॥

इह नियुक्तः ॥ ० ॥ १२ ॥ ० ॥

नाचरिष्यन्तᳬ संवत्सरमुपनयेत् ॥ १३ ॥

संवत्सरमपि यो न व्रतं चरिष्यति तं नोपनयेदित्याचार्य्यस्यायं नियमश्चोच्यते। ब्रह्मचारिणोऽप्यर्थान्नियमः सिध्यति। स खल्वयं नियमो गोदानिकएवोपनयने स्यात्। कुतः? अत्रैवोपदेशात्। तस्मात् संवत्सरमपि व्रतं यो न चरिष्यति, तस्यापि प्राचीनमुपनयनं भवति।

अन्ये त्वाहुः। प्रकरणादेवैतस्मिन्नुपनयने प्राप्ते पुनरुपनयनग्रहणं सामान्यार्थम्। तस्मात् प्राचीनेऽप्युपनयनेऽयं नियमः। तेन यस्यापि षोडशे वर्षे उपनयनं, तस्यापि संवत्सरव्रतचरणात् परत उपरिष्टादपि षोडशाद्वर्षाद्गोदानं स्यात्, न तु षोडश एव वर्षे—इति बोद्धव्यम्। परतो वक्ष्यमाणा अपि धर्म्माः सामान्यगोचरा एव—इति।

नैतदेवम्। 'उपनयेत्'—इत्यनुक्तौ वाक्यार्थस्यैवाघटनात्। अन्यथाऽभिधाने चाचार्य्यस्य निषेधस्यालाभात्। अतिक्रम्याभिधानाच्च। 'समा मासा अहोरात्राः'—इत्युदाहृतग्रन्थासङ्गवचनेन प्राचीने उपनयने विशेषस्याभिधानाच्च तत्रैतस्याप्रवृत्तेः। सोऽयमुपनयतिः

सन्निहितं गोदानिकादिकमेवोपनयनमभिधत्ते न प्राचीनमिति। व्यक्तिवचन: खल्वयम्। व्यक्तिवचनानाञ्च सन्निहितव्यक्तिपरत्व-मान्नेयीन्याये सिद्धान्तितम्। तत् कुत एवानेन सामान्यपरिग्रहः शक्यते वक्तुम्। परतो वक्ष्यमाणानामादेशानां यथा प्राचीनेऽप्यु-पनयनेऽभिनिवेश:, तथाऽभिहितमस्माभि:,—'वाग्यतस्तस्मै दण्डं प्रयच्छन् वाचयति'—इत्यत्र। परतश्चैतद्व्याम: ॥ ० ॥ १३ ॥ ० ॥

वाग्यतस्तस्मै दण्डं प्रयच्छन्नादिशति ॥ १४ ॥

अनुरचरार्थः। दण्डं प्रयच्छन्—इत्यनूद्यते क्रमार्थम्। कथं नाम? दण्डं प्रकर्षेण यच्छन्नेवादिशति, न तु विलम्बेन—इत्यर्थ:। दण्डमन्त्रवाचनात् परत: खल्वादेशा बोद्धव्या:। कुत:? प्रशब्दस्वरसात्। दण्डं प्रयच्छन्नित्येतावतैव निर्व्वाहे गुरुकरणं निर्देशसामान्यात् पूर्व्वोक्तस्मारणार्थम्। तेन प्राचीनेऽप्युपनयने दण्डप्रदानात् परममी आदेशा भवन्ति। तस्मात् सामान्य-धर्म्मत्वममीषामिति सिद्धम् ॥ ० ॥ १४ ॥ ० ॥

ते खल्वादेशा: द्वादशभि: सूत्रैरभिधीयन्ते,—

आचार्य्याधीनो भवान्यत्राधर्म्मचरणात् ॥ १५ ॥

अधीनो निघ्न आयत्त:—इत्यनर्थान्तरम्। अधर्म्मचरणादन्यत्रा-चार्य्यस्याधीनो भव। अधर्म्मसंयुक्तमाचार्य्यस्यादेशमपि माकार्षी-रित्यर्थ: ॥ ० ॥ १५ ॥ ० ॥

क्रोधानृते वर्ज्जय ॥ १६ ॥

स्पष्टार्थं सूत्रम् ॥ ० ॥ १६ ॥ ० ॥

मैथुनम् ॥ १७ ॥

वर्ज्जय—इतीदमितः प्रभृतिसर्व्वत्रानुषञ्जनीयम् । मैथुनं व्यवायः सम्भवइत्यनर्थान्तरम् ॥ ० ॥ १७ ॥ ० ॥

उपरि शय्याम् ॥ १८ ॥

उपरि शय्याम् आचार्य्यशय्याया उच्चतरां शय्यां वर्ज्जय । तथाच मनुः ।

"नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ" ।

इति । एवं वा —

उपरि खट्टादौ शय्यां वर्ज्जय । तदनेनाधोभूमावेव शय्या कर्त्त-व्येत्युपदिशति । तदप्याह मनुः ।

"अग्नीन्धनं भैक्षचर्य्यामधःशय्यां गुरोर्हितम् ।
आ समावर्त्तनात् कुर्य्यात् कृतोपनयनो द्विजः" ।

इति ॥ ० ॥ १८ ॥ ० ॥

कौशीलवगन्धाञ्जनानि ॥ १९ ॥

कौशीलवं नृत्यगीतवादित्रम् । गन्धो घृष्टोमलयजः । अञ्जनम-क्ष्णोर्यद्दीयते । एतानि वर्ज्जय । तथाच मनुः ।

"अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्" ।

इति ॥ ० ॥ १९ ॥ ० ॥

स्नानम् ॥ २० ॥

वर्ज्जय । सुखार्थस्नानस्यायं प्रतिषेधो न वैधस्य । तेन वैधस्नानं

कर्त्तव्यमेव। तथाच सूत्रान्तरम्। "नाप्सु श्लाघमानः स्नायात्" –इति। "कालद्वयमभिषेकाग्निकार्य्यकरणम्"–इति चैवमादि। वक्ष्यति चाचार्य्यो नित्यधर्म्मेषु,—"उदकोपस्पर्शनप्रातरभिवादाः" –इति। अथवा। स्नाने गात्रोत्सादनादिकमेवानेन निषिध्यते न तु स्नानमिति बोद्धव्यम्। कुतः? "अप्सु दण्डवन्मज्जनम्"– इति सूत्रान्तरात्। तथाच कर्म्मप्रदीपः।

"न गात्रोत्सादनं कुर्य्यादनापदि कथञ्चन।
जलक्रीड़ामलङ्कारं व्रती दण्डइवाप्लवेत्"।

इति ॥ ० ॥ २० ॥ ० ॥

अवलेखनदन्तप्रक्षालनपादप्रक्षालनानि ॥ २१ ॥

वर्जयेत्। अवलेखनं कङ्कतिकादिना शिरसः, भूमेर्व्वा निष्प्रयोजनम्। दन्तप्रक्षालनं दन्तानां प्रकर्षेण क्षालनं दन्तधावनं— पत्रकाष्ठादिना दन्तघर्षणमित्येतत्। पादप्रक्षालनम्—उद्वर्त्तनपूर्व्वकं सुखार्थं यत् क्रियते। पादेन वा पादस्य प्रक्षालनं वर्ण्णनीयम्। "पादेन नाक्रमेत् पादम्"—इति स्मरणात् ॥ ० ॥ २१ ॥ ० ॥

क्षुरकृत्यम् ॥ २२ ॥

वर्ज्जयेत्। पाक्षिकोऽयं क्षुरकृत्यप्रतिषेधो बोद्धव्यः। कुतः?

"सशिखं वपनं कार्य्यमास्नानाद्ब्रह्मचारिणाम्।
आशरीरविमोक्षार्थं ब्रह्मचर्य्यं न चेद्भवेत्"।

इति कर्म्मप्रदीपे सशिखवपनस्योपदेशात्।

"वपनं नास्य कर्त्तव्यमर्व्वाक् गोदानिकाद्व्रतात्।
अतिनोवत्सरं यावत् षण्मासानिति गौतमः"।

इति च वपनावगतेः। स खल्वयमाचार्य्यस्यास्पष्टोऽभिप्रायः परिशिष्टकृता स्पष्टीकृतः। तथाच गौतमसूत्रम्। "मुण्डजटिल-शिखाजटाश्च"-इति। मनुरपि स्मरति।

"मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः"।

इति। अथवा। क्षुरकृत्यप्रतिषेधान्मुण्डनविधानाच्च मुण्डनं कर्त्त-व्यमेव, तदन्यत् क्षुरकृत्यम् अङ्गलोमसंहारादिकं न कर्त्तव्य-मित्ययं सूत्रार्थः। अन्ये त्वाहुः। क्षुरकर्म्मप्रतिषेधान्मुण्डनविधा-नाच्च कर्त्तव्यो मुण्डनं युक्तम्,—इति ॥ ० ॥ २२ ॥ ० ॥

मधुमांसे ॥ २३ ॥

वर्ज्जय ॥ ० ॥ २३ ॥ ० ॥

गोयुक्तारोहणम् ॥ २४ ॥

गोयुक्तस्य शकटादेरारोहणं वर्ज्जय ॥ ० ॥ २४ ॥ ० ॥

अन्तर्ग्राम उपानहोर्धारणम् ॥ २५ ॥

अन्तःशब्दो मध्यवचनः। अन्तर्ग्रामे ग्राममध्ये, उपानहौ प्रसिद्धे, तयोर्धारणं वर्ज्जय। ग्राममध्ये उपानद्धारणं माकार्षीरित्यर्थः ॥ ० ॥ २५ ॥ ० ॥

बहुत्वाद्ब्रह्मचारिधर्म्माणां प्रत्येकमुपदेशे ग्रन्थगौरवं मन्यमानः स्वयमाचार्य्यो लाघवार्थमिदमुपदिशति,—

स्वयमिन्द्रियमोचनमिति ॥ २६ ॥

स्वयमात्मना कामतः—इत्येतत्। इन्द्रियमोचनम्। इन्द्रियाणि

श्रोत्रादीन्येकादश प्रसिद्धानि। तेषां मोचनं मोक्षणं—प्रतिषिद्धस्वगोचरकर्म्मस्वनिवारणबुद्ध्या प्रवर्त्तनम्—इति यावत्। तत् वर्ज्जय। तदनेनैतदुक्तं भवति। 'नाचार्य्यनिन्दां शृणुयात्'–इति प्रतिषिद्धो ब्रह्मचारी न केवलं तामेव कामतो न शृणुयात्, अपि तु यत्र तत्श्रवणमेव न स्यात् तत्र तिष्ठेत्। तथाच मनुः।

"गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः"।

इति। एवं चक्षुरादीन्यपि परस्त्रीप्रेक्षणाद्यर्थं प्रवृत्तानि निवर्त्तयेत्। तदप्याह स एव।

"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतम्।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च"।

इति। एवं वा,—
स्वयमिन्द्रियमोचनं कामतो रेतःस्कन्दनं वर्ज्जय। यद्यपि,—

"स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वाऽर्कमर्च्चयित्वा त्रिः पुनर्म्मामित्यृचं जपेत्"।

इत्यकामतोऽपि रेतःस्कन्दनं मनुना निषिद्धम्। तथाप्येतदधिकदोषकरं व्रतहानिकरं वा वर्णनीयम्। यस्मान्मनुरेवाह।

"एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्।
कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः"।

इति। इतिकरणमादेशपरिसमाप्त्यर्थम्॥ ०॥ २६॥ ०॥
इदानीमन्यानपि व्रतधर्म्मानुपदिशति,—

मेखलाधारणभैक्षचर्य्यदण्डधारणसमिदाधानो-दकोपस्पर्शनप्रातरभिवादा इत्येते नित्यधर्माः ॥२७॥

मेखलायाः—विशेषानुपदेशात् पूर्व्वोक्तलक्षणाया धारणम्। तथाच मनुः।

"यत् यस्य विहितं चर्म्म यत् सूत्रं या च मेखला।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि"।

इति। भैक्षचर्य्यं भैक्षचरणम्— वेदयज्ञादिमतां गृहेषु। भैक्ष-चर्य्या—इति पाठे व्यक्त एवार्थः। तदाह मनुः।

"वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्।
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्ज्जयेत्।
सर्वं वाऽपि चरेद्ग्रामं पूर्वोक्तानामसम्भवे।
नियम्य प्रयतोवाचमभिशस्तांस्तु वर्ज्जयेत्"।

इति। तस्मात्,—अत्रापि पूर्वोक्तोपनयनवत्तत्रस्थस्यैव ब्रह्मचारिणो-भैक्षचर्य्या न स्थानान्तरं गतस्य—इत्यसङ्गतं वचनम्। दण्डधारणं दण्डस्य पूर्वोक्तलक्षणस्य धारणम्। समिदाधानमधस्ताद्व्याख्या-तम्। उदकोपस्पर्शनं स्नानम्। तच्च सायंप्रातर्दण्डवदाप्लवनम्। वक्ष्यति चाचार्य्यः "तेषु सायं प्रातरुदकोपस्पर्शनम्"—इति। कात्यायनोऽप्याह। "व्रती दण्डइवाप्लवेत्"—इति। प्रातरभिवादः पादग्रहणं गुरोरित्येतत्। तच्च,—

"व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः" ।

इति ।

"उत्तानाभ्याञ्च हस्ताभ्यां पादावस्य मृदु स्पृशेत् ।
दक्षिणं दक्षिणेनैव सव्यं सव्येन पीड़येत्" ।

इति चैवमादिस्मृत्यन्तरोक्तप्रकारेण करणीयम् । अभिवादन-विधिरपि मनूक्त एवादरणीयः । यथा मनुः ।

"अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्" ।

इति ।

"भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः" ।

इति च । ज्येष्ठमभिवादयन् विप्रः अभिवादात्—पादग्रहणात् परम् अमुकनामाहमस्मि—इति स्वं नाम कीर्त्तयेत्, अन्ते च भोःशब्दम्—इति वचनयोरर्थः । तेन पादग्रहणानन्तरं अमुक-नामाहमस्मि भोः—इति कथयेत् । यच्च,—अभिवादये अमुक शर्म्माहमस्मि भोः—इत्युच्चार्य्य अभिवादनं कर्त्तव्यम्—इति रघु-नन्दनादीनां मतम् । तदसङ्गतम् । अभिवादये—इत्युल्लेखे प्रमाणा-भावात् । 'अभिवादात् परम्'—इत्यादिना पादग्रहणादनन्तरमेव नामकीर्त्तनस्योपदेशाच्च । यदपि,—अभिवादात् परम्—इत्यस्य अभिवादये—इति शब्दोच्चारणात् परम्—इति व्याख्यानम् । तदप्यसङ्गतम् । प्रमाणाभावात् । लक्षणाप्रसङ्गाच्च । श्रुतिलक्षणा-

विषये च श्रुतिं ज्यायसीमवोचाम। सा खल्वियं वर्णना व्याख्यातृणामेव यदृच्छापरिकल्पिता भवेत्, न तु मुनेरनुमता। मुनिवचनस्योपरुध्य यदृच्छया परिकल्पनं, तेषामप्यनुचितमेव। "असावहम्भोः— इत्यात्मनोनामादिशेत्"— इत्येवमादिस्मृत्यन्तरेष्वपि अभिवादनवाक्ये, अभिवादये—इति पदप्रयोगो नानुशिष्यते। मिताक्षरादीपकलिकादिष्वपि अभिवादये—इति प्रयोगो न दृश्यते।

अभिवादयन्—इति तु वर्त्तमानसामीप्ये वर्त्तमानवदुपदेशः। एतच्च भवताऽपि वाच्यम्। हेत्वर्थे वा शता वर्णनीयः। ततश्चाभिवादनस्य नामकीर्त्तनहेतुत्ववचनात् हेतोश्च पूर्ववर्त्तित्वनियमात् अभिवादात् परमित्यस्मास्मदुक्तमेव व्याख्यानमादरणीयम्। यच्च गौतमसूत्रम्— "स्वनाम प्रोच्यायमहमित्यभिवादोऽज्ञसमवाये"—इति। तदज्ञाभिवादनविषयत्वादेव न प्राज्ञाभिवादनविषयम्। अतएव मनुनाऽपि,—

"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैवच"।

इत्यज्ञाभिवादे भोःशब्दो नाभिहितः। ततश्च अमुकोऽयमहम्—इत्यज्ञाभिवादनप्रयोगः। इदं गौतमसूत्रं कैश्चित् कल्पनाकुशलैराकुलीकृत्य पठितम्— 'स्वनाम प्रोच्याहमभिवादये इत्यभिवदेत्'—इति। तदनाकरम्।

यच्चापरमुक्तम्,—मनुवचने नामशब्दस्य नामविशेषार्थत्वात् अभिवादनवाक्ये नामशब्दोल्लेखोऽप्रमाणः—इति। तदप्ययुक्तम्।

स्वं नाम--इति नामशब्दस्य नामविशेषार्थत्वेऽपि, असौनामाहम्--इति नामशब्दस्यानन्यप्रयोजनत्वात्। अन्यथा नामशब्दस्य द्विरुच्चारणानुपपत्तेः। कण्ठतश्चाभिधानात्। असौनामाहमस्मि--इति--एवं स्वं नाम कीर्त्तयेत्--इति कण्ठत एव नामशब्दस्याप्युल्लेखोऽनुशिष्यते। तस्मान्न किञ्चिदेतत्। अलमतिप्रसङ्गेन।

सूत्रशेषमिदानीं वर्णयामहे। एते मेखलाधारणादयोऽभिवादान्ताः नित्यधर्म्मा अहरहरनुष्ठेयाः--इत्यर्थः। धर्म्मपदोपादानाच्च व्रतस्यैवैते नित्यधर्म्माः न पुनर्यावज्जीवमनुष्ठेयाः--इत्यवगम्यते। इतिकरणादन्येऽपि,--

"नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्"।

इत्येवमादयः स्मृत्यन्तरोक्ता धर्म्माः संगृह्यन्ते ॥ ० ॥ २७ ॥ ० ॥

कानि पुनस्तानि व्रतानि येषां गोदानप्रसङ्गेनायं साधारणधर्म्मोपदेशः? कियन्तञ्च कालं कर्त्तव्यानि? उच्यते।

गोदानिकव्रातिकादित्यव्रतौपनिषदज्येष्ठसामिकाः संवत्सराः ॥ २८ ॥

ऋजुरक्षरार्थः। ननु 'नाचरिष्यन्तं संवत्सरमुपनयेत्'--इत्यनेन गतार्थत्वात् किमर्थमत्र गोदानग्रहणम्? दृष्टान्तार्थम्--इति ब्रूमः। कथन्नाम? यथा गोदानिके व्रतादेशादि, तथा एतेष्वपि स्यात्--इति। अथवा। नाचरिष्यन्तम्--इत्यनेन सर्व्वत्रैव संवत्सरव्रते प्राप्ते गोदानादीनां परिगणना क्रियते; सुखावबोधार्थम्, आदरार्थम् महानाम्निकव्रतस्य कालविशेषद्योतनार्थञ्च--इति न किञ्चिदनुचितम्। तत्र, उपनयनव्रतन्तावत् सावित्र्या अध्य-

नार्थमुक्तम्। गोदानव्रतमाग्नेयैन्द्रपावमानानां दैवपर्व्वणाम्, व्रातिकव्रतमारण्यकस्य शुक्रियवर्ज्जस्य, आदित्यव्रतं शुक्रियाणाम्, औपनिषदव्रतमुपनिषद्ब्राह्मणस्य, ज्येष्ठसामिकव्रतमाज्यदोहानामध्ययनार्थम्—इति बोद्धव्यम्। ननु, 'चत्वारि वेदव्रतानि'—इति गौतमेन पुरुषसंस्कारमध्ये पाठात् कथममीषामध्ययनार्थत्वमुच्यते? नैष दोषः।

"तपोविशेषैर्विविधैर्व्रतैश्च विधिदेशितैः।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना"।

इति मनुनाऽध्ययनार्थत्वस्याप्यमीषामुपदेशात्। तस्मात्, पुरुषार्थानामेव सतामेषां संयोगपृथक्त्वन्यायेनाध्ययनार्थत्वमध्ययनार्थानामेव वा पुरुषार्थत्वमादरणीयम् ॥ ० ॥ २८ ॥ ० ॥

पुनरपि साधारणधर्म्ममुपदिशति,—

तेषु सायं प्रातरुदकोपस्पर्शनम् ॥ २९ ॥

व्याख्यातोऽक्षरार्थः। सायं प्रातः—इति गुणविधानार्थमुदकोपस्पर्शनमिति विहितमनूद्यते,—इति बोद्धव्यम्। पूर्वमुदकोस्पर्शनं कृतमूत्रपुरीषस्य मूत्रपुरीषलिप्ताङ्गस्य वा शौचसम्पत्त्यर्थम्, अयन्तु स्नानविधिः—इति केचित् ॥ ० ॥ २९ ॥ ० ॥

आदित्यव्रतन्तु न चरन्त्येके ॥ ३० ॥

एके शाखिन आदित्यव्रतं न चरन्ति। तुशब्दो विशेषद्योतनार्थः। कः पुनरसौ? उच्यते। येषां किल शाखिनामारण्यकेऽन्तर्भूतानि शुक्रियाणि व्यस्तानि पठ्यन्ते, ते तावदादित्यव्रतं न चरन्ति।

कस्मात् ? आरण्यकाध्ययनेनैव तेषामधीतत्वात्। येषान्तु पुनः कौथुमादीनामारण्यकात् पृथगेव शुक्रियाणि पठ्यन्ते, ते खलु शुक्रियाणामध्ययनार्थमादित्यव्रतं चरन्ति। स खल्वयं विनिवेशविकल्पः तुशब्देन द्योत्यते ॥ ० ॥ ३० ॥ ० ॥

ये पुनरादित्यव्रतं चरन्ति, तेषां विशेषधर्म्मानुपदिशति,—

ये चरन्त्येकवाससो भवन्ति ॥ ३१ ॥

ये शाखिनश्चरन्त्यादित्यव्रतं ते खल्वेकवाससो भवन्ति। एकमेव वासो येषां त इमे एकवाससः। अधरीयमेकमेव तेषां वासः, न पुनरुत्तरीयमजिनमपीत्यर्थः ॥ ० ॥ ३१ ॥ ० ॥

आदित्यञ्च नान्तर्दधतेऽन्यत्र वृक्षशरणाभ्याम् ॥३२॥

वृक्षः प्रसिद्धः। शरणं गृहम्। वृक्षशरणाभ्यामन्यत्रादित्यं नान्तर्दधते नापवारयन्ति नाच्छादयन्ति—इत्येतत्। के ? ये चरन्त्यादित्यव्रतम्। एवमुत्तरत्रापि। तथाच, वृक्षशरणयोश्छायां वर्ज्जयित्वा ग्रीष्मधर्म्मतप्तैरप्यादित्यब्रह्मचारिभिश्छत्रादिना नादित्योऽन्तर्धातव्यः—इत्यर्थः ॥ ० ॥ ३२ ॥ ० ॥

नापोऽभ्यवयन्त्यूर्द्ध्वं जानुभ्यामगुरुप्रयुक्ताः ॥ ३३ ॥

जानुभ्यामूर्द्ध्वं अप उदकं नाभ्यवयन्ति नावतरन्ति। किं नित्यवदेव नावतरन्ति ? न। किन्तर्हि ? उच्यते। अगुरुप्रयुक्ताः। गुरुभिः प्रयुक्ताः गुरुप्रयुक्ताः ते न भवन्ति,—इत्यगुरुप्रयुक्ताः।

अगुरुप्रयुक्ताः खल्वादित्यव्रतचारिणो जानुभ्यामूर्ध्वमपो नाभ्यवयन्ति। गुरुप्रयुक्तास्तु तदभ्यवयन्तोऽपि न प्रत्यवायभाजो भवन्ति,—इति गुर्व्वाज्ञया दोषाभावं दर्शयति।

ननु 'आचार्य्याधीनोभवान्यत्राधर्म्मचरणात्'—इतिह्युक्तम्। तत् कथमाचार्य्यप्रयुक्तोऽधर्म्मं चरेत्? उच्यते। अगुरुप्रयुक्ता जानुभ्यामूर्ध्वमपोनाभ्यवयन्ति इत्युक्ते गम्यत एवैतत् यत् गुरुप्रयुक्ताअभ्यवयन्ति—इति। तस्माददोषः। अपिच। नैवात्र किञ्चिद्विधीयते निषिध्यते वा, किन्तर्हि, ये खल्वादित्यव्रतं चरन्ति ते किलैवं कुर्व्वन्ति न च कुर्व्वन्ति इत्युच्यते। तस्मादधर्म्मचरणशङ्कागन्धोऽपि नास्ति। अन्ये त्वाहुः। 'यस्मात्तोदोषस्तमाचार्य्यादेशेन कुर्व्वतामधर्म्मसंयोगो नास्तीत्युक्तं भवति'—इति ॥०॥ ३३ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य प्रथमा खण्डिका ॥ ० ॥

———

गोभिलीयगृह्यसूत्रे

तृतीयप्रपाठके द्वितीया खण्डिका ।

आदित्यव्रतात् परमध्ययनक्रमाम्नाहानाम्निकेन व्रतेन भवितव्यम् । औपनिषदज्येष्ठसामिकव्रतयोस्तु कालादीनां सामान्यात् लाघवार्थः प्रासङ्गिक एवास्मिन् क्रमे उपन्यासः । महानाम्निकव्रतस्य तु कालक्रियाकलापयोर्व्वैभिन्न्यात् न तत्रोपन्यासः कृतः । तदिदानीं स्वे क्रमे पृथगुपदिशति,—

द्वादश महानाम्निकाः संवत्सरा नव षट् त्रय इति विकल्पः * ॥ १ ॥

महानाम्नीनामध्ययनार्था महानाम्निकाः द्वादश संवत्सरा भवन्ति । महानाम्नीनामध्यायनार्थं द्वादश संवत्सरानभिव्याप्य व्रतं कर्त्तव्य-

---

* भट्टभाष्ये तावदत्र सूत्रद्वयं कल्पितम् । तत्र, 'द्वादश महानाम्निकाः संवत्सराः'—इत्येकं, 'नव षट् त्रय इति विकल्पः'—इति चापरं सूत्रं कल्पितम् । परन्तु एवं सूत्रच्छेदे 'द्वादश महानाम्निकाः संवत्सराः'—इत्यनेन विकल्पस्य संबन्धः क्लेशेन सम्पादनीयो भवेत् । इत्येवं मन्यमानेन मया प्रथमसंस्करणे 'द्वादश महानाम्निकाः संवत्सराः' 'नव षट् त्रयः' 'इति विकल्पः'—इति सूत्रत्रयं कल्पितमासीत् । इदानीन्तु, 'इति विकल्पः'—इत्येवंरूपस्य सूत्रस्य कस्मिंश्चिदपि सूत्रग्रन्थेऽदर्शनात् आर्य्याणां नैतादृशी शैलीति विभावयता मिलितमेकमेव सूत्रमङ्गीकर्त्तुमुचित मित्यालोचयता चैकमेव सूत्रं लिखितम् । सूत्रदैर्घ्याहते नात्र कोऽपि दोष इति विपश्चितोविदांकुर्व्वन्तु ।

मित्यर्थः। पक्षान्तरमाह। नव षट् त्रयो वा महानाम्निकाः संवत्सरा भवन्ति। इत्येतेषां चतुर्णां पक्षाणां विकल्पो बोद्धव्यः। स खल्वयं विकल्पोनैच्छिकः, दोषाष्टकप्रसङ्गात्। किन्तु व्यवस्थितः। कथन्नाम ? पुरुषशक्तिशीलकालवयोऽवस्थाविशेषापेक्षया एते विकल्पा भवन्ति। अथवा। पूर्वपूर्वकल्पेषु कृच्छ्रभूयस्त्वात् फलभूयस्त्वं कल्पनीयम्। तथाच कर्म्मप्रदीपः।

"यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः।
भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयो ह्यवाप्यते"।

इति। एवञ्च सर्वान् पुरुषान् प्रत्यविशेषेणामी विकल्पा भवन्ति न तु पुरुषशक्त्याद्यपेक्षया—इति सिध्यति। अस्मिंस्तु पक्षे पूर्वत्र प्रत्येकं वाशब्दा लुप्तवत् द्रष्टव्याः। कथन्नाम ? द्वादश वा नव वा षट् वा त्रयो वा महानाम्निकाः संवत्सरा भवन्ति—इति ॥ ० ॥ १ ॥ ० ॥

संवत्सरमप्येके ॥ २ ॥

संवत्सरमात्रमपि महानाम्निकव्रतमेके आचार्य्या मन्यन्ते। तदिदमेकीयं मतमाचार्य्यस्याप्यनुमतमिति प्रतिपद्यामहे। कस्मात् कारणात् ? संवत्सरपक्षस्य धर्म्मविशेषोपदेशात्। गृह्यासंग्रहेऽप्युक्तम्।

"आचार्य्यानुमतं वाक्यमेकीयं गृह्यते क्वचित्।
शेषाणि चैव वाक्यानि आचार्य्यो न प्रशंसति"।

इति ॥ ० ॥ २ ॥ ० ॥

व्रतन्तु भूयः ॥ ३ ॥

तुशब्दः पूर्वेषां पक्षाणां व्यवच्छेदार्थः । कथन्नाम ? संवत्सरमात्र-पक्षे व्रतं भूयो बहुतरं भवति न पूर्वेषु पक्षेषु । किमनेनोक्तं भवति ? एतदनेनोक्तं भवति । येऽप्यत्रानियता धर्म्मा वक्ष्यन्ते,—"अनियमो-वा कृष्णस्थानासनपन्थभक्षेषु"—इति, तेऽपि वार्षिकव्रतचर्य्यापक्षे नियमेनानुष्ठेयाः, पूर्वेषु तु पक्षेष्वनियम एव—इति । तुशब्दो विशेषार्थो वा । संवत्सरव्रतचर्य्यापक्षे विशेषेण नियमेन बहुतरं व्रतं भवति—इत्यत्रापि पूर्ववदेवार्थः । अन्येतु तुशब्दं हेत्वर्थं मन्य-माना वर्णयन्ति,—यस्मात् "तिष्ठेद्दिवा, आसीत नक्तम्"—इत्येव-मादिविषमधर्म्मवत्त्वात् दुरनुष्ठेयं बहुकालमेतद्व्रतं, तस्मात् संव-त्सरमात्रमनुष्ठेयम्—इत्येकेषां मतम्—इति ॥ ० ॥ ३ ॥ ० ॥

किं य एव कश्चित् संवत्सरपक्षेऽप्यधिक्रियते ? न । कस्तर्हि ? उच्यते ।

पूर्व्वैश्चेच्छ्रुतामहानाम्नाः ॥ ४ ॥

पूर्वैः—बहुवचनात् पित्रादिभिः त्रिभिः पुरुषैः, यथोक्तव्रतचर्य्या-पूर्वकमाचार्य्यस्यानुगमनं कुर्वद्भिर्महानाम्न्योऽध्ययनविशेषाः श्रुता-श्चेदभूवन, तदा खल्वसौ संवत्सरपक्षेऽप्यधिक्रियते, न य एव कश्चित् ॥ ० ॥ ४ ॥ ० ॥

अथापि रौरुकिब्राह्मणं भवति ॥ ५ ॥

अथ एतस्मिन् महानाम्निकव्रतविषये रौरुकिब्राह्मणमपि भवति,—व्रतचर्य्याप्ररोचनार्थम् । (आभामान्तं सूत्रम्) ॥ ० ॥ ५ ॥ ० ॥

कुमारान् ह स्म वै मातरः पाययमाना आहुः ॥ ६ ॥

ह वै--इत्यनर्थकावैतिह्यार्थकौ वा निपातौ। कुमारान् उत्सङ्ग-गतान् स्तनन्धयान्, स्तन्यं पाययमाना मातरः आहुःस्म ब्रुवन्तिस्म किल। स्म--इत्ययमपि वाऽनर्थक एव निपातः ॥ ० ॥ ६ ॥ ० ॥

शक्करीणां पुत्रका व्रतं पारयिष्णवो भवतेति ॥ ७ ॥

हे पुत्रकाः, शक्करीणां महानाम्नीनामध्ययनार्थं यदेतद्व्रतम्, तस्य पारयिष्णवः समापयितारो भवत यूयम्। अनया अस्मदाशिषा महानाम्निकव्रतस्य पारं गन्तुं समर्था भवत,--इत्यर्थः। इतिः ब्राह्मणवाक्यपरिसमाप्त्यर्थः ॥ ० ॥ ७ ॥ ० ॥

अथेदानीं महानाम्निकव्रतधर्म्मानाह,—

तास्वनुसवनमुदकोपस्पर्शनम् ॥ ८ ॥

तासु शक्करीषु विषये--महानाम्निकव्रते--इत्येतत्। तासु शक्करीषु अधीयमानासु--इति केचित्। अनुसवनम्--सवनमनु लक्ष्मीकृत्यानुसवनम्--त्रिसन्ध्यमित्यर्थः। उदकोपस्पर्शनं स्नानं कर्त्तव्यम् ॥ ० ॥ ८ ॥ ० ॥

नानुपस्पृश्य भोजनं प्रातः ॥ ९ ॥

अनुपस्पृश्य अस्नात्वा प्रातर्भोजनं न कर्त्तव्यं। प्रातःशब्दो दिवावचनः। उक्तमप्युपस्पर्शनं पुनरुच्यते,--अनुपस्पृश्य प्रातर्भोजने दोषातिशयप्रज्ञापनार्थमुपस्पर्शस्यावश्यकत्वोपदेशार्थञ्च ॥०॥ ९ ॥ ० ॥

सायमुपस्पृश्याभोजनमासमिदाधानात् ॥ १० ॥

उपस्पृश्य स्नात्वा आ समिदाधानात् समिदाधानपर्य्यन्तं सायमभोजनं कर्त्तव्यम्। सायंशब्दो रात्रिपरः ॥ ० ॥ १० ॥ ० ॥

कृष्णवस्त्रः ॥ ११ ॥

कृष्णं मेचकं वस्त्रं यस्य सोऽयं कृष्णवस्त्रः, भवेत्—इति सूत्रशेषः ॥ ० ॥ ११ ॥ ० ॥

कृष्णभक्षः ॥ १२ ॥

भवेत्। केनाप्युपायेन ॥ १२

आचार्य्याधीनः ॥ १३ ॥

भवेत्। उक्तमपि पुनरुच्यते, अतिशयेनाचार्य्याधीनत्वप्रज्ञापनार्थम्। कथन्नाम? व्रतकर्म्माप्याचार्य्याविरोधेनैव कर्त्तव्यम्, मातृपितृशुश्रूषाऽप्याचार्य्यानिसृष्टेन न कर्त्तव्या—इति। तथाच मनुः।

"न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्"।

इति। अथवा। अधर्म्मचरणादन्यत्राचार्य्याधीनत्वं पूर्वमुक्तम्, इह पुनरधर्म्मसंयुक्तस्याप्याचार्य्यादेशस्य परिपालनमनुशिष्यते—इति न किञ्चिदनुचितम्। आचार्य्येनानिसृष्टो ब्रह्मचारी स्वान् गुरून् नाभिवादयेत्—इत्यपि पूर्वेणैव गतार्थमितिबोद्धव्यम्। अतएव मनुना गुरौ वसतो ब्रह्मचारिणः सामान्यत एव तदभिहितम् ॥ ० ॥ १३ ॥ ० ॥

अपन्यदायी ॥ १४ ॥

पन्यानं दातुं शीलमस्येति पन्यदायी स न भवतीत्यपन्यदायी भवेत्। येषामपि,—

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च"।

इत्येवमादिस्मृत्यन्तरेषु पथोदानमुपदिष्टं, 'तेषामपि पन्था न देयः—इत्यर्थः॥ ०॥ १४॥ ०॥

तपस्वी॥ १५॥

भवेत्। व्रतस्यापि तपस्त्वात् पुनरुपादानं व्रतव्यतिरिक्तमन्यदप्युपवासादिकन्तपः कुर्य्यादित्येवमर्थम्। अथवा।

"तपोविशेषैर्व्विविधैर्व्रतैश्च विधिदेशितैः"।

इति मनुना व्रततपसोर्भेदेनोपन्यासात् अन्यथा व्याख्यास्यामः। तपस्वी—चान्द्रायणादितपोविशेषवान्, इन्द्रियसंयमादिरूपतपोविशेषवान् वा भवेत्—इति। यद्यप्येतदपि,—

"सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः"।

इति मनुना, "स्वयमिन्द्रियमोचनम्"—इत्याचार्य्येण च गुरौ वसतो ब्रह्मचारिणः सामान्यतोऽभिहितम्, तथाप्यत्र पुनरुपादानं व्यतिरेके दोषातिशयार्थं व्रतवैगुण्यार्थं वा॥ ०॥ १५॥ ०॥

तिष्ठेद्दिवा॥ १६॥

दिवा अहनि, तिष्ठेत् स्थाणुवदूर्द्ध्वो भवेत् नोपविशेत् न च पर्य्यटेत्—अन्यत्र सन्ध्योपासनादेर्भिक्षाचर्य्यातश्च॥ ०॥ १६॥ ०॥

आसीत नक्तम्॥ १७॥

नक्तं रात्रौ आसीत उपविशेत न शयीत न वा तिष्ठेत्॥ ०॥ १७॥ ०॥

वर्षति च नोपसर्पेच्छन्नम् ॥ १८ ॥

वर्षति पर्ज्जन्ये, छन्नं मनुष्यैराच्छादितं गृहादिकमित्येतत्। नोपसर्पेत् न गच्छेत् न प्रविशेदिति यावत्। कियन्तं कालम्? यावन्न वर्षोपशमः। कुतः? वर्षति,—इति वर्त्तमानवदुपदेशात्। सप्तमीनिर्देशाच्च। गृहाद्युपसर्पणप्रतिषेधात् वृक्षमूलमुपसर्पतोऽपि न दोषः—इति वर्णयन्ति। चशब्दादवर्षणसम्भावनायामपि गृहोपसर्पणं निषिध्यते। अथवा। चशब्दाद्वाति च वायौ नोपसर्पेच्छन्नमिति बोद्धव्यम्। गृहावस्थितस्तु वर्षत्यपि न निष्क्रामेत्। कस्मात्? नोपसर्पेदितिकारणात्। वहिरवस्थितस्य ह्येतत् सम्भवति। न च गृहान्निष्क्रमे प्रमाणं पश्यामः। अन्ये पुनरध्याहाररसिका व्याचक्षते,—वर्षति निष्क्रामेत्, न पुनः प्रविशेत्—इति ॥ ० ॥ १८ ॥ ० ॥

वर्षन्तं ब्रूयादापः शक्कर्य्य इति ॥ १९ ॥

कृतावकृतौ वा अहनि रात्रौ वा यस्मिन् कस्मिंश्चित् काले वर्षन्तं पर्ज्जन्यं ब्रूयात्— आपः शक्कर्य्य इति मन्त्रम्। सोऽयं वर्षस्य प्रारम्भे सकृदेव मन्त्रपाठः स्यात्। तावतैव शास्त्रार्थस्य कृतत्वात्। न तु सन्ततवर्षे पौनःपुन्येन मन्त्रावृत्तिः। प्रमाणाभावात्। उत्तरमन्त्रद्वयपाठोऽप्यनेनैव व्याख्यातः।

आह। वर्षन्तमिति वर्त्तमानवदुपदेशात् यावद्वर्षं पौनःपुन्येन मन्त्रपाठोऽवगम्यते। अन्यथा 'वर्षति च नोपसर्पेच्छन्नम्'—इत्यय-

मपि निषेधोवर्षप्रारब्ध एव स्यात् परतस्तु च्छन्दोपसर्पणेऽपि न दोषः स्यात्—इति। उच्यते। नैतदेवम्। वर्त्तमानवदुपदेशेऽपि "तिष्ठन्तं पशुं प्रयजति"—इत्यादिवदत्रापि सकृदेवानुष्ठानं वर्णयितुमुचितम्। 'सकृत् कृते कृतः शास्त्रार्थः'—इति न्यायात्। अन्यथा तिष्ठन्तमिति वर्त्तमानोपदेशात् प्रयाजस्यावृत्तिः स्यात्। 'वर्षति च नोपसर्पेच्छन्दम्'—इत्यत्र सप्तमीनिर्देशात्तस्य निषेधरूपत्वाच्च यावत्कालभावित्वम्। कालस्याधिकरणन्यायात्। तस्माद् यथोक्तएवार्थः॥ ०॥ १९॥ ०॥

विद्योतमानं ब्रूयादेवंरूपाः खलु शक्वर्य्यो भवन्तीति ॥ २० ॥

ऋज्वर्थम्॥ ०॥ २०॥ ०॥

स्तनयन्तं ब्रूयान्महामहान् घोष इति ॥ २१ ॥

स्तनयन्तं गर्ज्जन्तम्॥ ०॥ २१॥ ०॥

न स्रवन्तीमतिक्रामेदनुपस्पृशन् ॥ २२ ॥

स्रवन्तीं निम्नगामनुपस्पृशन् स्नानमकुर्व्वन्। वर्त्तमानसामीप्ये वर्त्तमानवदुपदेशः। नातिक्रामेत्। स्रवन्तीमतिक्रमिष्यन् स्नात्वाऽतिक्रामेदित्यर्थः। तथाच स्मरणम्।

"असन्तर्प्य पितॄन् देवान् नदीपारन्तु न व्रजेत्"।

इति। तदनेन स्नानमप्यर्थात् सिद्धाति। यत्र, "स्नात्वा न च नदीं तरेत्"—इति वचनान्तरम्, तदस्माच्छाखिव्यतिरिक्तविषयम्।

अथवा। प्रमाणस्योभयथा दर्शनात् वर्त्तमानसामीप्यमप्युभयथैव व्याख्येयम्। सोऽयं विकल्पः,—स्नात्वा वा स्रवन्तीमतिक्रामेत्, अतिक्राम्य वैनां तत्रैव स्नायात्—इति ॥ ० ॥ २२ ॥ ० ॥

न नावमारोहेत् ॥ २३ ॥

स्पष्टार्थं सूत्रम् ॥ ० ॥ २३ ॥ ० ॥

प्राणसंशये तूपस्पृश्यारोहेत् ॥ २४ ॥

नावारोहणमकुर्व्वतश्चौरव्याघ्रादिभिः प्राणसंशये,—नावारोहणमन्तरेण स्रवन्त्यतिक्रमे प्राणसंशये सम्भाव्यमाने वा,—उपस्पृश्य स्नात्वा नावमारोहेत्। तु—इत्यनर्थको निपातः ॥ ० ॥ २४ ॥ ० ॥

तथा प्रत्यवरुह्य ॥ २५ ॥

प्रत्यवरुह्य नावोऽवतीर्य्य, तथैव उपस्पृशेत् स्नायादित्यर्थः ॥ ० ॥ २५ ॥ ० ॥

कस्मात् पुनः कारणात् त्रिषवणोपस्पर्शादयो बाहुल्येनोदकाश्रया एव धर्म्मा महानाम्निकव्रते विधीयन्ते? उच्यते।

उदकसाधवो हि महानाम्न्य इति ॥ २६ ॥

हिशब्दो यस्मादर्थे। इतिः प्राकाश्ये। उदकं साधु अधीनं यासाम्, उदकेषु विषये साधवः कुशला हिता वा यास्ताः खल्विमा उदकसाधव उदकदात्र्यः कथ्यन्ते। यस्मान्महानाम्न्य उदकसाधव इति प्रसिद्धं, तस्मात्तदीयव्रते बाहुल्येनोदकाश्रयाणां धर्म्माणां विधानं युक्तमित्यभिप्रायः ॥ ० ॥ २६ ॥ ० ॥

यस्मादुदकंसाधवो महानाम्नास्तस्मात्तदीयव्रतमाचरतः फलमपि तदनुरूपमेव भवति,—इत्याह,—

एवं खलु चरतः कामवर्षी पर्ज्जन्यो भवति ॥ २७ ॥

खल्वित्यनर्थकोनिपातः । एवमुक्तप्रकारेण व्रतं चरतः, पर्ज्जन्यः इन्द्रः, कामवर्षी भवति । काम्यन्ते—इति कामाः, तान् वर्षितुं शील यस्य स खल्वयं कामवर्षी भण्यते । यत् किञ्चिदसौ कामयते तत्तत् सर्व्वमिन्द्रो वर्षति सम्पादयतीत्यर्थः । अथवा । पर्ज्जन्यशब्दो-मेघवचनः । यत्र यत्र यदा यदा वा असौ वर्षं कामयते, तत्र तत्र तदा तदा मेघोवर्षति—इति वाक्यार्थः ॥ ० ॥ २७ ॥ ० ॥

अथेदानीं नियमबाहुल्यात् दुरनुष्ठेयत्वं व्रतस्य मन्यमानः परम-दयालुः खल्वाचार्य्यः केषुचिद्धर्म्मेष्वनियममुपदिशति,—

अनियमो वा कृष्णस्थानासनपय्यभक्षेषु ॥ २८ ॥

कृष्णवस्त्वं, दिवा ऊर्द्धावस्थानं, रात्रौ आसनमुपवेशनम्, पयोऽ-प्रदानं, कृष्णभक्षम्—इत्येतेषु अनियमो नियमाभावो वा । विकल्पेनामीषामनुष्ठानमित्यर्थः ॥ ० ॥ २८ ॥ ० ॥

अधुना महानाम्नीनां श्रावणकालमुपदिदिक्षुरिदमाह,—

तृतीये चरिते स्तोत्रीयामनुगापयेत् ॥ २९ ॥

तृतीये व्रतभागे चरिते,—व्रतस्य तृतीये भागे चीर्णे सतीत्यर्थः । स्तोत्रीयामेकामनुगापयेत् ब्रह्मचारिणं श्रावयेदाचार्य्यः ॥०॥२९॥०॥

एवमितरे स्तोत्रीये ॥ ३० ॥

एवमनेन प्रकारेण इतरे अपरे अपि द्वे स्तोत्रीये अनुगापये-दित्यनुवर्त्तते। तथाच व्रतस्य एकस्मिन् तृतीयभागे चीर्णे एकाम्, अपरस्मिन् तृतीयभागे चीर्णे अपराम्, अन्यस्मिन् तृतीयभागे चीर्णे चान्यां स्तोत्रीयामनुगापयेदित्यर्थः ॥०॥ ३० ॥०॥

सर्व्वा वाऽन्ते सर्व्वस्य ॥ ३१ ॥

सर्व्वस्य व्रतस्यान्ते वा सर्व्वाः स्तोत्रीयाः युगपदेवानुगापयेत् ॥ ० ॥ ३१ ॥ ० ॥

अनुगापनस्य कालमभिधाय प्रकारमाह,—

उपोषिताय संमीलितायानुगापयेत् ॥ ३२ ॥

'वाग्यतो न भुञ्जीत त्रिरात्रमहोरात्रौ वा'—इति वक्ष्यमाणेन विधिना उपोषिताय कृतोपवासाय, संमीलिताय परिणद्धाक्षाय ब्रह्मचारिणे अनुगापयेत् ॥ ० ॥ ३२ ॥ ० ॥

कथं पुनर्ब्रह्मचारिणोऽक्ष्णोः परिणहनं कर्त्तव्यम्? तदुच्यते।

कंसमपां पूरयित्वा सर्व्वौषधीः कृत्वा हस्ताव-धाय प्रदक्षिणमाचार्य्योऽहतेन वसनेन परिणह्येत् ॥ ३३ ॥

कंसं कांस्यभाजनं अपां पूरयित्वा, अद्भिर्वर्द्धयित्वा, सर्व्वौषधीः कृत्वा सर्व्वाश्च ता ओषधयश्च ताः सर्व्वौषधीः,—

"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः।
यवाश्चौषधयः सप्त विपदोघ्नन्ति धारिताः"।

इति कर्म्मप्रदीपोक्तलक्षणाः व्रीह्यादीः सप्त, कृत्वा, —उपस्थितत्वात् कांस्यस्थितास्वेवाप्सु स्थापयित्वा, तास्वेव सर्व्वौषधिमिश्रास्वप्सु हस्ताववधाय ब्रह्मचारिणो हस्तौ निमज्य, प्रदक्षिणं यथा भवति तथा अहतेन वसनेन ब्रह्मचारिणोऽक्षिणी आचार्य्यः परिणह्येत् परिवेष्टयेत्। एवंस्तावत् निमग्नहस्तः परिणद्धाक्षो वाग्यतो ब्रह्मचारी अरण्ये त्रिरात्रमहोरात्रं वा उपवसेत्। तत्र उपोषिताय वाग्यताय तथैव निमग्नहस्ताय परिणद्धाक्षाय ब्रह्मचारिणे अरण्य एवाचार्य्योऽनुगापयेत्। अयन्तावदेकः पक्षः ॥ ० ॥ ३३ ॥ ० ॥

अथचापरः पक्षः,—

परिणहनान्ते वाऽनुगापयेत् ॥ ३४ ॥

परिणहनस्यान्ते अवसाने तदनन्तरमित्येतत्। पूर्वत्राप्येतदविशेषात् परिणहनान्त एवेति व्याख्येयम्। तदानीमेव वा अनुगापयेत्। एतस्मिन्नपि पक्षे वाग्यताय निमग्नहस्ताय परिणद्धाक्षाय अरण्यएवानुगापनं भवति, किन्तु अनुपोषिताय,—इत्येतावानेव विशेषः। ततश्चात्र पक्षे अनुगापनात् पश्चादुपोषणं प्रत्येतव्यम्। हस्तोन्मज्जनोत्थानचंक्रमणानि तु स्नानसन्ध्योपासनमूत्रपुरीषकरणमन्तरेण न कर्त्तव्यानि। परिणहनस्रंसस्तु तत्रापि न कर्त्तव्य एव। तथा चोक्तम्।

"न हस्तोन्मज्जनोत्थाने कार्य्ये स्नानादिकं विना ।
अचिसन्नहनत्यागस्तत्रापि न भवेत् क्वचित्" ।

इति ॥ ० ॥ ३४ ॥ ० ॥
यदि उपोषितायानुगापनं यदि वा अनुपोषिताय, उभयथाऽप्युपवासोऽस्त्येव । अतस्तद्विधिमाह ,—

परिगाद्धो वाग्यतो न भुञ्जीत त्रिरात्रमहोरात्रौ वा ॥ ३५ ॥

तथैव निमग्नहस्तः परिगाद्धाचो वाग्यतो ब्रह्मचारी अरण्ये निवसन् त्रिरात्रं—त्रीण्यहोरात्राणि न भुञ्जीत । त्रिरात्राशक्तौ अहोरात्रौ वा न भुञ्जीत । अहश्च रात्रिश्च अहोरात्रौ—अहोरात्रमित्यर्थः । अथवा । उपोषितायानुगापनपक्षे अनुगापनात् पूर्वमुपवासः,—'उपोषिताय संमीलितायानुगापयेत्'—इत्यनेनैव-प्राप्तः । तस्मादनुपोषितायानुगापनपक्ष एवानुगापनात् परमुपवासविधायकमेतत् सूत्रं वर्णनीयम् । अस्यामपि वर्णनायां प्राक्तनोऽप्युपवासः त्रिरात्रमहोरात्रं वा बोद्धव्यः । कस्मात् ? अस्मादेव दर्शनात् । अरण्ये निवसन्—इति कुतो व्याख्यायते ? उत्तरसूत्रानुसारात् ॥ ० ॥ ३५ ॥ ० ॥
यदि व्याघ्रादिभयादरण्ये त्रिरात्रमहोरात्रं वा निवस्तुं न शक्यते, तदा किं कर्त्तव्यम् ? उच्यते ।

अपिवाऽरण्ये तिष्ठेदाऽस्तमयात् ॥ ३६ ॥

अपि वा अथवा, आस्तमयात् आ अस्तमयात्—अस्तमयपर्य्यन्त-मित्येतत्। तावन्तं कालमरण्ये तिष्ठेत् रात्रौ तु ग्राम एव ॥ ० ॥ ३६ ॥ ० ॥

श्वोभूतेऽरण्येऽग्निमुपसमाधाय व्याहृतिभिर्हुत्वाऽथै-नमवेक्षयेत् ॥ ३७ ॥

श्वः अनागतदिने भूते, प्रभाते जाते,—इत्यर्थः। अरण्ये अग्निमुप-समाधाय,—इत्युक्तार्थम्। प्रकृतत्वादरण्ये प्राप्ते पुनररण्यग्रहणं ग्राम-निवासपक्षेऽप्यरण्यं गत्वैवैतत् कर्म्म कर्त्तव्यमित्येवमर्थम्। व्याहृतिभि-र्हुत्वा, द्रव्यानादेशादाज्येन,—इत्यर्थः। हुत्वा,—इत्यवचने अना-देशात् पुरस्ताच्चोपरिष्टाच्च होमः प्राप्नोति, अतो हुत्वा—इत्युक्तम। व्याहृतिभिरितिवचनं क्रमार्थम्। कथन्नाम? व्याहृतिभिर्हुत्वैव एनमवेक्षयेत्, न तु तन्त्रसमापनमपि कृत्वा,—इति। एवमेके। व्याहृतिभिरितिवचनं परिसंख्यानार्थम्। तेन क्षिप्रहोमः स्यात्। एवमपरे। अथ शब्दः पूर्वप्रकृतार्थः। होमानन्तरमथ पूर्वप्रकृतमेनं ब्रह्मचारिणं अवेक्षयेदाचार्य्यः। अथशब्द आनन्तर्य्यार्थो वा। तद-यमर्थः। व्याहृतिभिर्हुत्वा अथ अक्षिपरिणहनमोचनानन्तरमेन-मवेक्षयेत्—इति ॥ ० ॥ ३७ ॥ ० ॥

किमवेक्षयेत्? तदाह,—

अग्निमाज्यमादित्यं ब्रह्माणमनड्वाहमन्नमपो-दधीति ॥ ३८ ॥

इत्येतान्यवेक्षयेत्। अग्न्यादयः प्रसिद्धाः। ब्राह्मणं विप्रम्। ब्राह्मणमितिपाठे व्यक्त एवार्थः। असमासकरणात् पृथक् पृथगवेक्षणम् ॥ ० ॥ ३८ ॥ ० ॥

किन्तूष्णीमवेक्षयेत्? न। कथन्तर्हि?—

स्वरभिव्यख्यं ज्योतिरभिव्यख्यमिति ॥ ३९ ॥

स्वरभिव्यख्यमित्यनेन मन्त्रेण। मनसैव मन्त्रपाठो बोद्धव्यः। कुतः? परतोऽस्य वाग्विसर्गश्रवणादिदानीमपि वाग्यतत्वावगतेः। प्रतिदर्शनं मन्त्रावृत्तिर्व्याख्याता ॥ ० ॥ ३९ ॥ ० ॥

किं सकृदवेक्षयेत्? न। किन्तर्हि?—

एवं त्रिः सर्व्वाणि ॥ ४० ॥

एवमनेन प्रकारेण प्रत्येकेनेत्यर्थः। सर्वानि अग्न्यादीनि त्रिरवेक्षयेत्। प्रथमेन सहैव त्रित्वं बोद्धव्यम्। सर्वाणि—इत्येतावति कृते मिलितानामग्न्यादीनामवेक्षणमप्याशङ्कीत कश्चिदित्येवं शब्दनिर्देशः क्रियते। अथैवं, सर्वाणि—इति शक्यमवक्तुम्, एवमित्येतावतैव गतार्थत्वात्। उच्यते। एवं त्रिः—इत्येतावति कृते सन्निहिततरस्य मन्त्रस्यैवैवमा परामर्शान्मन्त्रस्यैव त्रिः पाठोऽवेक्षणन्तु सकृदेव,—इत्यपि भवत्याशङ्का कदाचित् कस्यचिदिति तां निरसितुं सर्वाणीत्याह। सर्वाणीत्यनेनाग्न्यादीनामवगमात् प्रत्यासत्त्या तदन्विताया एवावेक्षणक्रियाया वाराभिधानं त्रिरित्यनेन स्यात्, न मन्त्रपाठक्रियायाः ॥ ० ॥ ४० ॥ ० ॥

शान्तिं कृत्वा गुरुमभिवादयते ॥ ४१ ॥

शान्तिं कृत्वा,—इति सिद्धमपि पुनरुच्यते क्रमार्थम्। तेन वाम-देव्यगानान्तमिदानीमाचार्य्यः कुर्य्यात्। तदनन्तरं ब्रह्मचारी गुरु-मभिवादयते। श्राख्यातः क्त्वाप्रत्ययार्थः पूर्वापरीभावमात्रम्। अथवा। ब्रह्मचारी स्वयमेव शान्तिं कृत्वा गुरुमभिवादयते। सेयं शान्तिर्व्रतापवर्गविहिता। अतएवानन्तरं दक्षिणासूत्रण-मुपपद्यते। स्थालीपाकादयश्च व्रतान्तकर्त्तव्या एव। अन्यैव वा शान्तिरिह विधीयते,—इति न किञ्चिदनुचितम्॥ ० ॥ ४१ ॥०॥
योऽयं गुरोरभिवादः,—

सोऽस्य वाग्विसर्गः ॥ ४२ ॥

अस्य ब्रह्मचारिणः परिग्रहणात् प्रभृति वाग्यतस्यासीनस्य ॥ ० ॥ ४२ ॥ ० ॥

अनड्वान् कंसो वासो वर इति दक्षिणाः ॥ ४३ ॥

अनड्वान् बलीवर्दः। कंसः कांस्यभाजनम्। एतच्चानडुत्सवि-धावुक्तत्वात्तन्मूल्यरूपमिच्छन्ति। वासो वसनम्। इदमपि पूर्ववत्। वरो गौः। तथा चोक्तम्।

"गौर्व्विशिष्टतमा विप्रैर्व्वेदेष्वपि निगद्यते।
न ततोऽन्यद्वरं यस्मात्तस्माद्गौर्व्वर उच्यते"।

इति। इत्येता महानाम्निकव्रते आचार्य्यस्य दक्षिणा भवन्ति ॥ ० ॥ ४३ ॥ ० ॥

तिस्र एव स्तोत्रीयाः, दक्षिणात्वेमास्वतस्त्र उपदिश्यन्ते। का पुनरत्र गतिः ? उच्यते।

प्रथमे विकल्पः ॥ ४४ ॥

प्रथमे द्रव्यद्वये विकल्पो बोद्धव्यः। तस्मात् प्रथमायां स्तोत्रीयायां श्रुतायामनड्वान् कंसो वा दक्षिणा, द्वितीयायां वासः, तृतीयायां वरः--इति। सेयं गतिः ॥ ० ॥ ४४ ॥ ० ॥

आच्छादयेद्गुरुमित्येके ॥ ४५ ॥

महानाम्निकव्रतदक्षिणाप्रस्तावात् प्रासङ्गिकमिदमुच्यते। येषां व्रतानां व्रातिकौपनिषदिकादित्यानामन्ते दक्षिणा न सूचिता, तेषु गुरुमाच्छादयेत् प्रीणयेत्। यावता वस्तुना गुरुः प्रीयते, तावदल्पमपि किञ्चित् दक्षिणा भवति—इत्येके आचार्य्या मन्यन्ते। एकग्रहणम्, 'तत् प्रमाणं वादरायणस्य' इति वत् एकानाचार्य्यान् पूजयितुं नात्मीयं मतं पर्य्युदसितुम्। तदिदमेकीयं मतमाचार्य्यस्याप्यनुमतं बोद्धव्यम्। तथा चोक्तम्।

"येषां व्रतानामन्तेषु दक्षिणा नाभिधीयते।
वरस्तत्र भवेद्दानमपिवाऽऽच्छादयेद्गुरुम्"।

इति। अस्मादपि कारणात् उपनयनव्रतान्तेऽपि गौरेव दक्षिणा

वाच्या। अन्ये तु,—महानाम्निकव्रत एव यथोक्तदक्षिणाया अलाभे सूत्रमिदं योजयन्ति ॥ ० ॥ ४५ ॥ ० ॥

प्रासङ्गिकमभिधाय महानाम्निकव्रतशेषमेवानुसरति,—

ऐन्द्रः स्थालीपाकस्तस्य जुहुयादृचꣳसाम यजामह-इत्येतयर्चा सदसस्पतिमद्भुतमिति वोभाभ्यां वा॥४६॥

इन्द्रो देवता यस्य सोऽयमैन्द्रः, स्थालीपाकः। तस्य जुहुयादेकामाहुतिमित्यर्थः। तस्येत्यवयवलक्षणा षष्ठी। तेन सर्वहुतत्वं न कर्त्तव्यम्। केन मन्त्रेण जुहुयात्? ऋचं साम यजामहे—इत्येतया ऋचा। सदसस्पतिम्—इत्येतया वा। उभाभ्यां वा आभ्यामृग्भ्यां मिलिताभ्यामित्यर्थः ॥ ० ॥ ४६ ॥ ० ॥

तदिदमन्यत्राप्यतिदिशति,—

अनुप्रवचनीयेष्वेवम् ॥ ४७ ॥

अनु पश्चात् व्रतान्ते—इत्येतत्। प्रवचनं प्रकृतग्रन्थश्रावणं येषु व्रतेषु क्रियते, तानि खल्विमान्यनुप्रवचनीयानि गोदानादीनि व्रतानि भण्यन्ते। तेषु अनुप्रवचनीयेषु सर्व्वेष्वेव व्रतेषु, एवम्—अन्ते ऐन्द्रः स्थालीपाकस्तस्य जुहुयादित्यतिदिश्यते। सर्व्वत्रेति पराचीनमत्रापि संबध्यते। मध्यपठितस्य विशेषाभावात्। अनुप्रवचनीयेष्विति करणाच्च उपनयनव्रतान्ते न भवति ऐन्द्रः स्थालीपाकः। कुतः? तस्य सहप्रवचनीयत्वात्। किन्तु तदन्ते सावित्रव्रतं भवतीत्यवोचाम ॥ ० ॥ ४७ ॥ ० ॥

इदानीं सकलव्रतान्तमेवाधिकृत्य किञ्चिदुपदिशति,—

सर्व्वत्राचारिषं तदशकं तेनारात्समुपागामिति मन्त्रविशेषः ॥ ४८ ॥

सर्व्वत्र सर्वेषु व्रतान्तेषु । इति,—अयं, मन्त्रविशेषः कर्त्तव्यः । कः पुनरसौ ? उच्यते । यत्र 'चरिष्यामि'--इति पदं , तत्र 'अचारिषम्'--इति पदं कर्त्तव्यम् । 'अचार्षम्'--इति पाठान्तरम् । एवं यत्र 'तच्छकेयम्'--इति पदं, तत्र 'तदशकम्'--इति , यत्र 'तेनर्ध्यासम्'--इतिपदं, तत्र 'तेनारात्सम्'--इति, यत्र 'उपैमि' --इति पदं ,तत्र 'उपागाम्'--इति । सर्वत्र,—इति करणादुपनयनव्रतान्तेऽप्ययं विशेषः स्यात् । कुतः ? सर्वग्रहणस्यैवमर्थत्वात् । अन्यथा तदनर्थकं स्यात् । अनुप्रवचनीयेषु—इति खल्वनुवर्त्तत एव । तस्मात् सहप्रवचनीयस्यापि संग्रहार्थं सर्वत्रग्रहणम् ।

स खल्वयं होमश्चरुहोमात् परतः स्विष्टकृद्धोमाच्च पूर्वं स्यात् । कस्मात् ? चरुहोमात् परतः सूत्रणात् । प्राक् स्विष्टकृत आवापः--इति वचनाच्च । द्रव्यानुपदेशादाज्यद्रव्यकश्च स्यात् । यच्च,-- ब्रह्मचारिणां जपमात्रं न होमो वचनाभावात् स्वाहान्तानामपि होमदैवत—इत्यादीनां होमादर्शनात्—इति सरलावर्णनम् । तदसङ्गतम् । जपेऽपि वचनाभावस्याविशेषात् । 'अग्ने व्रतपते इति हुत्वा'—इति पूर्वत्र होमकरणतया सूचितानां मन्त्राणां अचारिषमित्यादिपदोहमात्रसूत्रणेन होमस्यावगतेश्च । व्रतारम्भे होमवत् व्रतसमाप्तावपि होमस्य वर्णयितुमुचितत्वाच्च । एवञ्च, समावर्त्तनमध्ये एतद्धोमाभिधानं भवदेवस्यासङ्गतम् । कुतः ? व्रतान्त-

विहितत्वादस्य। कर्म्मान्तरत्वाच्च समावर्त्तनस्य। व्रतञ्चरिष्यामी-त्यादेर्व्रतारम्भकत्ववत् व्रतमचारिषमित्यादेरपि व्रतसमापकतया तस्यै वाच्यतायाः वक्तुमुचितत्वाच्च॥०॥४८॥०॥

आग्नेयेऽज ऐन्द्रे मेषो गौः पावमाने पर्व्वदक्षिणाः ॥४९॥

आग्नेये देवपर्व्वणि श्राविते अजो दक्षिणा आचार्य्यस्य। ऐन्द्रे देव-पर्व्वणि श्राविते मेषः। पावमाने देवपर्व्वणि श्राविते गौः। एव-मेताः पर्व्वदक्षिणाः,—पर्व्वणामध्ययनार्थं दक्षिणाः पर्व्वदक्षिणाः ज्ञेयाः। सामर्थ्याद्गोदानव्रतान्ते एतादक्षिणा भवन्ति। अथ सुखावबोधार्थं कर्म्मक्रमः प्रदर्श्यते। उपनयनव्रतान्ते सावित्र-चरुः। चरुहोमात् परतः स्विष्टकृतश्च प्राक् अग्ने व्रतपते व्रतमचा-रिषमित्यादिविशेषमुक्त्वा पञ्चभिर्मन्त्रैराज्येन होमः। कर्म्मसमाप्तौ गौर्दक्षिणा। नान्दीमुखश्राद्धम्। केशान्तकरणम्। गोदानार्थं पुन-रुपनयनम्। व्रतान्ते आग्नेयैन्द्रपावमानानां देवपर्व्वणां समस्तानां साम्नाञ्चाश्रावणम्। ऐन्द्रश्चरुः। तस्य च यथोक्तरीत्या होमः। अत्रापि प्राक् स्विष्टकृतः, अग्ने व्रतपते व्रतमचारिषमित्यादि पूर्व्ववद्धोमः। कर्म्मान्ते अजगोमेषदक्षिणादानम्। पुनर्नान्दीमुखश्राद्धम्। शांति-कार्थं पुनरुपनयनम्। उत्तरोत्तरव्रतचर्य्याकाले पूर्व्वपूर्व्वव्रतान्त-श्रावितस्याध्ययनम्। एवं सर्व्वेषु व्रतेषु द्रष्टव्यम्॥०॥४९॥०॥ अवसिता प्रासङ्गिकीकथा। महानाम्निकव्रतशेषमेवेदानीमनु-वर्त्तामहे,—

प्रत्येत्याचार्य्यꣳ सपरिषत्कं भोजयेत् ॥ ५० ॥

प्रत्येत्य अरण्यात् प्रत्यागत्य, आचार्य्यं भोजयेत्। किमेकाकिनमेव ? न। सपरिषत्कम्। सह परिषदा वर्त्तते—इति सपरिषत्कस्तम्—शिष्यवर्गसहितमित्यर्थः। सपर्षत्कमिति पाठेऽपि तथैवार्थः ॥५०॥

सब्रह्मचारिणश्चोपसमेतान् ॥ ५१ ॥

समानं तुल्यं ब्रह्मचर्य्यं ब्रह्मणो वेदस्याध्ययनार्थं व्रताचरणं येषां, त इमे सब्रह्मचारिणः स्वशाखिनो भण्यन्ते। अथवा। समानं तुल्यकालं ब्रह्मचर्य्यं येषां ते खल्विमे सब्रह्मचारिणो भिन्नशाखिनोऽप्युच्यन्ते। तांश्च उप समीपे समेतान् भोजयेत्। यत्र स्वयं ब्रह्मचर्य्यमाचरति तत्समीपे भिन्नगुरवोऽपि ये ब्रह्मचारिणः समेताः स्युः, तानपि भोजयेदित्यर्थः। उपसमेतानितिकरणात् भिन्नगुरवोऽपि लभ्यन्ते ॥ ० ॥ ५१ ॥ ० ॥

ज्येष्ठसाम्नो महानाम्निकेनैवानुगापनकल्पो व्याख्यातः ॥ ५२ ॥

ज्येष्ठसाम्नोऽनुगापनकल्पोऽनुगापनविधिर्महानाम्निकेनैवानुगापनविधिना व्याख्यातः,—इति पूर्व्वोक्तं सर्व्वमतिदिश्यते। ननु त्रीणि तावत् ज्येष्ठसामानि पठ्यन्ते, तत् कथमत्र ज्येष्ठसाम्नः—इत्येकवचनम् ? उच्यते। जात्याश्रयणात् त्रयाणामपि ज्येष्ठसाम्नामेकस्यामृचि गीतत्वाभिप्रायाद्वा एकवचनम्—इति न दोषः ॥ ० ॥ ५२ ॥ ० ॥

तस्यैतानि नित्यव्रतानि भवन्ति ॥ ५३ ॥

तत्र ज्येष्ठसाम्नि विषये एतानि वक्ष्यमाणानि नित्यव्रतानि यावज्जीवनमनुपालनीयानि व्रतानि भवन्ति। न तु यावद्व्रतमेव। कुतः ? नित्यशब्दस्यैवमर्थात्। अन्यथा, व्रतानि भवन्ति—इत्येतावति कृतेऽपि व्रतान्तरसूत्रितानामिवामीषामपि यावद्व्रतमनुपालनं स्यादेवेति नित्यपदमनर्थकं स्यात्। समावर्त्तनोत्तरभाविनः शूद्रोपयमस्य निषेधाच्च। नित्यधर्म्माः—इत्यकृत्वा नित्यव्रतानि,—इतिकरणाच्चैवमवगन्तव्यम्। यत्र हि यावद्व्रतमनुष्ठेयत्वमभिप्रेयते, तत्र नित्यधर्म्माः—इति क्रियते। यथा गोदानादौ ॥ ० ॥ ५३ ॥ ० ॥

न शूद्रामुपेयात् ॥ ५४ ॥

शूद्रां नोद्वहेत्। 'चतस्रो ब्राह्मणस्य भार्य्या भवन्ति तिस्रो द्वे चैका चेतरेषाम्'—इति शूद्रोपयमस्यापि प्राप्तत्वात् प्रतिषिध्यते ॥ ० ॥ ५४ ॥ ० ॥

न पक्षिमांसं भुञ्जीत ॥ ५५ ॥

स्पष्टार्थं सूत्रम् ॥ ० ॥ ५५ ॥ ० ॥

एकधान्यमेकदेशमेकवस्त्रञ्च वर्ज्जयेत् ॥ ५६ ॥

एकश्च तत् धान्यञ्चेति एकधान्यं वर्ज्जयेत्। यस्मिन् देशे यानि धान्यानि भवन्ति तत्र तेषां मध्यादेकं वर्ज्जयेत्,—कदाचिदपि न भुञ्जीत। एकदेशं वर्ज्जयेत्। गन्तव्यदेशानां मध्यादेकदेशं वर्ज्जयेत्,—कार्य्यार्थमपि न गच्छेत्। एकवस्त्रञ्च वर्ज्जयेत्। कार्पासशाणकौशेयादीनां मध्यादेकं वस्त्रं वर्ज्जयेत्,—न जातुचिदपि परिदध्यात्।

एवं वा—

एकधान्यं वर्ज्जयेत्,—एकमेव धान्यं सर्व्वदा न भक्षयेत्। एकदेशं वर्ज्जयेत्,—न यावज्जीवमेकस्मिन्नेव देशे निवसेत्। एकवस्त्रमेकवस्त्रत्वमित्यर्थः। धर्म्मप्रधानो निर्द्देशः। तदपि वर्ज्जयेत्। कथन्नाम? येष्वपि प्रेतस्नानप्रेतोदकदानादिषु एकवस्त्रत्वं स्मृत्यन्तरेषूपदिष्टं, तेष्वप्येकवस्त्रत्वं—वर्ज्जयेत्,—एकवासा न भवेदित्येतत्। अन्ये तु वर्णयन्ति,—'अधरीयोत्तरीयभेदात् प्राप्तयोर्द्वयोर्वाससोरेकं वासः प्रेतोदकदानादिकालेषु वर्ज्जयेत्,—तदानीमेकवासा भवेदित्यर्थः'—इति। तदसङ्गतम्। कस्मात्? यस्मादेवं सत्यन्येषां प्रेतोदकदानादिष्वेकवस्त्रत्वं न स्यात्। इष्यते च। न च प्रेतोदकदानादिकालेषु—इत्यस्यां वर्णनायां प्रमाणमस्ति। तस्मादस्मदुक्तैव व्याख्या ॥ ० ॥ ५६ ॥ ० ॥

उद्धृताभिरद्भिरुपस्पृशेत् ॥ ५७ ॥

जलाशयादुद्धृताभिरद्भिरुपस्पृशेदाचामेत्। यद्वा। कृतमूत्रपुरीषस्य मलदिग्धाङ्गस्य वा यच्छौचं तदिहोपस्पर्शः। तदुद्धृताभिरद्भिः

कुर्य्याच्चाशयंस्नाभि:। स्नानमेव तस्माच्च व्याख्यायते। उच्यते। एवं किल वर्णनायां पुण्यसलिलावगाहनमपि यावज्जीवनमस्य निषिद्धं स्यात्। तथाऽन्यत्रापि नित्यनैमित्तिकवह्नि:स्नानमस्य न स्यात्। तच्चानिष्टम्। तस्माद् यथोक्त एवार्थ:। सेयं पूर्व्वाचार्य्याणां वर्णना न ज्यैष्ठसामिकव्रतचारिण्येवावतिष्ठते। सर्व्वत्राप्येतदविशेषात्। तस्मात्, महानाम्निकव्रतचारिणां, येषामपि पत्न्या देवतयाऽनुशिष्यते तेषामपि पयोऽदानवत्, अग्निहोत्रिणां तीर्थानभिगमनवच्च ज्यैष्ठसामिकव्रतचारिणामुद्धृताभिरेवाद्भि: स्नानं न त्ववगाहनमितियुक्तमुत्पश्याम:॥०॥५७॥०॥

आदेशनात् प्रभृति न मृन्मयेऽश्नीयात्॥५८॥

प्राथमिकोपनयने यदिदमादेशनम्,—'समिधमाधेह्यपोऽशान'—इत्यादिरूपं, तस्मादादेशनात् प्रभृति मृन्मये शरावादौ नाश्नीयात्;—ज्यैष्ठसामिकव्रतं करिष्यमाण:। अथवा। ज्यैष्ठसामिकव्रतार्थं यदुपनयनं क्रियते, तत्र यदादेशनं 'समिधमाधेहि'—इत्यादिकं, तस्मात् प्रभृति,—इत्यर्थ:॥०॥५८॥०॥

न पिबेत्॥५९॥

आदेशनात् प्रभृति मृन्मये न पिबेत्। चशब्दो लुप्तवत् द्रष्टव्य:। न च पिबेदिति॥०॥५९॥०॥

श्रवणादित्येके ॥ ६० ॥

ज्यैष्ठसामिकव्रततृतीयभागे चीर्णे, व्रतान्ते वा ब्रह्मचारिणि ज्येष्ठ-
साम्नां यत् श्रावणमाचार्य्येण क्रियते, तस्मात् श्रवणात् प्रभृति
न मृन्मयेऽश्नीयात् न च पिबेदित्येके आचार्य्या मन्यन्ते ॥ ० ॥
॥ ६० ॥ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-
त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये
तृतीयप्रपाठकस्य द्वितीया खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

तृतीयप्रपाठके तृतीया खण्डिका ।

गोदानव्रतान्ते देवपर्व्वणां श्रावणविधानात् श्रवणादूर्द्धमेवाध्ययने प्राप्ते वेदारम्भस्य कालो विधातव्यः । उपाकरणञ्च छन्दसां वक्तव्यम् । कस्मात् ? एवं हि स्मरन्ति । 'छन्दांस्युपाकृत्याधीयीत'—इति । अतस्तद्विधानार्थमिदमाह ,—

प्रौष्ठपदीं हस्तेनोपाकरणम् ॥ १ ॥

प्रौष्ठपदो भाद्रपदः । तस्येयं पौर्णमासी प्रौष्ठपदी । तां प्रौष्ठपदीं प्रति । हस्तेन—इति, "नक्षत्रेण युक्तः कालः"—इत्यण् । "लुबविशेषे"—इति तस्य लुप् । "नक्षत्रे च लुपि"—इति सप्तम्यर्थे तृतीया । तेन हस्तयुक्ते काले—इत्यर्थः । स खल्वयं विकल्पः,—प्रौष्ठपदीं वा हस्तेन वा—इति । कस्मात् ? प्रौष्ठपद्यां हस्तस्यासम्भवात् समुच्चयानुपपत्तेः । कथमसम्भवः ? पौर्णमास्यां सूर्य्याचन्द्रमसोः परमविप्रकर्ष-नियमात् । तथा चोक्तम् । "यः परमो-विकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी"—इति । हस्तयुक्तकालोऽपि भाद्रपदशुक्लपक्ष एव ग्राह्यः । कुतः ? उपस्थितत्वात् । अथवा । प्रौष्ठपदस्येयं तिथिः प्रौष्ठपदी तिथिसामान्यं भण्यते ।

न पुनर्भाद्रपदपूर्णिमैव। कस्मात्? "प्रौष्ठपदशुक्लपक्षे हस्तेना-चार्य्यः सशिष्यः प्राङ्मुखः उदङ्मुखो वा" – इत्यादिगृह्यपरिशिष्ट-वचनात्। सोऽयमेकः कालो न कालद्वयम्। तदेतस्मिन् काले उपाकरणम्। उपाक्रियते प्रारभ्यते वेदस्याध्ययनं येन कर्म्मणा तदुपाकरणं नाम कर्म्मविशेषो वेदाध्ययनार्थं कर्त्तव्यम्—इति सूत्रशेषः। उपाकरणं प्रकृष्टग्रन्थाध्ययनम्—इति केचित्।

अत्र च प्रौष्ठपद्याम् इति सप्तम्यां प्राप्तायां द्वितीयाकरणं प्रतिशब्दाध्याहारार्थम्। तेन प्रति प्रौष्ठपदीं हस्तेनोपाकरणम्—इति सिध्यति। यद्येवं किमतः? उत्सृष्टस्योत्सृष्टस्य छन्दसः भाद्रपदशुक्लपक्षे प्रतिवर्षमुपाकरणं कर्त्तव्यम्। एतदतः। कथं पुनरेतदवगम्यते,—यत् प्रतिशब्दमध्याहृत्य प्रतिवर्षमुपाकरणम्—इति? लिङ्गादित्याह। "अतः आपुनरुपाकरणाद्वेदं न व्याह-रेयुः" – इति कर्म्मप्रदीपवचने खल्वापुनरुपाकरणादिति वचना-दवगम्यते;—पुनः पुनरिदमुपाकरणं कर्त्तव्यम्—इति। अध्या-पयितुराचार्य्यस्याध्ययनं कुर्व्वताञ्च शिष्याणां खल्वस्थानोच्चार-विच्छेदादिभिः प्रमादकृतैश्छन्दसां यातयामत्वं भवति। यात-यामैश्च छन्दोभिः कृतमपि कर्म्म न यथोक्तं फलं जनयति। तत् खल्वेतत् यातयामत्वमुपाकरणोत्सर्गलक्षणेन कर्म्मणाऽप-नुद्यते। अस्मादपि कारणात् प्रतिवर्षमेवैतत् कर्त्तव्यम्। तथा चोक्तम्।

"अस्थानोच्चारविच्छेदघोषणाध्यापनादिकम्।
प्रमादिकं श्रुतौ यत् स्यात् यातयामत्वकारि तत्।

प्रत्यब्दं यदुपाकर्म्म सोत्सर्गं विधिवत् द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ।
अयातयामैश्छन्दोभिर्यत् कर्म्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम्" ।

इति ॥ ० ॥ १

उपाकरणविधिविवक्षया इदमाह,—

व्याहृतिभिर्हुत्वा शिष्याणाꣳ सावित्र्यनुवचनं यथोपनयने ॥ २ ॥

व्याहृतिभिर्हुत्वा सर्व्वेषामेव शिष्याणां सावित्र्यनुवचनमाचार्य्येण कर्त्तव्यम् । यथोपनयने पच्छोऽर्द्धर्चश ऋक्शस्तथैवानुवचनमत्रापि कर्त्तव्यमित्यर्थः । अत्र किञ्चिद्वक्तव्यमस्ति । हुत्वा—इत्येतावत्युक्तेऽपि विशेषानुपदेशात् व्याहृतिभिरेव होमो भविष्यति । तस्माद्व्याहृतिभिरिति वचनं कर्म्मक्रमार्थम् । कथन्नाम ? व्याहृतिभिर्हुत्वा अनन्तरं सावित्र्यनुवचनं कर्त्तव्यमिति । किमतो भवति ? एतदतो भवति,— व्याहृतिहोमादनुपदमेवानुवचनमुपदिशन् अन्योऽपि होमो व्याहृतिहोमात् पुरतः स्यात्—इति दर्शयति । व्याहृतिभिरित्यवचने हि व्याहृतिभिरेव होमः स्यात् न पुनरन्योऽपि । तस्माद्व्याहृतिभिरिति वचनमादितो होमान्तरद्योतनार्थम् । न चेदानीं तन्त्रसमापनाभावद्योतनार्थमेव कुतो न स्यादिति वाच्यम् । आचार्य्येणैव परतः कर्म्मापवर्गस्य

सूचितत्वादिदानीं तन्त्रसमापनस्याप्रसक्तेः। कस्मात् पुनः कारणात् सूचितोऽयमन्यो होमो वेदारम्भात् परत एव न भवति? उच्यते। वेदारम्भात् परमेव कर्म्मापवर्गस्य सूत्रणात्तदानीमन्यस्य होमस्याभिनिवेशस्यासम्भवात्। किञ्चित् पुरस्तात् किञ्चिच्च परस्ताद्धोमश्चमित्यर्द्धजरतीयस्यानुचितत्वाच्च। अत एव नियमार्थताऽपि वचनस्य नोच्यते। वाक्यभेदश्चैवमापद्येत। कुतः? शिष्याणां सावित्र्यनुवचनं, तच्च व्याहृतिभिरेव हुत्वा—इत्यर्थभेदात्। अगत्या हि क्वचित्तथा। न चात्रागतिरस्ति। नियमे च गौरवमपि स्यात्। तस्माद् व्याहृतिहोमात् पुरस्तादेवान्यो होमः—इति सिद्धम्। कर्म्मप्रदीपवचनाच्चैवमेवाचार्य्यस्याभिप्रायोऽवधार्य्यते। तच्चोदाहरिष्यामः।

आह। कः पुनरयमन्यो होमो नाम? छन्दःप्रभृत्याहुतिषष्टिरूपः,—इति ब्रूमः। कथम्?—इति चेत्। उच्यते। संहितायां गायत्रीछन्दस्का या ऋचः पठ्यन्ते, तासामाद्यया ऋचा तावदेकामाहुतिं जुहुयात्। एवमुष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीछन्दस्कानामपि ऋचामादिभूताभिरेकैकाभिः ऋग्भिरेकैकामाहुतिं जुहुयात्। एवन्तावत् सप्त छन्दआहुतयो भवन्ति। अनयैव रीत्या अतिच्छन्दआहुतयोऽपि सप्तैव भवन्ति। सप्तैव च विच्छन्दआहुतयः। तत्रातिच्छन्दोविच्छन्दसामपि छन्दोभेदत्वात् मिलित्वा एकविंशतिरेव छन्दआहुतयः सम्पद्यन्ते। एवं गानादीन् पञ्च, पर्व्वादीन् सप्तदश, संहितादीन् त्रीन्, ब्राह्मणादीनष्टौ, षडङ्गादीन् षट्, जुहुयात्। स खल्वयमाहुतिषष्टि-

रूपोऽन्यो होमः। ततो व्याहृतिभिर्हुत्वा साविव्यनुवचनम्। तदाह कर्म्मप्रदीपः। "पुरस्ताच्छालाया उपलिप्तेऽग्नेः पश्चादासन्योपविश्य छन्दांसि विच्छन्दांसि सर्पिषा•हुत्वा गात्रेषु पर्व्वादीन् वेदे षडङ्गे च ग्रन्थादीन्, ये वाऽधीताः येषां वा श्रायते तान् जुहोति व्याहृतीश्च" इति। अत्र 'छन्दांसि'—इत्यतिच्छन्दसामप्युपलक्षणम्—इति नारायणोपाध्यायाः। अत्र खल्वादितश्छन्दोहोमादिकमभिधाय व्याहृतीश्च—इति करणात् व्याहृतिहोमात् प्राक्तनत्वमेव छन्दोहोमादीनां सुव्यक्तमवगम्यते। स खल्वयमाचार्य्यस्यास्पष्टोऽभिप्रायः कात्यायनेन स्पष्टीकृतः। स खल्वाचार्य्यस्यास्पष्टस्याभिप्रायस्य प्रदीप इव स्पष्टमुपदेष्टा,—इत्यवोचाम।

न च "व्याहृतीश्चेति सर्व्वप्रायश्चित्तहोमपरम्"—इति नारायणोपाध्यायमतं युक्तमिति वाच्यम्। अवचनेऽपि तस्य प्राप्तत्वादानर्थक्यापत्तेः। एकस्य जुहोतिशब्दस्यैकत्रप्रधानहोमपरत्वमन्यत्र च प्रायश्चित्तहोमपरत्वमिति तात्पर्य्यभेदस्यान्याय्यत्वात्। तन्त्रसमापनस्यान्यत्राचार्य्येणोपदेशाच्च। तस्मात् कर्म्मक्रमार्थमेव तदुपादानम्। उपविश्य—इति करणमपि कर्म्मक्रमप्रदर्शनार्थमेव। कथन्नाम? उपवेशनानन्तरमेव छन्दोहोमादयो भवन्ति न तु परस्तादपि—इति। अन्यथोपवशनस्यापि परिभाषाप्राप्तत्वात्तदप्यनर्थकं स्यात्।

यच्च,—'व्याहृतीश्च'—इत्यनन्तरम्, 'ततः प्रतिसरान्'—इत्यादिना प्रतिसरबन्धनादिकमुक्तम्। तत्र, 'उत्सर्गेणोपाकरणं व्याख्यातम्'—इति व्यवहितमप्युपाकरणं ततः-शब्देन परामृश्यते। तेन, उपाकरणकर्म्मणः परं प्रतिसरबन्धनादिकमिति तस्यार्थः।

कस्मात् ? 'अव्यक्तं प्रधानगामि',—इति वचनात् । व्याहृतिहोमात् परमेवाचार्य्येण सावित्र्यनुवचनादेः स्मरणाच्च । अपि च । व्याहृतिहोमात्तस्यास्पष्टत्वात् तत् स्पष्टीकृत्य, व्याहृतिहोमात् पराचीनस्य कर्म्मकलापस्याचार्य्येणैव स्पष्टमुपदेशात् न पुनः स्पष्टीकरणमपेक्षितमिति तदनुक्त्वा, वक्ष्यमाणदध्यक्षतधानाभक्षणात् प्राक् प्रतिसरबन्धनमुपदिष्टं कात्यायनेन । तस्याचार्य्येणानुपदिष्टत्वात् । एवञ्च, व्याहृतिहोमात् पराचीनस्याचार्य्योपदिष्टस्य कर्म्मकलापस्य बुद्धिस्थत्वात् तस्यैव 'ततः प्रतिसरान्'—इति ततःशब्दात् परामर्शः,—इति न किञ्चिदनुचितम् ।

यदपि केचिदाहुः,—छन्दांसीत्यादिद्वितीयानिर्देशात् छन्दःप्रभृतीनामेवात्र देवतात्वम् । ततश्च छन्दोभ्यः स्वाहा—इति वा, गायत्र्यै स्वाहा—इति वा जुहुयात्,—इति । तदप्यसङ्गतमेव । कुतः ? षष्टिसङ्ख्यावचनात् । ऋगादिभिरेव होमस्याभिधानाच्च । तथा चोक्तम् ।

"छन्दसामेकविंशानां संहितायां यथाक्रमम् ।
तच्छन्दस्काभिरेवर्ग्भिराद्याभिर्होम इष्यते ।
पर्व्वभिश्चैव गानेषु ब्राह्मणेषूत्तरादिभिः ।
अङ्गेषु च तथा मन्त्रैरितिषष्टिर्जुहोतयः" ।

इति ॥ ० ॥ २ ॥ ० ॥

सामसावित्रीञ्च ॥ ३ ॥

अनुब्रूयादित्यनुवर्त्तनीयम् । सावित्रीं ऋचमाश्रित्य यत् साम गीयते, तदिह सामसावित्रीमित्युच्यते । गायत्रं सामेत्यर्थः । साम

सावित्र्याश्चेति वक्तव्ये सामसावित्रीश्चेति विभक्तिव्यत्ययः क्रियते, —द्वितीयानिर्देशबलात् समस्तस्यैव साम्नोऽनुवचनं यथा स्यादित्येवमर्थम् । इतरथा खल्वत्रापि यथोपनयने - पच्छोऽर्द्धर्चशः ऋक्शः , तथैवानुवचनं स्यात् ॥ ० ॥ ३ ॥ ० ॥

सोमꣳ राजनं वरुणमिति ॥ ४ ॥

'चशब्दो लुप्तवद्दृष्टव्यः सोमꣳराजानं वरुणमिति च'—इति भट्टभाष्यम् । क्वचित् सूत्रग्रन्थे पठ्यतएव चशब्दः । सोमं राजानमित्येतस्यामृचि गीयमानं साम चानुब्रूयात् । सामेति कस्माद्गम्यते ? अधिकारात् । 'बार्हस्पत्यमिति त्रिकम्'—इति वचनाच्च । सोमं राजानमित्येतस्यां खल्वृचि गीयमानं साम बार्हस्पत्यमित्याख्यायते । तच्च गेयगाने पठ्यते । केचित्तु पूर्व्वेण सूत्रेणास्यैकसूत्रतां कल्पयन्तो वर्णयन्ति । 'साम सावित्रीश्चानुब्रूयात् । काम् ? सोमं राजानमिति'—इति । तदसङ्गतम् । कस्मात् ? यस्मात् सवितृदेवताका ऋक् सावित्री भवति , इयं खल्वाग्नेयी । अपि च । अस्यां वर्णनायां त्रिकस्यानुवचनं न प्राप्नोति , द्विकस्यैव स्यात् । तच्चानिष्टम् । कुतः ?

> "गायत्रीं च सगायत्रां बार्हस्पत्यमिति त्रिकम् ।
> शिष्येभ्योऽनूच्य विधिवदुपाकुर्य्यात्ततः श्रुतम्" ।

इति वचनात् । तस्मादस्मदुक्त एवार्थः ॥ ० ॥ ४ ॥ ० ॥

आदितश्छन्दसोऽधीत्य यथार्थम् ॥ ५ ॥

छन्दस: प्रकृतस्य ग्रन्थस्य आदित: किञ्चित् अधीत्य आरभ्य यथार्थमिति कर्म्मण: परिसमाप्तिरुच्यते। तत्समापनमिदानीं कर्त्तव्यमित्यर्थ:। यच्च,--यथार्थमिति वचनादिदानीं छन्दोहोमादिकमिति वर्णयन्ति। तदसङ्गतम्। यथार्थशब्दस्य कर्म्मापवर्गसूचनार्थतया एव सर्व्वत्रावगते:। व्याहृतिहोमात् पूर्व्वमेव कर्म्मप्रदीपे तदुपदेशाच्च। तत् खेलधस्तान्निवेदितमस्माभि:। एतस्मिन्नवसरे बाहौ प्रतिसरबन्धनम्। तदाह कर्म्मप्रदीप:। "तत: प्रतिसरान् दक्षिणे बाहावावध्नीरन् स्वस्त्ययनार्थम्। अथ दध्यक्षतधाना भक्षयन्ति"--इति ॥ ० ॥ ५ ॥ ० ॥

अक्षतधाना भक्षयन्ति धानावन्तं करम्भिणमिति ॥ ॥ ६ ॥

अक्षता यवा:, त एव भृष्टा धाना भवन्ति। तथा चोक्तम्।

"अक्षतास्तु यवा: प्रोक्ता: भृष्टा धाना भवन्ति ते"।

इति। अक्षतधानाग्रहणं गोधूमादिधानाप्रतिषेधार्थम्। धानावन्तमिति ऋचा न साम्ना। कुत:? ऋगधिकारात्। भक्षयन्ति सर्व्वं प्राश्नन्ति ॥ ० ॥ ६ ॥ ० ॥

दध्न: प्राश्नन्ति दधिक्राव्णोऽकारिषमिति ॥ ७ ॥

दध्न:--इत्यवयवार्था षष्ठी। दध्नोऽवयवं सर्व्वं प्राश्नन्ति, दधिक्राव्ण इति मन्त्रेण। तदत्र धानानां दध्नश्च पृथगेव प्राशनम्। कस्मात्?

सूत्रभेदेनैवोपदेशात्। भक्षयन्ति—इति; प्राश्नन्ति—इति च; क्रिययोः पृथगेव निर्देशाच्च। दधिप्राशनमन्त्रस्योच्छिष्टा एव पठेयुः प्राणाग्निहोत्रमन्त्रवत्। ननु कृताचमना एव दधि प्राशिष्यन्ति? न। आचान्तोदकाः—इति परतः करणादिदानीमाचमनाभावस्यावगमात्। अथवा। इदानीमाचमनस्यानुपदेशादिहोच्छिष्टतैव नास्ति—इत्यवगम्यते। यत्र खल्वाचमनं नोपदिशति, तत्रोच्छिष्टत्वमेव शिष्टा नेच्छन्ति। यथा प्राणाग्निहोत्रे सोमभक्षणादौ च। धाना दधि चाखादयन्तो निगिरन्ति। तथाच कर्मप्रदीपः। "अथ दध्यक्षतधाना भक्षयन्ति, दधिक्राव्णेन दधि धानावन्तेति धानाः, अखादयन्तो लेलिहन्ति, निगीर्य्याचम्योपविश्यानुवचनमनुगानम्" इति। अपरे तु,—धानादध्नोर्म्मिलितयोः प्राशनमिच्छन्ति;—शुष्काणां धानानामभक्षयित्वा निगिरणशक्यं मन्यमानाः। तदसङ्गतम्। पृथक् प्राशनस्योक्तत्वात्। ग्रन्थान्तरेऽपि 'दधिक्राव्णेन दधि धानावन्तेति धानाः'—इति भेदेनैवोपन्यासाच्च ॥ ० ॥ ७ ॥ ० ॥

आचान्तोदकाः खाण्डिकेभ्योऽनुवाक्या अनुगेयाः कारयेत् ॥ ८ ॥

यदा सर्व्वे शिष्या आचान्तोदकाः सन्त उपविशन्ति, तदा खाण्डिकेभ्यः शिष्यसमूहेभ्यः अनुवाक्या अनुगेयाश्च कारयेत्। आचार्य्यः स्वयमुक्त्वा अनु पश्चात् शिष्यान् वाचयेत्, स्वयञ्च

गीत्वा शिष्यान् गापयेदित्यर्थः। सेयं खाण्डिकेभ्यः—इति—चतुर्थी व्यत्ययात् द्वितीयार्थे वर्णनीया। खाण्डिकः समूहो-घटेत्यनर्थान्तरम्। तथा चोक्तम्। "घटा खाण्डिक उच्यते"—इति। काः पुनरनुवाक्या॰ अनुगेयाश्चाभिप्रेयन्ते? उच्यते। आचार्य्यवचनादनु पश्चात् शिष्यैरुच्यन्ते—इत्यनुवाक्याः बहुवचनस्यार्थवत्त्वात् याः काश्चन तिस्र ऋचो भण्यन्ते। ता एव ऋचः आचार्य्यगानात् परतः शिष्यैर्गीयन्ते इत्यनुगेयाः,—तास्वेवर्क्षु-गीयमानानि त्रीणि सामानि कथ्यन्ते। अन्ये तु, अनुगेयाः—इति व्यत्ययात् क्लीबत्वमभ्युपगच्छन्तो यानि कानिचित् त्रीणि सामानि वर्णयन्ति, न तास्वेवर्क्षु गीयमानानि—इति।

एवं वा—

आचान्तोदका इति व्यत्ययात् द्वितीयार्थे प्रथमा। खाण्डिकेभ्य-इत्यत्रापि तथैव द्वितीयार्थे चतुर्थी। तथाच, आचान्तोदकान् खाण्डिकान् अनुवाक्या अनुगेयाः कारयेदिति पूर्व्ववदर्थः ॥ ० ॥

॥ ८ ॥ ० ॥

एवमुपाकरणात् परं किं तस्मादेवाह्न आरभ्याधीयते? न। किन्तर्हि?—

सावित्रमहः काङ्क्षन्ते ॥ ९ ॥

सविता देवता यस्य, तत् सावित्रं हस्तनक्षत्रम्। तदयुक्तमहोऽपि सावित्रमित्याख्यायते। तद्योगात्तच्छन्दः। तदहः काङ्क्षन्ते प्रतिपालयन्ति,—तस्मिन्नह्नि नाधीयते—इत्यर्थः ॥ ० ॥ ९ ॥ ० ॥

उदगयने च पक्षिणीं रात्रिम् ॥ १० ॥

उदगयने उदञ्चं मार्गं प्रवृत्ते सवितरि। चशब्दात् पूर्ववदेवोपाकृत्य पक्षिणीं रात्रिं काङ्क्षन्ते। पक्षाविव दिवसावभितो यस्या रात्रेः सेयं दिनद्वयसंश्लिता रात्रिः पक्षिणी—इत्युच्यते।

"द्वावह्नावेकरात्रिश्च पक्षिणीत्यभिधीयते"।

इति वचनात्। इदञ्चोदगयनोपाकरणं येषामुत्तरारण्यकादीनां दक्षिणायनेऽध्ययनं प्रतिषिद्धं, तेषामध्ययनार्थं बोद्धव्यम्। तथा चोक्तम्।

"नाधीयीत रहस्यानि सोत्तराणि विचक्षणः।
न चोपनिषदश्चैव षण्मासान् दक्षिणायनात्।
उपाकृत्योदगयने ततोऽधीयीत धर्म्मवित्।
उत्सर्गश्चैक एवैषां तेषां प्रौष्ठपदेऽपि च"।

इति ॥ ० ॥ १० ॥ ० ॥

उभयत एके त्रिरात्रम् ॥ ११ ॥

उभयत उभयस्मिन्नप्युपाकरणे त्रिरात्रमनध्यायमेके आचार्य्या मन्यन्ते। त्रिरात्रं खल्वेतदुपाकरणदिनेन सहैव बोद्धव्यम् ॥ ० ॥ ११ ॥ ० ॥

आचार्य्याणाञ्चोदकोत्सेचनमुभयत्र ॥ १२ ॥

उभयत्र उभयोरप्युपाकरणयोराचार्य्याणामुदकोत्सेचनं उदका-

ञ्जलिप्रक्षेपेण तर्पणं कर्त्तव्यम्। आचार्य्याणाम्—इति पूजायां बहुवचनम्। चशब्दादन्येषामपि ऋष्यादीनाम्। वक्ष्यति च, "छन्दांऽस्यृषीनाचार्य्यांऽश्च तर्पयेयुः"—इति।

एवं वा—

आचार्य्याणां बहुवचनादन्येषाञ्च ऋष्यादीनां तर्पणं कर्त्तव्यम्। चशब्दात् ऋष्यादिपूजनमपि कर्त्तव्यम्। अन्ये तु वर्णयन्ति, आचार्य्याणामित्यादिशब्दो लुप्तवद्द्रष्टव्यः—इति। तदिदं तर्पणादिकं होमात् पूर्व्वं कर्त्तव्यम्। तदाह कर्म्मप्रदीपः। "उत्सर्गेणैवोपाकरणं व्याख्यातम्। ऋषिसामान्याप्लावयन्तस्तथैव निमज्याचम्य ऋषिसामानि गायन्त ऋषींश्च निगमादिभिः सम्पूज्य पुरस्ताच्छालाया उपलिप्तेऽग्नेः पश्चादाचम्योपविश्य छन्दांसि विछन्दांसि हुत्वा"—इत्यादि। अत्र यद्यपि ऋषिपूजा निमज्जनानन्तरपठिता, तथाप्युत्सर्गवन्निमज्जनतर्पणयोः पूर्व्वं प्रत्येतव्या। निमज्य—इति पूर्व्वकालता जुहोत्यपेक्षया—इति नारायणोपाध्यायाः। युक्तश्चैतत्। "उत्सर्गेणैवोपाकरणं व्याख्यातम्"—इत्यतिदेशस्यार्थवत्त्वात्। किमन्यत् कुर्य्यादतिदेशः क्रमं विना। ऋष्याद्याप्लावनादीनि हि स्वपदेनैव निर्दिश्यन्ते।

अन्ये तु व्याचक्षते,—आचार्य्याणां गुरूणां बहुवचनात् तत्पुत्रादीनामपि उदकोत्सेचनं गन्धोदकोद्वर्त्तनेनाङ्गोत्सादनं कर्त्तव्यम्—इति। तदसङ्गतम्। कस्मात्? अशब्दत्वात्। तर्पणस्य च स्फुटमुपदेशात्।

"उत्सादनञ्च गात्राणां स्नपनोच्छिष्टभोजने।

न कुर्य्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्"।

इति मनुना गुरुपुत्रस्य गात्रोत्सादननिषेधाच्च ॥ ० ॥ १२ ॥ ० ॥

अवणामेक उपाकृत्यैतमासाविंशात् कालं काङ्क्षन्ते ॥ १३ ॥

श्रवणां श्रवणयुक्तां श्रावणस्य पौर्णमासीम्—इति केचित्। कस्मात्? "श्रवणेन श्रावण्यां पौर्णमास्याम्"—इति गृह्यान्तरात्। "श्रवणां श्रवणनक्षत्रम्"—इत्यपरे। कस्मात्? "श्रवणेन श्रावणस्य"—इति गृह्यान्तरात्। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्। द्वितीया व्याख्याता। श्रवणां प्रत्युपाकृत्य, मासाविंशात् हस्तनक्षत्रपर्य्यन्तम्, एतं कालम् एके काङ्क्षन्ते। श्रवणामुपाकृत्य तावच्च पठन्ति, यावद्भाद्रपदे हस्तः—इति ॥ ० ॥ १३ ॥ ० ॥

तैषीमुत्सृजन्ति ॥ १४ ॥

तिषः पौषः। तस्येयं तिथिः तैषी। तां प्रत्युत्सृजन्ति,—एके—इत्यनुषज्यते। तथा च गृह्यान्तरकारः। "श्रवणेन श्रावण्यां पौर्णमास्याम्"—इत्युपाकरणं सूत्रयित्वा, "पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजन्ति"—इति पौषे मास्युत्सर्गं सूत्रयाञ्चकार—इति। अथवा तिष्यः पुष्यनक्षत्रम्, तद्युक्ता या काचित्तिथिः सा तैषी। तां प्रत्युत्सृजन्ति उत्सर्गाख्यं कर्म्म कुर्व्वन्ति। तैषीं पौर्णमासीमिति कुतोन वर्ण्यते? सर्व्वत्राविगानेनानुष्ठानात्।

"पुष्ये तु छन्दसां कुर्य्याद्वहिरुत्सर्ज्जनं द्विजः" ।

इति मनुवचनाच्च । सा खल्वियं तैषी द्वयी बोद्धव्या । कथन्नाम ? प्रौष्ठपदोपाकरणपक्षे ,उदगयनशुक्लतैषीम् , उदगयनोपाकरणपक्षे तु प्रौष्ठपदतैषीं प्रत्युत्सर्गः । एवञ्च "प्रौष्ठपदे तिष्येण वहिः" --इत्यादिकर्म्मप्रदीपवचनमपि उदगयनोपाकरणपक्ष एव प्रौष्ठपदे उत्सर्गविधायकं मन्तव्यम् । आरण्यकादीनां खल्वध्ययनार्थमुदगयनोपाकरणम् । तस्यैव च प्रौष्ठपदे उत्सर्गः ।

"उपाकृत्योदगयने ततोऽधीयीत धर्म्मवित् ।
उत्सर्गश्चैक एवैषां तैष्यां प्रौष्ठपदेऽपि च" ।

इति वचनात् । प्रौष्ठपदोपाकरणे तु न प्रौष्ठपद एवोत्सर्गः । तत्र हस्तेनोपाकरणकर्त्तुस्तत्रैव पुनस्तिष्येणोत्सर्गस्यासम्भवात् । अत एव मनुनाऽपि ,—

"तिष्ये तु छन्दसां कुर्य्याद्वहिरुत्सर्ज्जनं द्विजः ।
माघमासस्य वा शुक्ले पूर्व्वाह्णे प्रथमेऽहनि" ।

इति वचनोत्तरार्द्धेन प्रौष्ठपदोपाकरणपक्षाभिप्रायेणैवोदगयने उत्सर्गोऽभिहितः ।

प्रौष्ठपदोत्सर्गात् परतस्तु यावदन्यदुपाकरणं न क्रियते , तावदारण्यकादीनामध्ययनं न कर्त्तव्यम् । कस्मात् ? "प्रौष्ठपदे तिष्येण वहिः"—इत्यादिना उत्सर्गमभिधाय, "अत आपुनरुपाकरणादिदं न व्याहरेयुरन्यत्र ब्रह्मयज्ञात्"—इति कर्म्मप्रदीपवचने अतःशब्देन प्रकृतस्यैवोत्सर्गस्यावगतेः ।

"नाधीयीत रहस्यानि सोत्तराणि विचक्षणः ।

न चोपनिषदश्चैव षण्मासान् दक्षिणायनात्" ।

इति वचनेन दक्षिणायने सर्व्वदैवारण्यकादीनामध्ययननिषेधाच्च। अन्यानि तु छन्दांसि उत्सर्गात् परमपि शुक्लपक्षेऽध्येतव्यानि। तदाह मनुः।

"यथाशास्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः।
विरमेत् पक्षिणीं रात्रिं तदेवैकमहर्निशम्।
अत ऊर्द्धन्तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि च सर्व्वाणि कृष्णपक्षेषु सम्पठेत्" ।

इति। तदिदं वचन परिशेषादारण्यकादिव्यतिरिक्तविषयमेवाव-धार्य्यते। तस्मादारण्यकादीनामेवापुनरुपाकरणादनध्यायो ना-न्येषाम्। केचिदेतदबुद्ध्वा बहु विरुद्धं ब्रुवन्ति स्म। अलं ग्रन्थगौर-वजनकेन तदीयदूषणोपन्यासेन ?

वस्तुतस्तु अस्माकमुपाकरणद्वैविध्येऽप्युत्सर्गस्य न द्वैविध्यम्। उत्सर्गः खल्वेक एवोभयोरप्युपाकरणयोः प्रौष्ठपदे तैष्यां स्यात्। कुतः ? उभयमुपाकरणं सूत्रयित्वा परतस्तैष्यामुत्सर्गस्य सूत्र-णात्सघाऽवगतेः। अतएव कात्यायनेनापि 'प्रौष्ठपदे तिष्येण बहिः' इत्यादिना तथैवाह। न चेदमुदगयनोपाकरणाभिप्रायं वचनमित्यत्र प्रमाणमस्ति। तथात्वे चोत्सर्गान्तरं न स्यादेव। अनुपदेशात्। तस्मादेक एवोत्सर्गः प्रौष्ठपदे तिष्येणेत्यवधार्य्यते। अतएवोभय-मुपाकरणमुपदिश्य—

"उत्सर्गश्चैक एवैषां तैष्यां प्रौष्ठपदेपि च" ।

इत्येकमेवोत्सर्गमभिधत्ते। न च, प्रौष्ठपदे हस्तेनोपाकरण-

कर्त्तुस्तत्रैव पुनस्तिष्येणोत्सर्गो न सम्भवतीति वाच्यम्। वर्षान्तरे प्रौष्ठपदे हस्तेनोपाकर्म्मवर्षान्तरे तत्रैव तिष्येणोत्सर्गस्य सम्भवात्। तथा गार्ग्यः—

"सिंहे रवौ तु पुष्यर्क्षे पूर्व्वाह्णेऽविवरे बहिः।
छन्दोगा मिलिताः कुर्य्युरुत्सर्गं स्वस्वच्छन्दसाम्॥
शुक्लपक्षे तु हस्तेन उपाकर्म्मापराह्णिकम्"।

इति सिंहे रवौ पुष्यर्क्षे उत्सर्गमभिधाय हस्तेनोपाकरणमभिदधानएतदेवाह। अस्माद्वचनादस्माकमुपाकरणे अपराह्णः कालः स्यात्।

"अध्यायानामुपाकर्म्म कुर्य्यात् कालेऽपराह्णिके।
पूर्व्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः"॥

इति परिशिष्टवचनाच्चैतदेवं प्रतिपत्तव्यम्। गोभिलस्यैतदिति हेमाद्रिः। तथा तस्यैव,—

"छन्दोगा मिलिताः कुर्य्युः प्रातरौत्सर्गिकीं क्रियाम्।
अपराह्णे ह्युपाकर्म्म पुष्यहस्तर्क्षयोर्द्विजाः"।

इति। यदा पुनः सिंहस्थे सूर्य्ये शुक्लपक्षे योहस्तः तस्मात् प्राचीनः पुष्यः कर्कटस्थे रवौ भवति, तदा तत्रैव पुष्ये उत्सर्गः करणीयः। कुतः?

"मासे प्रौष्ठपदे हस्तात् पुष्यः पूर्व्वो भवेद् यदा।
तदा तु श्रावणे कुर्य्यादुत्सर्गं छन्दसां द्विजः"॥

इति परिशिष्टोक्तेः। तथा प्रौष्ठपदे हस्तस्य दुश्त्वे तत्रोपाकरणं निषेधति चतुर्व्वर्गचिन्तामणौ स्मृतिः।

"उपाकर्म्म न कुर्व्वन्ति क्रमात् सामर्ग्यजुर्व्विदः।

अर्द्धसंक्रान्तियुक्तेषु हस्त-श्रवण-पर्व्वसु" ॥

इति। तदेवम्भूतस्थले श्रावण एव हस्ते उपाकरणं कर्त्तव्यं भवति।

"बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः"।

इति परिशिष्टवचनात्। श्रावणे हि बह्वृचाः श्रवणेनोपाकुर्व्वन्ति। गोभिलस्यैतदिति निर्णयामृतकारः।

"धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम्।
श्रावणं कर्म्म कुर्व्वीरन् ऋग्यजुःसामपाठकाः॥

इति परिशिष्टवचनान्तरेऽपि श्रावणं कर्म्मेतिसमाख्यया तथाऽवगम्यते। विशेषमाहतुर्व्वृद्धमनुकात्यायनौ—

"अर्द्धरात्रादधस्ताच्चेत् संक्रान्तिग्रहणं तदा।
उपाकर्म्म न कुर्व्वीत परतश्चेन्न दोषकृत्" ॥

इति। तस्मादियमेवावधारणा,—प्रौष्ठपदीं हस्तेनोपकृत्य देवपर्व्वाणि गेयगानादीनि तावदधीयीत यावदब्दान्तरे प्रौष्ठपदे तिष्यः भवति। उदगयने चोपाकृत्योत्तरारण्यकादिकं यावत् षण्मासानधीयीत, ततः प्रौष्ठपदे तिष्येण द्वयोरुत्सर्गं कुर्य्यात्। उत्सर्गात् परतस्तु यावदन्यदुपाकरणं न क्रियते, तावद्वेदं न व्याहरेदन्यत्र ब्राह्मणात्। अस्मच्छास्त्रे तथैवोपदेशात्।

एवं च उत्सर्गात् परमपि शुक्लपक्षेषु छन्दसामध्ययनबोधकानि यानि मन्वादिवचनान्युदाहृतानि, तानि अस्मदन्यतिरिक्तविषयाणि बोद्धव्यानि। अस्मच्छास्त्रे प्रौष्ठपदशुक्लपक्षे तिष्येणोत्सर्गात् परतः पुनस्तत्रैव हस्तेनोपाकरणविधानात् तेषां वचनानां न सम्बन्धाव-

काशीभवतीति ॥ उत्सर्गविधिश्च कर्म्मप्रदीपादवगन्तव्यः ॥ ० ॥
॥ १४ ॥ ० ॥

अथेदानीमाचार्य्यादीनामुदकोत्सेचनविधिरभिधीयते ,—

प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य या आपोऽनवमेह्नीयास्ता अभ्येत्योपस्पृश्य च्छन्दांस्यृषीनाचार्य्यांश्च तर्पयेयुः ॥ १५ ॥

प्राङ्मुखो वा उदङ्मुखो वा ग्रामान्निष्क्रम्य। सोऽयं ग्रामान्निष्क्रमण एव प्राङ्मुखत्वादिनियमः। न पुनरपामपि प्रागादिदिगवस्थितत्वम्। या आपोऽनवमेह्नीयाः। मेह्नं मेढ्रं, तस्मादवाचीनाः अवमेह्नीयाः ताः न भवन्ति—इत्यनवमेह्नीयाः, नाभिदघ्नाः इत्येतत्। तथा चोक्तम्। "नाभिदघ्न उदकेऽनुपविष्टाः"—इति। ता एवम्भूता अपोऽभ्येत्य प्राप्य, उपस्पृश्य स्नात्वा, च्छन्दःप्रभृतींस्तर्पयेयुः सर्वे। चशब्दाद्ब्रह्मादींश्च तर्पयेयुः।

तर्पणञ्चेदं कुशमयान् ऋषीन् स्थलस्थान् गन्धादिभिः सम्पूज्य कर्त्तव्यम्। तर्पणानन्तरञ्च स्थलस्थानामृषीणां जलाञ्जलिप्रक्षेपेणाभिषेकः कर्त्तव्यः। तथाच कर्म्मप्रदीपः। "कौशानृषीन् स्थलस्थान् गन्धमाल्यादिभिः सत्कृत्य नाभिदघ्न उदकेऽनुपविष्टा ब्रह्माणं वेदान् देवानृषींश्छन्दांस्याचार्य्यांश्च तर्पयेयुः, उच्चैरृषीनभिषिञ्चन्ति"—इत्यादि। "ऋषीणां सिच्यमानानाम्"—इति च। अत्र च श्रुतयैव विभक्त्या तर्पणं बोद्धव्यम्। तेन ॐ ब्रह्माणं तर्पयामि—इत्यादिकः प्रयोगः। तथाच नित्यतर्पणे कर्म्मप्रदीपः।

"यवाद्भिस्तर्पयेद्देवान् सतिलाद्भिः पितॄनपि ।
नामाऽन्ते तर्पयामीति आदावोमिति च ब्रुवन्" ।

इति । तदिदमुपाकरणादुत्सर्गाच्च परं सूत्रयन्नाचार्य्य उत्सर्गेऽपि तर्पणं दर्शयति । एतच्च कर्म्मप्रदीपकृता स्पष्टीकृतम् । तदिदमुपाकरणमुत्सर्गश्च गृहस्थवानप्रस्थाभ्यामपि कर्त्तव्यम् । अन्यथा खल्वयातयामता च्छन्दसां न भवेत् । तथाच स्मरणम् ।

"उपाकर्म्मोत्सर्जनञ्च वनस्थानामपीष्यते ।
धारणाध्ययनाङ्गत्वात् गृहिणां ब्रह्मचारिणाम्" ।

इति ॥ ० ॥ १५ ॥ ० ॥

अथेदानीमनध्यायविवक्षयेदमाह, —

तस्मिन् प्रत्युपाकरणेऽभ्रानाध्याय आपुनरुपाकरणाच्छन्दसः ॥ १६ ॥

उदगयनोपाकरणं प्रत्युपाकरणमुच्यते । तस्मिन् प्रत्युपाकरणे कृते सति । अभ्रानाध्यायः । अभ्रदर्शनेऽनाध्यायोऽभ्रानाध्यायः । सदैवाभ्राणां सद्भावादभ्रदर्शनातिशयिकं गृह्यते,—इति कर्कोपाध्यायाः । अभ्रदर्शनञ्चेदं सर्वरूपोपपन्नम् इति भट्टनारायणोपाध्यायाः । किं पुनरत्र तत्त्वम् ? उत्तरं तत्त्वमिति ब्रूमः । कस्मात् ? "अभ्रदर्शने च सर्वरूपे"— इति गृह्यान्तरात् । कतमानि पुनस्तानि रूपाणि कियन्ति च ? उच्यते । अभ्रवायुस्तनितविद्युद्वर्षाणि पञ्चैव ।

अध्ययनमध्यायः, आ अध्यायः आध्यायः, न आध्यायः, अनाध्यायः। एवञ्च सम्यगध्ययननिषेधात् गुरुमुखाद् यदध्ययनं क्रियते, तत्रैवानध्यायो न तु व्याख्यानचिन्तनादावपि,—इति बोद्धव्यम्। गौतमोऽप्याह।

"नित्ये जपे च काम्ये च क्रतौ पारायणेऽपि च।
नानध्यायोऽस्ति वेदानां ग्रहणे ग्राहणे स्मृतः"।

इति। कियन्तं कालं यावदनाध्यायः? आ पुनरुपाकरणात्। पुनरुपाकरणपर्य्यन्तम्। कस्य अनाध्यायः? छन्दसः वेदस्य। तेन वेदाङ्गादीनामध्ययनेऽप्यदोष एव। तथाच स्मरन्ति।

"वेदोपकरणे चैव स्वाध्याये चैव नैत्यिके।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि"।

इति।

"तस्मादहरहर्वेदमनध्यायमृते पठेत्।
यदङ्गं तदनध्याये गुरोर्वचनमाचरन्"।

इति चैवमादि ॥ ० ॥ १६ ॥ ० ॥

विद्युत्स्तनयित्नुपृषितेष्वाकालम् ॥ १७ ॥

विद्युत् प्रसिद्धा। स्तनयित्नुः सशब्दो मेघः। पृषन्ति विन्दवः संजाता अस्येति पृषितं वर्षणमित्येतत्। पृषोदरादित्वात् तत् पदं सिद्धम्। एतेषु समासकरणाभिलितेषु जातेषु, आकालं—निमित्त-

कालादारभ्य अपरेद्युर्यावत् स एव कालस्तावन्तं कालम्। छन्दसोऽनाध्यायः—इत्यनुवर्त्तते। तानि खल्वेतान्यनृतौ यदैव जायन्ते तस्मादेव कालादारभ्य आकालमनध्यायं कुर्व्वन्ति, ऋतौ तु प्रादुष्कृताग्निसमय एव। तथा च मनुः।

"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्।
एतांस्त्वभ्युदितान् विद्याद् यदा प्रादुष्कृताग्निषु।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने"।

इति। अत्र खलु, 'अनृतौ चाभ्रदर्शने',—इति परतः कुर्व्वन् प्रादुष्कृताग्निष्वमीषामभ्युदये ऋतावप्याकालिकमनध्यायं बोधयति। सन्ध्यासु विद्युत्स्तनितयोः सन्निपाते पुनः सज्योतिरनध्यायः, वर्षणे त्वहोरात्रम्। कस्मात्?

"प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा"।

इति मनुवचनात्। तदत्र, 'विद्युत्स्तनितनिस्वने', —इति समासकरणात् द्वयोः सन्निपातं दर्शयति। शेषे, विद्युत्स्तनितवर्षेषु,—इति त्रयाणां पूर्व्वोक्तानां शेषे—वर्षे सति, यथा दिवाऽनध्यायस्तथा रात्रावपीत्यहोरात्रमित्यर्थः। रघुनन्दनस्त्वेतद्विशेषमनालोचयन्; महोल्कासहचरितत्वेन महागर्ज्जनमाकालिकम्, अल्पगर्ज्जने तु सज्योतिरनध्यायः,—इत्येकत्र, वर्षासु सज्योतिरिति चान्यत्र, वर्णयाञ्चकार। यत् पुनर्हारीतवचनम्—'सायंसन्ध्यास्तनिते रात्रिं प्रातःसन्ध्यायामहोरात्रम्''—इति केवलस्तनितेऽप्यनध्यायं विद-

धाति, तदपि वाचनिकत्वादविरुद्धम्। यदि पुनर्विद्युत्स्तनितयोः सन्निपाते सज्योतिः, केवलस्तनिते अहोरात्रमिति वैषम्यादयुक्त-मिति विभाव्यते, तदा तद्वचनं धर्म्मनैपुण्यकामं प्रति बोद्धव्यम्। कुतः ?

"नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा"।

इति मनुवचने धर्म्मनैपुण्यकामनयाऽप्यनध्याये विशेषदर्शनात्। विद्यानैपुण्यकामस्य तु नैषोऽनध्यायः—इति द्रष्टव्यम्। अनयैव दिशा,—

"सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति यः।
चत्वारि तस्य नश्यन्ति आयुर्व्विद्या यशो बलम्"।

इत्येवमाद्याः स्मृतयोऽपि व्याख्याताः। सोऽयं मनोः स्वरसलभ्यः शास्त्रार्थः। अथात्रापरितोषोऽनध्यायरुचीनाम्;—प्रत्येकमेवामी-षामनध्यायनिमित्तत्वमस्तु। तथापि वचनान्तराणि धर्म्मनैपुण्य विद्यानैपुण्यकामविषयतयैव व्याख्येयानि। तत्राप्यतिशयविशेषाद्-विशेषः विवेचनीयः। अथवा। अस्मदाचार्य्यस्यैतावदेव मतं, मतान्तराणि चान्येषामिति न किञ्चिदनुचितम्। मतभेदाः खल्वेते उच्चावचानध्यायकल्पाः। न तेषां विरोधपरिहारार्थमतीव यतितव्यमिति। सा चेयं रीतिरन्यत्रापि यथासम्भवमनुसर-णीया॥ ०॥ १७॥ ०॥

उल्कापातभूमिचलनज्योतिषोरुपसर्गेषु॥ १८॥

उल्का,—

"वृहच्छिरखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषी च प्रमाणेन उल्का नानाविधा मता" ।

इत्युक्तलक्षणा । तासां पाते इतस्ततोऽनेकमहोल्कानां सम्पाते । कुतः ? "महोल्कानाञ्च संप्लवे"—इति वचनात् । एतेनोल्कापातेऽहोरात्रानध्यायविधायिकाः स्मृतयोऽपि व्याख्याताः । भूमिचलने पृथिव्यां चलितायाम् । तत्राहोरात्रानध्यायपरं स्मृत्यन्तरं विद्यानैपुण्यकामविषयं वर्णनीयम् । ज्योतिषोश्च सूर्य्याचन्द्रमसोरुपसर्गे ग्रहणे । एतेषु निमित्तेषु आकालं छन्दसोऽनाध्यायः—इति वर्त्तत एव । समासकरणमत्र लाघवार्थम् । एकैकशः खल्वमीषामनध्यायनिमित्तत्वम् । तच्च ऋतावप्यविशिष्टम् । तथाच मनुः ।

"निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि" ।

इति । अत्र खल्वसमासकरणात् बहुवचननिर्देशाच्च प्रत्येकमेषामनध्यायनिमित्तत्वमवगम्यते । यत्तु,—

"त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके" ।

इति मनुवचनम् । तच्चैनैपुण्यकामविषयम् । यदपि,—

"समाप्य वेदं द्युनिशमारण्यकमधीत्य च ।
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके" ।

इति याज्ञवल्क्यवचनम् । तद्विद्यानैपुण्यकामपरमित्यविरोधः । अपरे त्वाहुः । द्युनिशमिति प्रकृतेऽपि "कृतेऽन्तरे त्वहोरात्रम्"

--इति तस्यैव परतोऽपि अहोरात्रग्रहणं राहुसूतकादीनामाकालिकत्वप्रज्ञापनार्थम्--इति। यच्च, त्रिरात्रानध्ययनं ग्रस्तास्तोदयमात्रविषयम्--इति तत्त्वकारादिभिर्वर्णितम्। तदप्रमाणम्। अनिष्टाधिक्यमिति चेन्नाविशेषात्। इति चेत् पश्यसि,--ग्रस्तास्तोदयपक्षे अनिष्टाधिक्यादनध्यायाधिक्यम्--इति। तन्न। कस्मात्? अविशेषात्। न खल्वनिष्टाधिक्यस्यानध्यायाधिक्यहेतुत्वे वचनमस्ति,--इति तत्राप्यविशिष्टः प्रमाणाभावः। तदभावेऽप्युपदेशाच्चायुक्तम्। वसन्तादिषु खल्वृतुषु निर्घातादयः किल न दोषमावहन्ति। परमेषामनिष्टजनकत्वाभावेऽप्यनध्ययनमुपदिश्यते। तथा चोक्तम्। "अनध्यायानृतावपि"--इति। अनिष्टाधिक्यस्यानध्यायाधिक्यहेतुत्वे त्वनिष्टाभावेऽनध्याय एव न स्यात्। तस्मादनिष्टजनकत्वाभावेऽप्यनध्यायोपदेशात् अनिष्टाधिक्यादनध्यायाधिक्यमित्येतदयुक्तम्।

यच्चापरमुक्तम्,--चैत्रश्रावणमार्गशीर्षाणामादिप्रतिपदां नित्यानध्यायत्वात् राहुसूतके,--इत्यपि नित्यत्वार्थम्। अन्यथा तदहोरात्रस्य पञ्चदशीप्रतिपद्घटितत्वादनध्यायप्राप्तौ राहुसूतक-इत्यनेन पुनरनध्यायाभिधानेऽनुवादापत्तेः,--इति। तदप्यसङ्गतम्। कस्मात्? प्रमाणविशेषस्याभावात्। अपि च।

"इमान् नित्याननध्यायानधीयानो विवर्ज्जयेत्"।

इत्युपक्रम्य मनुना पञ्चदश्यादीनामप्युपदेशात् पञ्चदश्यादीनामपि नित्यानध्यायत्वमेवेति तत्रापि पञ्चदश्यंशे अनुवादोऽवर्ज्जनीयः स्यात्। तदिदं राहुसूतके--इत्याकालिकाभिप्रायमित्येव मत-

माद्रियताम्। पञ्चदशीप्रतिपदोः सन्धावुपरागस्य सम्भवेन चैत्रा-
व्यतिरिक्तप्रतिपदां कास्यानध्यायत्वाभ्युपगमेन च पुनरुक्तेरनवकाशा-
दिति धीमद्भिरवधेयम्। ब्राह्मणपरिव्राजकन्यायेन समाधानन्तु
पक्षान्तरेऽपि समानम्। एवमपरापराण्यपि वचनानि व्याख्ये-
यानि। प्रकृतमनुसरामः ॥ ० ॥ १८ ॥ ० ॥

निर्घाते च ॥ १९ ॥

आकालं छन्दसोऽनाध्यायः—इत्यनुवर्त्तते। निर्घातश्च,—

"यदाऽन्तरीक्षे बलवान्मारुतो मरुताऽऽहतः।

पतत्यधः स निर्घातो जायते वायुसम्भवः"।

इत्युक्तलक्षणः। यत्र,—निर्घातः सशब्द उल्कापातः,—इति वर्णि-
तम्। तदुक्तवचनानवलोकनेन ॥ ० ॥ १९ ॥ ० ॥

अष्टकामावस्यासु नाधीयीरन् ॥ २० ॥

अष्टकाश्च अमावस्याश्च अष्टकामावस्याः, तासु नाधीयीरन्।
बहुवचनं व्यक्तिभेदाभिप्रायम्। अमावस्यासाहचर्य्यादष्टकापदमष्ट-
मीमात्रपरम्। न पुनरपूपाष्टकादीनामष्टकापदेन ग्रहणम्।

"चतुर्दश्यां पञ्चदश्यामष्टम्यां राहुसूतके"।

इति।

"पक्षद्वये चतुर्दश्योरष्टमीद्वितये तथा।

पञ्चादावपि पञ्चान्ते ब्रह्म नाधीयते नरैः"।

इति चैवमादिवचनान्तरेषु अष्टम्या एव बहुलमुपलम्भाच्च। अपूपाष्टकादिषु किल त्रिरात्रमनध्यायमिच्छन्ति। कस्मात्? "त्रिस्रोऽष्टकास्त्रिरात्रम्"—इति गौतमसूत्रात्। अत्र खल्वेकरात्रमनध्ययनं वक्ष्यामः।

आह। अनाध्यायः,—इत्यनुवर्त्तत एव, किमर्थं पुनरिह 'नाधीयीरन्'—इति सूत्रितम्? उच्यते। अनाध्यायः—इति प्रकृते यत् पुनर्व्वचनं तदित आरभ्याहोरात्रिकाअनध्यायाः अधस्तादाकालिकाः,—इति प्रज्ञापनार्थम्। अपिच। अनाध्यायः—इत्यनुवर्त्तने छन्दसः—इत्यप्यनुवर्त्तेत। अतस्तन्निरासार्थं नाधीयीरन्—इति वचनम्। एवञ्च, इह छन्दसः,—इति विशेषाभावादङ्गादीनामप्येवमादयोऽनध्याया भवन्ति। तथा च गृह्यान्तरम्। "वातेऽमावस्यायामिति सर्व्वानध्यायाः"—इति। सर्व्वशब्दादङ्गानामपि न च्छन्दसामेव,—इति कर्कभाष्यम्। सर्व्वग्रहणेन शिल्पाद्यपि गृह्यते, शिल्पिनामपि ह्यनध्यायप्रसिद्धिरस्ति,—इति चाहुः। तथा च पुराणस्मरणम्।

"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत्"।

इति। यत् पुनर्व्वचनान्तरम्,—"उल्कायामग्न्युत्पाते सर्व्वासां विद्यानामाकालिकम्"—इति सर्व्वग्रहणादङ्गादीनामप्यनध्यायमुपदिशति। तद्धर्म्मनैपुण्यकामविषयम्। अष्टम्यादिष्वपि विद्यां स्मृत्यन्तरेऽभिहितः। तथा चापस्तम्बः।

"उदयेऽस्तमये वापि मुहूर्त्तत्रयगामि यत्।
तद्दिनं तदहोरात्रमनध्यायविधौ विदुः।

केचिदाहुः क्वचिद्देशे यावत्तद्दिननाड़िकाः।
तावदेव त्वनध्यायो न तस्मिन्ने दिनान्तरे"।

इति। 'तत्र पूर्व्ववचनमुत्तरमीमांसाध्यायिभिः परिगृहीतं पर वचनन्त्वन्यग्रन्थपरम्। यत्तु निर्णयामृतधृतम्,—

"प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी।
दिनं दूषयते सर्व्वं सुरा गव्यघटं यथा"।

इति। तद्दूषयते,—इत्यभिधानात् पूर्व्ववर्त्तितामात्रेण सर्व्वदिन-दूषणाय'—इति तत्त्वकारः॥ ०॥ २०॥ ०॥

पौर्णमासीषु च॥ २१॥

नाधीयीरन्—इत्यनुवर्त्तते। चशब्दाच्चतुर्दशीषु च। तथाच मनुः।

"अमावस्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्ज्जयेत्"।

इति। अमावस्यापौर्णमासीग्रहणात् प्रतिपदोऽपि ग्रहणमिच्छन्ति। कस्मात्? "द्वे ह वै पौर्णमास्यौ द्वे अमावस्ये"—इति श्रुतेः। गौतमोऽपि। "अमावस्यायाञ्च द्व्यहं वा'—इति सूत्रयन्नेतदेव दर्शयति। यत् पुनर्हारीतस्मरणम्। "चैत्रश्रावणमार्गशीर्षाणा-मादिप्रतिपदो नित्याः"—इति। तत्तासां नित्यत्वमात्रार्थं न पुनरन्यासामध्यायत्वप्रज्ञापनार्थम्। विद्यानैपुण्यकामविषयं वा॥ ॥ ०॥ २१॥ ०॥

तिसृषु कार्त्तिक्यां फाल्गुन्यामाषाढ्याञ्च॥ २२॥

तिसृषु च पौर्णमासीषु कार्त्तिक्यादिषु नाधीयीरन्। स खल्वयं

विद्यानैपुण्यकामं प्रत्युपदेशो वोद्धव्यः। एवञ्च तस्यान्यासु पौर्ण-मासीष्वध्ययनमनिषिद्धम्।

एवं वा—

सर्व्वासामेव पौर्णमासीनामनध्यायत्वस्य पूर्व्वमुक्तत्वादेतासु कश्चिद्विशेषो वाच्यः। कः पुनरसौ? आसामुत्तरासु द्वितीयास्वप्यनध्यायः। सोऽयम्। कस्मात् पुनरिदमवगम्यते,—यदासामुत्तरासु द्वितीयास्वप्यनध्यायः?—इति। यस्मात् पौर्णमासीग्रहणेनैव तदुत्तराः प्रतिपदोऽपि गृह्यन्ते। तदिदं विशेषोपादानमतोऽप्युत्तरस्यास्तिथेर्ग्रहणार्थमित्यवगच्छामः।—गौतमोऽपि। "कार्त्तिकीफाल्गुन्याषाढ़ीपौर्णमासी तिस्रोऽष्टकास्त्रिरात्रम्"—इति सूत्रयन्नेतदेवाह।

"कृष्णपक्षे द्वितीयायां फाल्गुनाषाढ़कार्त्तिके।
शुक्लाश्वयुक्द्वितीयायां नैवाध्ययनमाचरेत्"।

इति च वचनान्तरम्। अन्ये त्वाहुः। कार्त्तिक्यादीनामनध्यायत्वस्य सिद्धत्वात् तासु गतासु अनध्ययनमिहोपदिश्यते। तत्र च कार्त्तिक्यादीनां शुक्लपक्षीयत्वात् तदुत्तरा शुक्लपक्षीयैव काचित्तिथिरिहाभिप्रेतेत्यवगम्यते। उपस्थितस्य शुक्लपक्षस्य परित्यक्तुमनुचितत्वात्। तेन, मार्गशीर्षचैत्रश्रावणशुक्लप्रतिपदामनध्यायत्वमनेनोच्यते। तदिदं सूत्रम्,—"चैत्रश्रावणमार्गशीर्षाणामादिप्रतिपदो नित्याः"—इति हारीतसमानार्थम्,—इति ॥ ० ॥
॥ २२ ॥ ० ॥

कियन्तं कालं पुनरष्टम्यादिष्वनध्ययनम्? उच्यते।

अहोरात्रम्॥ २३॥

स्पष्टार्थं सूत्रम्॥ ०॥ २३॥ ०॥

सब्रह्मचारिणि च प्रेते॥ २४॥

सब्रह्मचारिणि, चकारादसब्रह्मचारिण्यपि समानग्रामीये श्रोत्रिये प्रेते मृते सत्यहोरात्रं नाधीयीरन्। तथाच गृह्यान्तरम्। "एकाहं सब्रह्मचारिणि समानग्रामीये च श्रोत्रिये"—इति॥ ०॥ ॥ २४॥ ०॥

स्वे च भूमिपतौ॥ २५॥

स्वे स्वकीये भूमिपतौ राज्ञि प्रेते अहोरात्रं नाधीयीरन्। यस्य विषये निवसति, सोऽयं स्वो भूमिपतिः। चकारादस्वकीये च पृथिवीश्वरे प्रेतेऽहोरात्रम्॥ ०॥ २५॥ ०॥

त्रिरात्रमाचार्य्ये॥ २६॥

आचार्य्ये,—

"उपनीय स्वयं शिष्यं वेदमध्यापयेत्तु यः।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते"।

इत्युक्तलक्षणे, प्रेते, त्रिरात्रं नाधीयीरन्॥ ०॥ २६॥ ०॥

उपसन्ने त्वहोरात्रम्॥ २७॥

उपसन्नः शिष्यो भण्यते। तस्मिन् प्रेतेऽहोरात्रं नाधीयीरन्। तु-शब्दाद्विधेये शिष्ये न तु प्रतिकूले गुरुत्यागिनि वा ॥०॥ २७ ॥ ० ॥

गीतवादित * रुदितातिवातेषु तत्कालम् ॥ २८ ॥

नाधीयीरन्। यावन्तं कालमेतानि तिष्ठन्ति तावन्तं कालमित्यर्थः। गीतादीनि प्रसिद्धानि। अतिवातस्तु स्मृत्यन्तरादुन्नेयः। तथाच मनुः।

"कर्णश्रावेऽनिले रात्रौ दिवापांशुसमूहने।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते"।

इति। "वायौ दिवा पांशुहरे कर्णश्राविणि नक्तम्"—इति च गौतमसूत्रम् ॥ ० ॥ २८ ॥ ० ॥

शिष्टाचारोऽतोऽन्यत्र ॥ २९ ॥

अतोऽन्यत्र उक्तादतिरिक्तेषु शिष्टाचारः,—उक्तादतिरिक्तेष्वपि येषु शिष्टा अनध्यायमाचरन्ति, तेष्वप्यनध्यायं कुर्य्युरित्यर्थः। शिष्टाश्च,—

"धर्म्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टाब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः"।

इत्युक्तलक्षणाः। तेन वीणास्वनादावपि तत्कालमनध्यायो बोद्धव्यः। तानि च "वेणुवीणाभेरीमृदङ्गगन्त्र्यार्त्तशब्देषु"—इत्येवमादीनि स्मृत्यन्तरेभ्यो बहुलमुपलभ्यानि।

* 'वादित्र'—इति पाठान्तरम्।

एवं वा—

अतः उक्तात् अन्यत्र शिष्टाचारः। तेनानुक्तेष्वपि यत्र शिष्टा अनध्यायमाचरन्ति, तत्राप्यध्ययनं न कुर्युः। यथा, आरण्यकादीनां भोजनादूर्द्ध्वमनध्यायः॥ ०॥ २८॥ ०॥

अथेदानीं प्रकरणान्तरमारभते,—

अद्भुते कुलपत्योः प्रायश्चित्तम्॥ ३०॥

अद्भुतं प्रकृतेर्व्विपर्य्यासः उत्पातः,—इत्यनर्थान्तरम्। तथा चाथर्व्वणाद्भुते। "प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्ति"—इति। तदिदमद्भुतं पूर्व्वकृतासत्कर्म्मजन्यं सञ्चितपापस्य सूचकमेव, न पापजनकम्। अतएव प्रायश्चित्तविधानमुपपद्यते। पापजनकत्वे तु तन्न स्यात्। उक्तञ्च।

"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते।
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान्।
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः।
विचरन्ति विनाशाय रूपैः संबोधयन्ति च"।

इति। तथाऽन्यत्र।

"अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति।
संसूचयन्ति दिव्यान्तरिक्षभौमास्तमुत्पाताः"।

इति। तत्र, दिव्यं ग्रहर्क्षवैकृतम्, आन्तरिक्षमुल्कापातादि, भौमं

परस्थिरभवमित्यन्यत्रानुसन्धेयम्। तदेतस्मिन्नद्भुते जाते सति, तत्-सूचितपापक्षयार्थं कुलपत्योः प्रायश्चित्तं भवति। प्रायश्चित्तन्तु, —"अथातो रजस्वलाऽभिगमने"—इत्यादिना परिशिष्टकारेणो-क्तमादरणीयम्। कुतः? आचार्य्येण विशेषानुपदेशात्। तच्च तत एवोपलब्धव्यम्। यत्रात्र, 'प्रायश्चित्तं व्याहृत्याहुतिचतुष्टयम्, अन्यदपि वहिःस्नानतीर्थाभिषेकपुण्यसूक्तजपदेवगुरुदर्शनहिरण्य-तिलदानभारतकीर्त्तनादि यथासम्भवम्'—इति वर्णितम्। तद-स्मत्परिशिष्टानवलोकनेन ॥ ० ॥ ३० ॥ ० ॥

वंशमध्यमयोर्मणिके वा भिन्ने व्याहृतिभिर्जुहु-यात् ॥ ३१ ॥

वंशो वेश्मनि भवः—यः स्थूणायाउपर्य्याधीयते। मध्यमश्च स्तम्भो-ऽभिप्रेतः। तयोरकस्मादनिमित्ततो भिन्नयोः। मणिको व्या-ख्यातः। वाशब्दः चशब्दार्थः। मणिके चानिमित्तत एव भिन्ने। व्याहृतिभिः प्रायश्चित्तरूपत्वात्ततस्तृभिः, जुहुयात् आज्यम्। इह व्याहृतिभिर्जुहुयात्—इति कुर्व्वन् पूर्व्वत्र प्रायश्चित्तान्तरं दर्श-यति। अतएव, भौमत्वेऽप्यमीषां पृथक् सूत्रणं दोषाल्पत्वेन अल्प-प्रायश्चित्तोपदेशार्थम्। पूर्व्वेषु पुनः परिशिष्टोक्तं गुरुप्रायश्चित्तमेव दोषगुरुत्वादित्यभिप्रायः ॥ ० ॥ ३१ ॥ ० ॥

दुःस्वप्नेष्वद्य नो देव सवितरित्येतामृचं जपेत् ॥ ३२ ॥

दुःस्वप्नेषु स्वप्नेष्वनिष्टदर्शनेषु, अद्य नो देव—इति ऋचं जपेत्। ऋचम्—इति सामप्रतिषेधार्थम्। एताम्—इति स्वरवर्णसम्पाद-नार्थम्। इदमपि पूर्व्वकृतपापसूचकमेव। तथाच शारीरक-

सूत्रम्। "सूचकाश्च हि श्रुतेराचक्षते च तद्विदः"—इति ॥ ० ॥
॥ ० ॥ ३२ ॥ ० ॥

अथापरम् ॥ ३३ ॥

अथेति पूर्व्वप्रकृतार्थम्। कथं नाम ? अद्भुतप्रायश्चित्तवदत्रापि कल्पदृष्टेन विधिना अग्नेरुपसमाधानम्—इति। तथा चाद्भुत-प्रायश्चित्ते परिशिष्टकारेणोक्तम्। "कल्पदृष्टेन विधिनाऽग्निमुप-समाधाय"—इति। अपरं निमित्तं वर्त्तिष्यते,—इति सूत्र-शेषः ॥ ० ॥ ३३ ॥ ० ॥

चित्ययूपोपस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्य्याभ्युदि-तः सूर्य्याभिनिम्लुप्त इन्द्रियैश्च पापस्पर्शे पुनर्म्मामैत्वि-न्द्रियमित्येताभ्यामाज्याहुती जुहुयात् ॥ ३४ ॥

चित्ययूपः श्मशाने यो निखन्यते, स उच्यते। अथवा। चित्यं चयनं सोमे क्रियते। यूपः पशौ क्रियते। तयोरुपस्पर्शनं स्पर्शनम्। तत्र चित्यस्यावदशनीयायाः परतः, यूपस्यापि वहिःकर्म्मण ऊर्द्ध-मिति बोद्धव्यम्। कर्णयोः क्रोशः शब्दः कर्णक्रोशः। अक्ष्णोर्वेपनं स्फुरणम्—अक्षिवेपनम्। वामस्य खल्वक्ष्णो वेपनमत्राभिप्रेतं न तु दक्षिणस्यापि। कथं ज्ञायते ? तस्य शुभसूचकत्वात्। तथाच स्मरन्ति।

"दक्षिणं स्पन्दते नेत्रं बाहुः स्फुरति दक्षिणः।
नराणां धनलाभाय बन्धुसन्दर्शनाय च"।

इति। ततेषामेकैकेषु निमित्तेषु पुनर्म्मामैत्विन्द्रियंमित्येताभ्यां ऋग्भ्यां द्वे आज्याहुती जुहुयात्,—इति सम्बन्धः। यस्य शयानस्य सूर्य्योऽभ्युदेति सोऽयं सूर्य्याभ्युदितः। सोऽपि पूर्व्वोक्ताभ्यामृग्भ्यामाज्याहुतिद्वयं जुहुयात्। यस्य शयानस्य सूर्य्योऽभिनिम्लोचति—अस्तमेति, सोऽयं सूर्य्याभिनिम्लुप्तः। सोऽप्याज्याहुतिद्वयं पूर्व्ववज्जुहुयात्। इन्द्रियैश्च चक्षुःश्रवणादिभिः पापस्पर्शे परस्त्रीप्रेक्षणाश्रवणीयश्रवणादौ पूर्व्ववदाज्याहुतिद्वयं जुहुयात्॥ ० ॥ ३४ ॥ ० ॥

आज्यलिप्ते वा समिधौ ॥ ३५ ॥

आज्येन लिप्ते द्वे समिधौ वा प्रकृताभ्यामृग्भ्यां जुहुयात्,—चित्ययूपोपस्पर्शनादिषु प्रत्येकम्। स खल्वयमाज्याहुतिद्वयस्यासम्भवे विधिर्वोद्धव्यः॥ ० ॥ ३५ ॥ ० ॥

जपेद्वा लघुषु ॥ ३६ ॥

इतोऽपि लघुषु निमित्तेषु अमेध्यदर्शनादिषु मानसापचारादिषु वा, प्रकृतमृग्द्वयं जपेद्वा। सोऽयं वाशब्दो व्यवस्थार्थः॥०॥ ३६ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य तृतीया खण्डिका॥ ० ॥

गोभिलीयगृह्यसूत्रे

तृतीयप्रपाठके चतुर्थी खण्डिका ।

ब्रह्मचारी वेदमधीत्य ॥ १ ॥

ऋजुरक्षरार्थः । उक्तं सत् पुनरुच्यते । किमर्थम् ? विशेषव्रताशक्तौ ब्रह्मचर्य्यमात्रेणापि वेदाध्ययनार्थम् । आदरार्थम् । वक्ष्यमाण-विधानार्थं वा ।

एवं वा—

देवपर्व्वादीनां तत्तद्व्रताचरणपूर्व्वकमध्ययनमुपदिष्टं स्तोभग्रन्था-दीनां तर्ह्यनियमेनाध्ययनं प्राप्नोति, तन्निरासार्थमिदमुच्यते,— ब्रह्मचारी वेदमधीत्य,—इति । वेदग्रहणात् वेदाध्ययनएव ब्रह्मचर्य्यनियमः । एवञ्च ब्रह्मचर्य्यादूर्द्धमप्यङ्गादीनामध्ययने न दोषः ।

अन्ये त्वाहुः । वेदाध्ययनएव तत्तद्व्रतोपदेशादितरग्रन्थानां यथेष्टमध्ययनं माभूदिति कृत्वा खल्वेतत् सूत्रितम्,—इति । अस्याञ्च वर्णनायां वेदशब्दोऽयं साङ्गस्य वेदस्याभिधायको ऽङ्गाना-मेव वा ॥ ० ॥ १ ॥ ० ०

उपन्याहृत्य गुरवे ॥ २ ॥

उप नि आहृत्य । निशब्दात् नीचैः क्षितितलविलग्नशिराः गुरवे उपाहृत्य निवेद्य दक्षिणामित्यर्थात् लभ्यते ॥ ० ॥ २ ॥ ० ॥

ततश्च गुरुणा गृहाश्रमाय,—

अनुज्ञातो दारान् कुर्व्वीत ॥ ३ ॥

ऋजुरक्षरार्थः । उक्तमपि दारकरणं पुनरुच्यते अनुज्ञातत्वादि-गुणविधानार्थम् । आदरार्थं वा । अथवा । दारान् कुर्व्वीत ;—दारान् कर्त्तुं प्रयतेत इत्यर्थः । तदनेन दारकरणाय प्रयत्नो-विधीयते, न तु दारकरणम् । कस्मात् ? स्नानोत्तरभावित्वा-त्तस्य । तथाच मनुः ।

> "गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि ।
> उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम्" ।

इति । ननु, विप्रतिषिद्धमिदमुच्यते ;—दारकरणाय प्रयत्नो वि धीयते, न दारकरणम्—इति । कथम् ? यदि नाम दार-करणाय प्रयतेत, नूनमयं दारानपि कुर्व्वीत—दारकरणमस्य निष्पद्येत । अथ तु न निष्पद्यते, नासौ दारकरणाय प्रयतते । नैष दोषः । यतो यथा दारकरणं निष्पद्यते, तथा यतितव्यम्—दार-करणाय काचित् कन्या प्रार्थयितव्या,—इत्ययमर्थोऽत्र विवक्षितः । एतदनेनोक्तं भवति । दारकरणाय गुरुणाऽनुज्ञातो दारान् करिष्यन् खल्वसौ ब्रह्मचारी व्रतस्थ एव तावत् काञ्चित् कन्यां प्रार्थयेत, तस्याञ्च वाग्दत्तायां सत्यां विवाहसन्निधौ यत् पुण्यमहस्तत्र स्नात्वा-ऽथ दारान् कुर्व्वीत,—इति । तथाच कर्म्मप्रदीपः ।

"यस्य दत्ता भवेत् कन्या वाचा सत्येन केनचित्।
सोऽन्यां समिधमाधास्यन्नादद्दीतैव नान्यथा"।

इति। अन्यथा खल्वनुपलभ्यैव कन्यां श्रमं कुर्व्वन् परस्तात् कश्चित् कालं कन्याया अलाभे अनाश्रमी स्यात्। तच्चानिष्टम्। कुतः?

"अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विजः"।

इति स्मरणात्। तस्माद् व्रतस्थस्यैव कन्याप्रार्थनं दारकरणार्थमिहोपदिश्यते,—इत्यादरणीयम् ॥ ० ॥ ३ ॥ ० ॥

कीदृशान् दारान् कुर्व्वीत? उच्यते,—

असगोत्रान् ॥ ४ ॥

गोत्रं प्रसिद्धम्। समानं गोत्रं येषां ते सगोत्राः, न सगोत्राः असगोत्राः, तान् दारान् कुर्व्वीत ॥ ० ॥ ४ ॥ ० ॥

मातुरसपिण्डान् ॥ ५ ॥

मातुः सपिण्डा ये न भवन्ति, तान् दारान् कुर्व्वीत। सापिण्ड्यमन्यत्रानुसन्धेयम्। सोऽयं सङ्क्षेपतः सूत्रार्थः। विस्तरस्त्वस्माभिर्ग्रन्थगौरवभयादिहोपेक्षितः ॥ ० ॥ ५ ॥ ० ॥

नग्निका तु श्रेष्ठा ॥ ६ ॥

नग्निकेत्यनागतार्त्तवोच्यते। सा तु श्रेष्ठा। अतस्तामुद्वहेत्। नैतत् सुन्दरम्। कस्मात्? यस्मात् दारान् कुर्व्वीत—इत्यस्य विशे-

षण्ढविवक्षया, असगोत्रान्—इति, असपिण्डाम्—इति च सूत्रयित्वा, नग्निका तु श्रेष्ठा—इति विभक्तिवचनातिक्रमः क्रियते। तस्मादवगच्छामः,—दारकरणेन सममस्य सम्बन्धो नास्ति—इति। एवन्तर्हि अन्यथा व्याख्यास्यामः।

"एष्टव्या बहवः पुत्रा यद्यप्येको गयां व्रजेत्।
गौरीं वाप्युद्वहेद्भार्य्यां नीलं वा वृषमुत्सृजेत्"।

इति वचनात् दारान् करिष्यता तावद्गौरीप्राप्तावेव यतनीयम्। दातुस्तु, नग्निका श्रेष्ठा,—इति। तथाच वशिष्ठः। "तस्मान्नग्निका दातव्या"—इति। नग्निका त्वत,—

"यावन्न लज्जयाऽङ्गानि कन्या पुरुषसन्निधौ।
योन्यादीन्यवगूहेत तावद्भवति नग्निका"।

इत्युक्तलक्षणा वा ग्राह्या। यच्च वचनान्तरम्,—

"सप्तसंवत्सरादूर्द्ध्वं विवाहः सार्व्ववर्णिकः।
कन्यायाः शस्यते राजन्नन्यथा धर्म्मगर्हितः"।

इति। तद्विवाहयितुः कन्यायाः सप्तसंवत्सरादूर्द्ध्वं विवाहः शस्यते—इत्येतत्परं न पुनर्दातृभिप्रायम्। "अष्टवर्षा भवेद्गौरी"—इति वचनात्। मनुरप्याह।

"त्रिंशद्वर्षो वहेद्भार्य्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्म्मे सीदति सत्वरः"।

इति। यत् पुनः स्मरणम्,—

"सर्व्वेषामेव दानानामेकजन्मानुगं फलम्।
हाटकक्ष्मागौरीणां सप्तजन्मानुगं फलम्"।

इति। नैतेन गौरीदानं विधीयते। किन्तर्हि ? यदृच्छया कृतं गौरीप्रदानमनेन सूच्यते। तस्माददोषः। विधीयतां वा गौरी-प्रदानं, तथापि नानुपपत्तिः। कथम् ? गौरीप्रदाने तावत् सप्त-जन्मानुगं फलं भवति, नग्निका पुनरतोऽपि विशिष्टफलदात्री,— इति वचनव्यक्तेः सम्भवात्। स खल्वयमर्थः सूत्रे तुशब्दं प्रयुञ्जता आचार्य्येण सूचितः। सेयं पूर्व्वेषां भाष्यकाराणां मतानुसारिणी वर्णना। अस्मच्छास्त्रे पुनरन्यविधैव नग्निका पठ्यते। तथाच गृह्यासंग्रहः।

"नग्निकान्तु वदेत् कन्यां यावन्नर्त्तुमती भवेत्।
ऋतुमती त्वनग्निका तां प्रयच्छेत्तु नग्निकाम्।
अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका।
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम्।
पयोधरैस्तु गन्धर्व्वा रजसाऽग्निः प्रकीर्त्तितः।
तस्मादव्यञ्जनोपेतामरजामपयोधराम्।
अभुक्ताञ्चैव सोमाद्यैः कन्यकां तु प्रशस्यते"।

इति। तदनेन, अव्यञ्जना अरजस्कपयोधरा सोमाद्यैरभुक्ता कन्या आचार्य्येण प्रशस्यते,—इति सुव्यक्तमुक्तवता आचार्य्यपुत्रेणेदमेव सूत्रं व्याख्यातमित्यवगच्छामः। तस्मात् नात्र स्मृत्यन्तरविरोधः शङ्कनीयः, गौर्य्या अपि निरुक्तनग्निकात्वानपायात्,—इत्यय-मस्मदीयः पन्थाः।

अथापि स्यात् ;— दारकरणेनैव सममस्य सम्बन्धः, तथापि नानु-

पपत्तिः । कस्मात् ? अनियतत्वाद्विभक्तिवचनातिक्रमोपपत्तेः । नियता खल्वसगोत्रा मातुरसपिण्डा च दारकरणे, नग्निका पुनरनियता, श्रेष्ठत्वात् । एतस्मात् कारणादत्र विभक्तिवचनातिक्रमः क्रियते,—इति न किञ्चिदनुचितम् । अस्याश्च वर्णनायां आपातविरुद्धानि स्मृत्यन्तरवचनानि बुद्धिमद्भिर्व्याख्येयानि । ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः ॥ ० ॥ ६ ॥ ० ॥

अथाप्लवनम् ॥ ७ ॥

अथेत्यानन्तर्य्यार्थम् । कथन्नाम ? कन्याप्रार्थनानन्तरं कन्यायां वाचा दत्तायां सत्यामथानन्तरमाप्लवनं स्नानं कुर्य्याद्ब्रह्मचारी । अथ व्रतान्तविहितेन्द्रस्थालीपाकादिकर्म्मानन्तरम्—इति केचित् ॥ ॥ ० ॥ ७ ॥ ० ॥

तद्विधिविवक्षया इदमाह,—

उत्तरतः पुरस्ताद्वाऽऽचार्य्यकुलस्य परिवृतं भवति ॥ ॥ ८ ॥

आचार्य्यकुलस्याचार्य्यगृहस्य, उत्तरतः उत्तरस्यां पुरस्तात् पूर्व्वस्यां वा दिशि, परिवृतं परि सर्व्वतोभावेन मण्डपादिना वृतमाच्छादितं भवति किञ्चित् स्थानम् ॥ ० ॥ ८ ॥ ० ॥

तत्र प्रागग्रेषु दर्भेषूदङ्ङाचार्य्य उपविशति ॥ ९ ॥

तत्र परिवृते स्थाने पूर्व्वाग्रेषु कुशेषु उदङ्मुख आचार्य्य उपविशति ॥ ० ॥ ८ ॥ ० ॥

तस्मिन्नेव परिवृते स्थाने, आचार्य्यसन्निधौ,—

प्रागब्रह्मचार्य्युदगग्रेषु दर्भेषु ॥ १० ॥

उपविशति। प्राक् प्राङ्मुखः ॥ ० ॥ १० ॥ ० ॥

सर्व्वौषधिविफाण्टाभिरद्भिर्गन्धवतीभिः शीतोष्णाभिराचार्य्योऽभिषिञ्चेत् ॥ ११ ॥

सर्व्वौषधयो व्याख्याताः। ताभिः सह विफाण्टाभिर्विपक्काभिः,

"क्षुसे द्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत्।
मृत्पात्रे कुड़वोन्मानं ततस्तु स्रावयेत् पटात्।
स स्याच्चूर्णद्रवः फाण्टः:—————"।

इत्युक्तलक्षणाभिर्वा, गन्धवतीभिः प्रशस्तगन्धयुक्ताभिः, शीतोष्णाभिः शीतोदकमिश्राभिरुष्णाभिः। अथवा। शीताश्च ता उष्णाश्च,—इति शीतोष्णाभिः, नातिशीताभिर्नाप्यत्युष्णाभिरद्भिराचार्य्यो ब्रह्मचारिणमभिषिञ्चेत्। सोऽयं परमतोपन्यासः ॥ ० ॥ ११ ॥ ० ॥

स्वमतमिदानीमभिधीयते ,—

स्वयमिव तु ॥ १२ ॥

तुशब्दात् पक्षो विपरिवर्त्तते। इवशब्द एवकारार्थः। स्वयमेव

ब्रह्मचार्य्यात्मानमभिषिञ्चेत् न पुनराचार्य्योऽभिषिञ्चेत्। अतएव वक्ष्यति। 'आत्मानमभिषिञ्चति'—इति। तस्मात्, आचार्य्योऽभिषिञ्चेदित्येतत् परमतम्—इति तत्त्वकारोक्तमादरणीयम् ॥ ० ॥ ॥ १२ ॥ ० ॥

कस्मात् पुनः कारणात् स्वयमेव ब्रह्मचार्य्यात्मानमभिषिञ्चेत्, न पुनराचार्य्यः? उच्यते,—

मन्त्रवर्णो भवति ॥ १३ ॥

यस्मात् स्वयमेवाभिषेके मन्त्रवर्णो भवति, तस्मात् स्वयमेवाभिषिञ्चेदित्यर्थः। कः पुनरसौ मन्त्रवर्णः? 'तेनासौ मामभिषिञ्चामि'—इति, 'तेन मामभिषिञ्चतम्'—इति च। तस्मात् स्वयमेवाभिषिञ्चेत् नाचार्य्यः—इति सिद्धम्। अपरे तु, आचार्य्योऽभिषिञ्चेदित्यस्य परमतत्वमसहमानाः आचार्य्यः—इति प्रथमां विभक्तिं तृतीयारूपेण विपरिणमयन्तोऽध्याहारञ्च कुर्व्वन्तो वर्णयन्ति,—आचार्य्येणानुज्ञातो ब्रह्मचारी अभिषिञ्चेत्—इति।

अपरे त्वाहुः। 'आचार्य्योऽभिषिञ्चति' 'स्वयमिव तु' इत्युभयथा वचनदर्शनात् विकल्पोऽयम्। आचार्य्यो वा ब्रह्मचारिणमभिषिञ्चति ब्रह्मचारी स्वयमेव वाऽऽत्मानमभिषिञ्चति,—इति। पठन्ति च,—

"ब्रह्मचारी अनुज्ञातोगुरुणा गुरुरेव वा।
सर्व्वौषधिविमिश्राभिः शीतोष्णाभिः सुगन्धिभिः"।

इति ॥ ० ॥ १३ ॥ ० ॥

अभिषेकप्रकार इदानीमभिधीयते,—

ये अप्स्वन्तरग्नयः प्रविष्टाः इत्यपामञ्जलिमवसिञ्चति ॥ १४ ॥

ये अप्सु—इति मन्त्रेण, अपां प्रकृतानाम्, अञ्जलिम् अवसिञ्चति अवाचीनं सिञ्चति त्यजति ब्रह्मचारी। भूमावित्यर्थः। एवञ्च सति, 'अभि तान् सृजामि'—इति मन्त्रलिङ्गमप्यनुगृह्यते। एवमुत्तरत्रापि ॥ ० ॥ १४ ॥ ० ॥

यदपां घोरं यदपां क्रूरं यदपामशान्तमिति च ॥ ॥ १५ ॥

अपामञ्जलिमवसिञ्चति। तस्मादत्रापि पूर्व्ववत् भूमावेवाञ्जलिपरित्यागः ॥ ० ॥ १५ ॥ ० ॥

यो रोचनस्तमिह गृह्णामीत्यात्मानमभिषिञ्चति ॥ ॥ १६ ॥

यो रोचनः—इति मन्त्रेणात्मानमभिषिञ्चति अभि सर्व्वतोभावेन सिञ्चति, प्रकृतानामेवापामञ्जलिना। स खल्वयमभिषेकः शिरसि कर्त्तव्यः। कथं ज्ञायते? 'अभिषिञ्चति'—इति वचनात्। 'अथाप्लवनम्'—इति चोपक्रमात्। एवं खल्वाम्नायते। 'शिरः प्रधानमङ्गानाम्'—इति वचनाच्च। सन्देहे हि प्रधानानुसरणं कर्त्तुमुचितम्। एवमग्रेऽपि ॥ ० ॥ १६ ॥ ० ॥

यशसे तेजसे इति च ॥ १७ ॥

यशसे—इत्यादिना मन्त्रेण च पूर्व्ववदात्मानमभिषिञ्चति ब्रह्मचारी, प्रकृतानामपामञ्जलिना ॥ ० ॥ १७ ॥ ० ॥

येन स्त्रियमकृणुतमिति च ॥ १८ ॥

येन स्त्रियमिति मन्त्रेण च पूर्व्ववदात्मानमभिषिञ्चति ॥०॥ १८ ॥०॥

तूष्णीं चतुर्थम् ॥ १९ ॥

पूर्व्ववदात्मानमभिषिञ्चति ॥ ० ॥ १९ ॥ ० ॥

उपोत्थायादित्यमुपतिष्ठेतोद्यन्भ्राजभृष्टिभिरित्येतत्प्रभृतिना मन्त्रेण ॥ २० ॥

उपेति सामीप्ये। आचार्य्यस्य समीपादुत्थाय, (आदित्याभिमुखः सन्) आदित्यमुपतिष्ठेत आराधयेत्। केन? उद्यन् भ्राजभृष्टिभिरित्येवमादिना मन्त्रेण, मा मा हिंसीरित्यन्तेन मन्त्रचतुष्टयेनेत्यर्थः ॥ ० ॥ २० ॥ ० ॥

यथालिङ्गं वा विहरन् ॥ २१ ॥

तस्मिन्नेव स्नानदिने यथालिङ्गं वा मन्त्रं विहरन् विहृतं कुर्व्वन् आदित्यमुपतिष्ठेत। कथन्नाम? प्रातर्लिङ्गेन प्रातरुपतिष्ठेत, सान्तपनलिङ्गेन मध्यन्दिने, सायंलिङ्गेन सायमुपतिष्ठेत,— इति। विहारो विकर्षणं पृथक्करणमित्येतत् ॥ ० ॥ २१ ॥ ० ॥

विहारपक्षे तावत् त्रयाणां मन्त्राणामेकैकस्य मन्त्रस्य खल्वेवमेकैकस्मिन्नुपस्थाने विनियोगः सम्पन्नः, चतुर्थस्य तु मन्त्रस्य सन्ध्यात्रयेऽपि विनियोगमाह,—

चतुरसीत्यनुबध्नीयात् ॥ २२ ॥

चतुरसीति चरमं मन्त्रम्, अनु प्रातरादिलिङ्गानां मन्त्राणां पश्चात्, बध्नीयात् ग्रथयेदित्यर्थः। तथाच, यथालिङ्गं मन्त्रमुच्चार्य्य चतुरसीति च पश्चादुक्ता सर्व्वत्रोपतिष्ठेत ॥ ० ॥ २२ ॥ ० ॥

मेखलामवमुञ्चत उदुत्तमं वरुणपाशमिति ॥ २३ ॥

मेखलामवमुञ्चते अवाचीनं मुञ्चति उदुत्तममिति मन्त्रेण। मुञ्चते--इति च्छेदप्रतिषेधार्थम्। अव--इत्यधस्तान्मोचनार्थम् ॥ ॥ ० ॥ २३ ॥ ० ॥

ब्राह्मणान् भोजयित्वा स्वयं भुक्ता केशश्मश्रुरोमनखानि वापयीत शिखावर्जम् ॥ २४ ॥

ब्राह्मणान् भोजयित्वा--इत्यनेनान्वाहार्य्यश्राद्धमुक्तम्। एवमेके। कर्म्मापवर्गविहितं ब्राह्मणभोजनमनेनोच्यते। एवमपरे। न च परस्तादपि कर्म्मोपदेशादेतदयुक्तमिति केनचिदुक्तं युक्तमिति वाच्यम्। पुरस्तादपि कर्म्मोपदेशादन्वाहार्य्यश्राद्धस्याप्येतर्हि विधानस्यानुचितत्वात्। तत् खल्वादितः कर्म्मणो विहितम्। तस्माद्वचनबलाददोषः,—इत्युभयत्रापि समानः परिहारः।

तथापि, कतरः पुनरत्र पक्षो युक्तः? अन्वाहार्य्यश्राद्धमनेनोच्यते,—इत्ययम्--इत्याह। कस्मात्? यस्मात् समानेऽपि क्रमभेदे प्रधानकर्म्मणः स्नानस्यादितः वरमन्वाहार्य्यश्राद्धमभ्युपगन्तुं युक्तम्,

न पुनः कर्म्मापवर्गविहितं ब्राह्मणभोजनं जातुचिदपि प्रधानकर्म्मणः पूर्व्वं वर्णयितुमुचितम्। स्नानं खल्वत्र प्रधानं कर्म्म। कुतः ? 'अथाप्लवनम्'—इत्युपक्रमात्। 'स्नानं सहधर्म्मचारिणीसंयोगः'—इति च गौतमेन पुरुषसंस्कारमध्ये तस्य गणनात्। तस्मादन्वाहार्य्यश्राद्धमिदानीमुच्यते,—इत्यादरणीयम्। उभयस्मादपि ब्राह्मणभोजनादन्यदेव वा ब्राह्मणभोजनमनेन वाच्यम्। इदानीमेव कर्म्मापवर्गं मन्यमानो भवदेवभट्टस्त्वनादेयवचन एव।

इदन्त्विह विवेचनीयम्। 'अथाप्लवनम्'—इत्युपक्रमात् स्नानं तावदिह प्रधानं कर्म्मेति नात्र विप्रतिपद्यामहे। परन्तु 'स्वयमिव तु' 'मन्त्रवर्णो भवति'—इति वचनात् मन्त्रेण योऽयमद्भिरभिषेकः तदेवाप्लवनापरपर्य्यायं स्नानं प्रधानं कर्म्मेति प्रतिपद्यामहे। अभिषेकः स्नानमिति खल्वनर्थान्तरम्। अग्रिमसूत्रे 'स्नात्वा'—इति तु वापनोत्थाप्रायत्यापनयनार्थं स्नानमुच्यते, न त्वेतत् प्रधानं कर्म्म। किं कारणम् ? न हि भुक्त्वा प्रधानं कर्म्म क्रियते। न वा प्रधानं स्नानममन्त्रकं तदङ्गन्त्वभिषेकोमन्त्रवानिति साध्वी कल्पना भवति। तस्मात् प्रधानस्य कर्म्मणः परस्तादन्वाहार्य्यश्राद्धमिति न साम्प्रतं वर्णयितुम्। तत् खलु पुरस्तादेव कर्म्मणो यथाप्राप्तं कर्त्तुमुचितम्। तदरं प्रधानस्य कर्म्मणोऽन्त्त्वादपवर्गविहितं ब्राह्मणभोजनमस्मिन् क्रमे कर्त्तव्यमिति स्थाने वक्तुम्। आश्वयुजीकर्म्मण्यपि 'ब्राह्मणान् भोजयित्वा स्वयञ्च भुक्त्वा'—इति सूत्रयिष्यति। तत्राप्येवमेव वर्णयिष्यामः। अन्यदेव वैतद्ब्राह्मणभोजनमित्यस्याश्च वर्णनायामनुष्ठानबाहुल्यमात्रमिति। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्।

तदेवं ब्राह्मणान् भोजयित्वा स्वयञ्च भुक्त्वा शिखावर्ज्जं केशादीनि वापयीत। अत्र शिखावर्ज्जमिति करणात् पुरस्तात् सशिखमेव वपनं कार्य्यमित्यवगम्यते। अभिहितश्चैतदस्माभिरधस्तात् ॥ ० ॥ २४ ॥ ० ॥

स्नात्वाऽलङ्कृत्याऽहते वाससी परिधाय स्रजमाबध्नीत, —श्रीरसिमयि रमस्वेति ॥ २५ ॥

स्नात्वा कुण्डलादिभिरात्मानमलङ्कृत्य, अहते वाससी परिधाय, स्रजं पुष्पमालाम्, शिरःप्रधानत्वादङ्गानां शिरस्याबध्नीत, श्रीरसीतिमन्त्रेण ॥ ० ॥ २५ ॥ ० ॥

नेत्र्यौ स्थो नयतं मामित्युपानहौ ॥ २६ ॥

नेत्र्यौ—इति मन्त्रेणोपानहौ आबध्नीत। योग्यत्वात् प्रतिदेश पादयोः ॥ ० ॥ २६ ॥ ० ॥

गन्धर्व्वोऽसीति वैणवं दण्डं गृह्णाति ॥ २७ ॥

वेणुर्वंशः। तत्प्रभवं वैणवं दण्डं गृह्णाति गन्धर्व्वोऽसीति मन्त्रेण ॥ ॥ ० ॥ २७ ॥ ० ॥

आचार्य्यꣳ सपरिषत्कमभ्येत्याचार्य्यपरिषदमीक्षते,—यक्षमिव चक्षुषः प्रियो वो भूयासमिति ॥ २८ ॥

परिषत् सभा—इत्यनर्थान्तरम्। सपरिषत्कं शिष्यादिसभासहितमाचार्य्यम्, अभ्येत्य आभिमुख्येनागत्य, आचार्य्यपरिषदमीक्षते

यच्चमिवेति मन्त्रेण। पुनराचार्य्यग्रहणमाचार्य्यसन्निहितायाः परिषद ईक्षणार्थम्। इतरथा परिषद एवेक्षणं स्यान्नाचार्य्यस्य॥ ॥०॥२८॥०॥

उपोपविश्य मुख्यान् प्राणान् संमृशन्नोष्ठापिधाना नकुलीति॥ २९॥

उप आचार्य्यस्य समीपे उपविश्य, मुख्यान् मुखभवान् प्राणान् वायून्—तेषाममूर्त्तत्वात् तदायतनानि – मुखनासिकाऽक्षिकर्णच्छिद्राणीत्यर्थः। संमृशन् स्पृशन् ओष्ठापिधानेति मन्त्रं जपेत्॥ ०॥ २९॥ ०॥

अथैनमाचार्य्योऽर्हयेत्॥ ३०॥

अथैतस्मिन्नवसरे एनं स्नातकमाचार्य्योऽर्हयेत् वक्ष्यमाणेन विधिना। तत्र 'स्नातकः'—इति यो वक्ष्यते, सोऽयम्॥ ०॥ ३०॥ ०॥

गोयुक्तं रथमुपसंक्रम्य पक्षसी कूबरबाहू वाऽभिमृशेत् वनस्पते विड्वङ्गो हि भूया इति॥ ३१॥

गोभिर्युक्तं रथमुपसङ्क्रम्य,—उप समीपे सम्यक् गत्वा। पक्षसी धर्मौ। कूबरबाहू वा। कूबरो युगन्धरः—इत्यनर्थान्तरम्। तस्य बाहू इव बाहू, कूबरबाहू कूबरपार्श्वे—इत्येतत्। तौ वा। कूबरौ रथिकस्थानं तस्य बाहू कूबरबाहू रथस्येषे इति केचित्। अभिमृशेत् स्पृशेत् वनस्पते—इति मन्त्रेण॥ ०॥ ३१॥ ०॥

ततो रथमारुह्य,—

आस्थाता ते जयतु जेत्वानीत्यातिष्ठति ॥ ३२ ॥

वनस्पते इति मन्त्रस्य चतुर्थपादेन आस्थाता—इत्यनेन, आतिष्ठति तस्मिन् रथे सम्यक् तिष्ठति ॥ ० ॥ ३२ ॥ ० ॥

ततश्च तेनैव रथेन,—

प्राङ् वोदङ् वाऽभिप्रयाय प्रदक्षिणमावृत्त्योपयाति ॥ ३३ ॥

प्राङ्मुखो वा उदङ्मुखो वा, अभिप्रयाय सर्व्वतोभावेन प्रकर्षेण गत्वा, प्रदक्षिणं यथा भवति तथा आवृत्य आवर्त्तनं कृत्वा उपयाति आचार्य्यसमीपं गच्छति ॥ ० ॥ ३३ ॥ ० ॥

उपयातायार्घ्यमिति कौहलीयाः ॥ ३४ ॥

रथादवरुह्योपयातायाचार्य्यसमीपं गताय स्नातकाय अर्घ्यमर्हण-माचार्य्येण कर्त्तव्यम्, न तु पूर्व्वमिति कौहलीयाः कौहलीय-शाखाविशेषाध्यायिन आचार्य्या मन्यन्ते ॥ ० ॥ ३४ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य चतुर्थी खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

तृतीयप्रपाठके पञ्चमी खण्डिका।

स्नानविधिमभिधाय, अथेदानीं स्नातकव्रतविवक्षया इदमाह,—

अत ऊर्द्ध्वं वृद्धशीली स्यादिति समस्तोद्देशः ॥ १ ॥

अतोऽस्मात् स्नानादूर्द्ध्वं परतः, वृद्धशीली स्यात्। वृद्धाः,—

"न तेन वृद्धो भवति येनास्य पलितं शिरः।

यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः"।

इत्यक्तलक्षणाः। वृद्धानां शीलं वृद्धशीलम्, तदस्य अस्ति,—इति वृद्धशीली, तथाविधो भवेत्। वृद्धाः खल्वधिगतवेदाः साक्षात् कृतधर्म्माणोऽनिष्टफलकं कर्म्मजातं परिहृत्य श्रेयःसाधनान्येव कर्म्माणि यत्नतः परिशीलयन्ति, अतोऽयमपि स्नातको वृद्धशीली भवेत्। अन्ये त्वाहुः,—'वृद्धाः स्थविराः, ते हि चिरजीवितया विदितबहुधर्म्ममार्गा भवन्ति, अतो युक्तं तच्छीलित्वम्'—इति। 'इति' अयम्, समस्तोद्देशः समस्तानां स्नानकव्रतानाम् उद्देशः संक्षेपेणोपदेशः। शिष्यहितार्थस्तु उत्तरः प्रपञ्चः। श्लोकमपि उदाहरन्ति।

"विस्तीर्य्य हि महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्"।

इति ॥ ० ॥ १ ॥ ० ॥

तत्रैतान्याचार्य्याः परिसञ्चक्षते ॥ २ ॥

तत्र तस्मिन् दृढशीलविषये स्नातकव्रतविषये वा एतानि वक्ष्यमाणानि व्रतानि आचार्य्याः परिसञ्चक्षते सर्व्वतोभावेन सम्यग् वदन्ति ॥ ० ॥ २ ॥ ० ॥

कानि पुनस्तानि ? उच्यते,—

नाजातलोम्न्योपहासमिच्छेत् ॥ ३ ॥

यस्या यौवनोद्भेदव्यञ्जिका नाभिमण्डलपार्श्ववर्त्तिनी श्यामा रोमराजिरल्पाऽपि न जाता, सेयमजातलोम्नी अजातव्यञ्जना चोच्यते। तया सह उपहासं मनसाऽपि नेच्छेत्। उपहासः संवेशो भोगो मैथुनमित्येकोऽर्थः। तथा चोक्तम्।

"अजातव्यञ्जनाऽलोम्नी, न तया सह संविशेत्"।

इति ॥ ० ॥ ३

नायुग्वा ॥ ४ ॥

काकवन्ध्यायां या जायते, सेयमयुगूः। तया सह नोपहासमिच्छेत्। अर्थादुपयमनमेवास्या निषिध्यते। तथा चोक्तम्।

"अयुगूः काकवन्ध्याया जाता, तां न विवाहयेत्"।

इति ॥ ० ॥ ४ ॥ ० ॥

न रजस्वलया ॥ ५ ॥

रजस्वलया उदक्यया सह नोपहासमिच्छेत् ॥ ० ॥ ५ ॥ ० ॥

न समानर्ष्या ॥ ६ ॥

समाना ऋषयः प्रवराः यस्याः, सेयं समानर्षी। तया सह नोपहासमिच्छेत्। अयमप्यर्थादुपयमनस्यैव प्रतिषेधः। तथा च स्मरणम्। "असमानप्रवरां विवाहयेत्"—इति। "न सगोत्रां न समानप्रवरां भार्य्यां विन्देत"--इति चैवमादि ॥० ॥ ६ ॥ ० ॥

नापरया द्वारा प्रपन्नमन्नं भुञ्जीत ॥ ७ ॥

द्वार्शब्दो द्वारशब्दपर्य्यायः। अपरया द्वारा गवाक्षादिद्वारेण प्रपन्नमाहृतमन्नं न भुञ्जीत नाश्नीयात्। अन्नमितिकरणात् धान्यादीनामप्रतिषेधः,—इति वदन्ति ॥ ० ॥ ७ ॥ ० ॥

न द्विःपक्वम् ॥ ८ ॥

द्विःकृत्वो यत् पच्यते, तदिदं द्विःपक्वं, द्विःस्विन्नमाख्यायते। तथाविधमन्नं न भुञ्जीत। द्विःस्विन्नस्य तदेव;—यत् सूपकार-शास्त्रापेक्षितपाकनिष्पत्त्यनन्तरं शैत्यादिनिवर्त्तये पुनः पच्यते। न पुनरर्द्धपाकानन्तरं तत्शास्त्रोक्तसम्भारणरूप-पाकान्तरसिद्धं व्यञ्जनादि। अतीतार्थ-निष्ठानिर्देशात्। न खल्वन्तरेण सम्भारणं पाको-निष्पद्यते। पक्वमितिवचनादुष्णीकरणमात्रे न दोषः,—इति वदन्ति ॥ ० ॥ ८ ॥ ० ॥

न पर्य्युषितम् ॥ ९ ॥

पर्य्युषितमन्नं न भुञ्जीत ॥ ० ॥ ९ ॥ ० ॥
किं सर्व्वमेव पर्य्युषितं न भोक्तव्यम्? न। किन्तर्हि?—

अन्यत्र शाकमांसयवपिष्टविकारेभ्यः ॥ १० ॥

यवविकाराः सक्तुप्रभृतयः। पिष्टविकाराः पिष्टकादयः। प्रसिद्ध-मन्यत्। यवग्रहणं गोधूमस्याप्युपलक्षणार्थम्। एभ्योऽन्यत्र पर्य्यु-षितं न भुञ्जीत। एतानि तु पर्य्युषितान्यपि भुञ्जीत। अत्र द्वन्द्वैकवद्भावादेव सिद्धे बहुवचनमन्यस्यापि संग्रहार्थम्। तथाच मनुः।

"यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्।
तत्पर्य्युषितमप्याद्यं हविःशेषञ्च यद्भवेत्।
चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः।
यवगोधूमजं सर्व्वं पयसश्चैव विक्रिया"।

इति। तथा यमः।

"मसूरमाषसंयुक्तं तथा पर्य्युषितञ्च यत्।
तत्तु प्रक्षालितं कृत्वा भुञ्जीत ह्यभिघारितम्"।

इति। तस्मात् पर्य्युषितमप्येवमादि भोक्तव्यम्। विकारान्तरप्रा-मन्तु सर्व्वथैव वर्ज्जनीयम्। कुतः?

"अपूपाश्च करम्भाश्च धाना वटकसक्तवः।
शाकं मांसञ्च पूपञ्च सूपं कृषर एवच।

यवागूं पायसञ्चैव यच्चान्यत् स्नेहसम्भवम् ।
सर्व्वं पर्य्युषितं भक्ष्यं सूक्तञ्च परिवर्ज्जयेत्" ।

इति वचनात् । सूक्तं यन्मधुरं कालवशादम्लतां गतम्—इति शूलपाणिः । तत्रापि विशेषो मनुनोक्तः ।

"दधि भक्ष्यञ्च सूक्तेषु सर्व्वञ्च दधिसम्भवम्" ।

इति । खण्डादिपक्कस्य तु पर्य्युषितत्वमेव नास्ति । तथा च स्मरणम् ।

"खण्डाज्यादिकृतं पक्कं नैव पर्य्युषितं भवेत्" ।

इति । सोऽयं संक्षेपतः शास्त्रार्थः । विस्तरस्तु तन्त्रान्तरादुपलब्धव्यः ॥ ० ॥ १० ॥ ० ॥

न वर्षति धावेत् ॥ ११ ॥

वर्षति पर्ज्जन्ये न धावेत् न त्वरितं गच्छेत् ॥ ० ॥ ११ ॥ ० ॥

नोपानहौ स्वयं हरेत् ॥ १२ ॥

स्वयमुपानहौ न हरेत् ;—पादव्यतिरेकेण हस्तादिना देशान्तरं न प्रापयेत् । स्वयमितिकरणात् आत्मीयावेवोपानहौ न हरेत्, आचार्य्यादीनामुपानहौ हरन्नपि नापराध्यते,—इत्यभिप्रायः ॥ ॥ ० ॥ १२ ॥ ० ॥

नोदपानमवेक्षेत् ॥ १३ ॥

उदकं पीयते यस्मादित्युदपानं कूपः, तं नावेक्षेत् अवाचीनं न पश्येत् ॥ ० ॥ १३ ॥ ० ॥

न फलानि स्वयं प्रचिन्वीत ॥ १४ ॥

स्वयमात्मना फलानि न प्रचिन्वीत, प्रत्यर्थं—हस्तमारुह्य नाहरेत् ॥ ० ॥ १४ ॥ ० ॥

नागन्धाꣳ स्रजं धारयेत् ॥ १५ ॥

गन्धः शोभनोऽभिप्रेतः । स नास्ति यस्याः सेयमगन्धा । तां स्रजं न धारयेत् ० ॥ १५ ॥ ० ॥

किं सर्व्वामेव ? न । कतमां तर्हि ?—

अन्याꣳ हिरण्यस्रजः ॥ १६ ॥

हिरण्यस्रजः सुवर्णमालायाः अन्यामगन्धां स्रजं न धारयेत् । हिरण्यस्रजन्त्वगन्धामपि धारयेदित्यर्थः ॥ ० ॥ १६ ॥ ० ॥

न मालोक्ताम् ॥ १७ ॥

मालाशब्देनोक्तां कामपि स्रजं न धारयेत् ॥ ० ॥ १७ ॥ ० ॥

मालोक्तान्तर्हि स्रजं त्यजेदेव ? न । किन्तर्हि कुर्य्यात् ?—

स्रगिति वाचयेत् ॥ १८ ॥

यां स्रजं मालाशब्देन वक्ति स्म, तां स्रगिति वाचयेत्,—ततो धारयेदित्यर्थः ॥ ० ॥ १८ ॥ ० ॥

भद्रमित्येतां वृथावाचं परिहरेत् ॥ १९ ॥

भद्रं कल्याणमित्यनर्थान्तरम्। भद्रमित्येतामेवम्भूतां वृथावाचम् असत्यां वाणीं परिहरेत्। तां न वदेदित्यर्थः। किमनेनोक्तं भवति ? एतदनेनोक्तं भवति। "नाभद्रमभद्रं ब्रूयात् पुण्यं प्रशस्त-मिति ब्रूयात्" – इति, "अभद्रं भद्रमिति"—इति चैवमादिवच-नादभद्रे भद्रवदनं केषाञ्चिदाचार्य्याणामनुमतम्। तदेतन्मनागपि मिथ्यावचनाद्बिभ्यता आचार्य्येण प्रतिषिध्यते,—'भद्रमित्येतां वृथा-वाचं परिहरेत्'—इति। भद्रे खलु भद्रशब्दो यथार्थवचनः स्यात्। अभद्रे तु भद्रशब्दो वृथैव भवत्ययथार्थोऽनृतं मिथ्येत्येकोऽर्थः। तस्मादेतत् परिहरेत्,—इत्याचार्य्यस्य मतम्। कस्मात् कार-णात् ? अनृतवदनदोषप्रसङ्गात्। यथार्थे वाङ्मनसे हि सत्य-माचक्षते। तदेव वक्तव्यम्। अभद्रं भद्रमिति वदतस्त्वन्यद्वाचि मनसि चान्यत् स्यात्। प्रशंसानिन्दावचनपक्षनिक्षिप्तत्वाच्चैवमादेः। तथाच स्मरणम्।

> "सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।
> प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः"।

इति।

> "चक्षुष्मानिति लुप्ताक्षं चण्डालं ब्राह्मणेति च।
> प्रशंसानिन्दनं द्वेषात् परुषान्न विशिष्यते"।

इति चैवमादि ॥ ० ॥ १९ ॥ ० ॥

अतो यद्भद्रं तदेव,—

भद्रमिति ब्रूयात् ॥ २० ॥

भद्रमित्येवमादिना पर्य्यायशब्देन ब्रूयात्, भद्रमित्येव वा ब्रूयात्। तदाह मनुः।

"भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत्"।

इति। भद्रं भद्रवदनस्यार्थत एव सिद्धत्वात् यत् पुनर्भद्रमिति करोति, तद्बोधयति;—भद्रमेव भद्रमिति ब्रूयान्नाभद्रम्—इति। तस्मात् समीचीनमुक्तमाचार्य्येण,—'भद्रमित्येतां वृथावाचं परिहरेत्'—इति। अन्ये त्वेवं वर्णयन्ति। 'भद्रं कल्याणम्। भद्रमिति ब्रूयात्, न तु परुषवचनेन। अनेनैतद्दर्शयति। सत्यमप्यप्रियं न वक्तव्यमिति' ॥ ० ॥ २० ॥ ० ॥

इदानीं स्नातकान् विभजते,—

तत्रैते त्रयः स्नातका भवन्ति ॥ २१ ॥

तत्र तस्मिन् प्रकृतव्रते एते वक्ष्यमाणाः त्रयः स्नातका भवन्त्यधिकारिणः ॥ ० ॥ २१ ॥ ० ॥

के पुनस्ते ? उच्यते,—

विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ॥
॥ २२ ॥

इत्येते त्रयः स्नातका नामतो निर्दिष्टाः। यः खल्वापत्कल्पत्वात् यथोक्तकालानां व्रतानां सम्यगनुष्ठानमकृत्वा, 'ग्रहणान्तिकमेव वा'—इति वचनाद्ग्रहणान्तिकेनैव ब्रह्मचर्य्येण वेदमधीत्य स्नाति, सोऽयं विद्यास्नातकः। यश्च, यथोक्तकालिकानि व्रतान्यनुष्ठाय

वेदन्तु समग्रमनधीत्यैव स्नाति, स खल्वयं व्रतस्नातकः। यः पुन-र्यथोक्तकालिकानि व्रतान्यनुष्ठाय वेदमपि समग्रमधीत्य स्नाति, असौ विद्याव्रतस्नातकः। तथाच हारीतः। "यः समाप्य वेदमसमाप्य व्रतानि समावर्त्तते स विद्यास्नातकः। यः समाप्य व्रतान्यसमाप्य वेदं समावर्त्तते स व्रतस्नातकः। उभयं समाप्य समावर्त्तते यः स विद्याव्रतस्नातकः"—इति। याज्ञवल्क्योऽप्याह।

"वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा"।

इति। अन्ये तु,—'नियमेनाधीतं वीर्य्यवत्तरं भवति,—इति ब्राह्मणवाक्यम्—

"आ हैव स नखाग्रेभ्यः परमं तप्यते तपः।

यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्"।

इति मनुवचनञ्च,—आलोचयन्तः, विनाऽपि ब्रह्मचर्य्यमधीत्य वेदं यः स्नाति, सोऽपि विद्यास्नातको भवति'—इति मन्यन्ते ॥ ० ॥ ॥ २२ ॥ ० ॥

तेषामुत्तमः श्रेष्ठस्तुल्यौ पूर्व्वौ ॥ २३ ॥

तेषां त्रयाणां स्नातकानां मध्यात् उत्तमः प्रथममध्यमभिन्नः विद्याव्रतस्नातकः—इत्येतत्। उत्तरः—इति पाठेऽपि तथैवार्थः। स श्रेष्ठः प्रशस्यतमः। पूर्व्वौ द्वौ विद्यास्नातकव्रतस्नातकौ तुल्यौ समानौ।

आह। कस्मात् पुनः कारणात् स्नातकविवेकात् पुरस्ताच्चोपरिष्टाच्च व्रतान्युपदिश्यन्ते ?;—ननु प्रागेव स्नातकव्रतोपदेशात्

पश्चादेव वा, तेषां विवेकः कर्त्तुमुचितः। उच्यते। स्नातकविवेकात् पुरस्ताच्चोपरिष्टाच्च स्नातकव्रतोपदेशः,--तेषामिव स्नातकप्रकरणात् पुरस्ताच्चोपरिष्टाच्चोपदिष्टानामविरोधिनामन्येषामपि धर्म्माणां प्राप्तिप्रज्ञापनार्थः। किमनेनोक्तं भवति? एतदनेनोक्तं भवति। ये खल्वस्य पूर्व्वाश्रमिणो ब्रह्मचारिणः ये चोत्तराश्रमिणो वैखानसभिक्षवः,--तेषामपि ये धर्म्माः सत्यवचनक्रोधपरिहारेन्द्रियसंयमादयः, दयाप्रभृतयः,—

"दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्"।

इत्येवमादयश्च स्नातकस्य न विरुध्यन्ते, तेष्वप्ययमधिकरोति--इति। ये तु विरुध्यन्ते योषिद्गमनप्रतिषेधादयः, तेषु पुनर्नाधिकरोत्येव। तथा गौतमेनापि ब्रह्मचारिधर्म्मोपदेशावसाने "उत्तरेषाञ्चैतदविरोधि"—इति सूत्रयता एतदेवोक्तम्। अस्य खल्वयमर्थः। एतदविरोधि ब्रह्मचारिधर्म्मजातम् उत्तरेषां गृहस्थादीनामपि, चशब्दात् अविरोधि यदुत्तरेषां धर्म्मजातं तत् पूर्व्वेषामपि,—इति। अलमतिप्रसङ्गेन ॥ ० ॥ २३ ॥ ० ॥

प्रकृतं स्नातकव्रतमेव पुनरनुवर्त्तामहे,—

नार्द्रं परिदधीत ॥ २४ ॥

आर्द्रं जलक्लिन्नं वासो न परिदधीत ॥ ० ॥ २४ ॥ ० ॥

नैकं परिदधीत ॥ २५ ॥

एकं वासो न परिदधीत। एकवासाः न स्यादित्यर्थः। तदनेनो-

त्तरीयमप्यस्य वासः—इत्यवगम्यते । एवमेके । अन्ये तु,—अन्तर्वासोविधानम्—इच्छन्ति । कस्मात् ? परिदधीत—इति पुनर्व्वचनात् । परिदधीत—इति खल्वनुवर्त्तत एव, यदत्र पुनः करोति तदधःपरिधानमेवैकस्य वाससोनिषिध्यते,—इति द्योतयति । प्रायेण हि परिदधातिरधःपरिधानमेव बोधयति । तस्मात् वासोद्वयमेव अधः परिदधीत । उत्तरीयन्तु अतोऽपि पृथक् । तथाच स्मृत्यन्तरम् ।

"जलतीरं समासाद्य तत्र शुक्ले च वाससी ।
परिधायोत्तरीयञ्च कुर्य्यात् केशांश्च धूनयेत्" ।

इति ।

"स्नातकानान्तु नित्यं स्यादन्तर्वासस्तथोत्तरम्"

इति चैवमादि । न चैवमपि बहुवासस्त्वदोषशङ्का कर्त्तव्या । कुतः ?

"नाभेरधःकृते सम्यङ् न दोषो बहुवाससाम्" ।

इति स्मरणात् ॥ ० ॥ २५ ॥ ० ॥

न मनुष्यस्य स्तुतिं प्रयुञ्जीत ॥ २६ ॥

प्रकर्षेण गद्यपद्यादिना कस्यापि मनुष्यस्य स्तुतिं न कुर्य्यात् ॥ ० ॥ ॥ २६ ॥ ० ॥

नादृष्टं दृष्टतोब्रुवीत * ॥ २७ ॥

* ब्रूयात्—इति पाठान्तरम् ।

दृष्टः:—इति सार्व्वविभक्तिकस्तसिल्। यदृष्टं यत्, तत् दृष्टमिति न कथयेत् ॥ ० ॥ २७ ॥ ० ॥

नाश्रुतं श्रुततः ॥ २८ ॥

पूर्वसूत्रव्याख्यानेनैव व्याख्यातमेतत् ॥ ० ॥ २८ ॥ ० ॥

स्वाध्यायविरोधिनोऽर्थानुत्सृजेत् ॥ २९ ॥

स्वाध्यायोवेदाभ्यासः। स च स्वीकारविचाराऽभ्यसनजपदानभेदात् पञ्चविधः। स्वाध्यायं विरुन्धन्ति इति स्वाध्यायविरोधिनः। तान् स्वाध्यायविरोधिनः अर्थान् व्यापारान् उत्सृजेत् त्यजेत् ॥ ० ॥ २९ ॥ ० ॥

तैलपात्रमिवात्मानं दिधारयिषेत् ॥ ३० ॥

तैलपूर्णं पात्रं यथा स्फुटनचलनविपर्य्यासमक्षिकाकाकादिदूषणादिभ्यो यत्नातिशयेन रक्ष्यते, तथैवात्मानं स्वशरीरमपि दिधारयिषेत् सर्वापद्भ्योरक्षितुमिच्छेत्। स्वर्गापवर्गसाधनः खल्वयमात्मा,—इति यत्नातिशयेन तद्रक्षणं कर्त्तुमुपदिदिक्षुराचार्य्यो लौकिकानां सुखावबोधार्थं लौकिकमेव दृष्टान्तमुरीचकार ;—तैलपात्रमिव—इति। अतएव, धारयेत्—इति वक्तव्ये दिधारयिषेत्—इत्युक्तम् ; —मनसाऽपि शरीरापकारं कर्त्तुं नेच्छेदित्येवमर्थम्। तै

खल्वनेके शरीरापकारहेतवो न शक्याः प्रतिपदं परिकीर्त्तयितुमिति संक्षेपत एतत् सूत्रितम् ॥ ० ॥ ३० ॥ ० ॥

न वृक्षमारोहेत् ॥ ३१ ॥

ऋज्वर्थं सूत्रम् ॥ ० ॥ ३१ ॥ ० ॥

न प्रतिसायं ग्रामान्तरं व्रजेत् ॥ ३२ ॥

प्रतिसायं सायं प्रति सन्धिवेलायाम्—इत्येतत्। तथाच मनुः।

"नाश्नीयात् सन्धिवेलायां न गच्छेन्नापि संविशेत्"।

इति। स्पष्टमन्यत् ॥ ० ॥ ३२ ॥ ० ॥

नैकः ॥ ३३ ॥

ग्रामान्तरं व्रजेत्—इत्यनुवर्त्तते ॥ ० ॥ ३३ ॥ ० ॥

न वृषलैः सह ॥ ३४ ॥

वृषलैः,—

"न शूद्रो वृषलो नाम वेदो हि वृष उच्यते।
यस्य विप्रस्य तेनालं स वै वृषल उच्यते"।

इत्युक्तलक्षणैः, शूद्रैर्वा, सह न ग्रामान्तरं व्रजेत्। तैश्च केवलैरेव सह, न संमिश्रैरपि—इति बोद्धव्यम्। कुतः? निरपेक्षश्रवणात् ॥ ० ॥ ३४ ॥ ० ॥

न कास्तृत्या ग्रामं प्रविशेत् ॥ ३५ ॥

सृतिः पन्थाः। ईषत् सृतिः कासृतिः, अल्पः पन्था भण्यते। तया-ग्रामं न प्रविशेत्। महति पथि विद्यमानेऽपि स्वल्पेन पथा गच्छन्तं समुपजातशङ्का लोकाः कदाचिदपहन्युरपि—इत्यभिप्रायः। अपरे त्वेवं व्याकुर्व्वते। 'कुत्सिता सृतिः कासृतिः। तया ग्रामं न प्रविशेत्। ग्रामशब्दो गृहस्याप्युपलक्षणार्थः। तथाच मनुः।

"अपद्वारेण नातीयाद्ग्रामं वा वेश्म वा हतम्"।

इति ॥ ० ॥ ३५ ॥ ०॥

न चाननुचरश्चरेत् ॥ ३६ ॥

अनुचरति,—इत्यनुचरः परिचारको भण्यते। नास्यनुचरो यस्य सोऽयमननुचरो न चरेत् न गच्छेत्। चशब्दादविनीतानुचरश्च न चरेत्। ननु 'नैकः'—इत्यनेनैव गतार्थत्वादेतदवाच्यम्। मैवम्। पादसंवाहनादिकमप्यनुचरणम्—परिचर्य्यां यो न करोति, तं विना न चरेदित्यस्यात्र विशेषत्वात्। अथवा। तत्र, ग्रामान्तरमेको-न गच्छेदित्युक्तम्। अत्र तु स्वग्रामेऽप्यल्पमपि पन्थानमननुचरो-न चरेदित्ययमर्थः॥ ० ॥ ३६ ॥ ० ॥

एतानि समावृत्तव्रतानि ॥ ३७ ॥

समावृत्तस्य व्रतानि समावृत्तव्रतानि। समावृत्तः—इति कर्त्तरि

निष्ठा। कः पुनरसौ? विधिवत् स्नात्वा गुरुणा लब्धानुज्ञः तद्-गृहात् स्वगृहं प्रति सम्यगावृत्तः—स्वगृहमागतो यः, सोऽयं -समावृत्तः स्नातकशब्दाख्यायते। तस्यैतानि वक्ष्यमाणानि व्रतानि भवन्ति। व्रतशब्दोपादानात्,—अजातलोम्न्या सह अनुपहासः कर्त्तव्यः,—इत्येवमादिको नियमः कर्त्तव्यतया चोद्यते। व्रतं नियमः—इति ह्यनर्थान्तरम्। अनुपहासस्योपहासाभावः। न च तस्य कर्त्तव्यता अस्ति। तस्मात् यस्तत्र मानसो व्यापारः अजातलोम्न्या सह उपहासो मया न कर्त्तव्यः—इत्येवमादिरूपः, स इह उपदिश्यते। तस्य च परिपालनम्।

सोऽयं नियमः प्रजापतिव्रतवत् कर्त्तव्यतया चोद्यते,—इति कल्याणोदयो भवति। कर्त्तव्यो हि कल्याणोदयः,—इत्याचार्या मन्यन्ते। व्रतस्य खल्वस्याकरणे व्रतफलादेव परं पुरुषो-हीयते, न पुनर्निषेधातिक्रमवत् प्रत्यवायमप्यधिगच्छति। यथा खल्वादित्यव्रते सत्यपि "नोद्यन्तमादित्यमीक्षेत"—इति वचने, "आदित्यं पश्यन्नातिक्रामति विधिम्। न हि तस्य दर्शनं प्रति-षिद्धम्, नियमस्तत्रोपदिष्टः। यस्तं नियमं करोति स फलेन सम्बध्यते"—इति भगवता भाष्यकारेण शबरस्वामिना षष्ठाध्याये सिद्धान्तितम्। तद्वदत्राप्यवगन्तव्यम्।

यः पुनर्नियमं कुर्वाणोऽपि न तं परिपालयति, स तु प्रत्य-वैति। सत्यसङ्कल्पः खल्वेवमसौ न स्यात्। आरब्धकाम्यकर्म्मा इव पुरुषस्तस्य परिसमाप्तिमकुर्वन्। तस्मात् नियमं कुर्वाणेन तस्य परिपालनमप्यवश्यं कर्त्तव्यम्। अपरिपालयन् व्रतमयं

लोपयति,—इति तत्कृतमस्य प्रायश्चित्तं भवति। न पुनः कलञ्ज-भक्षणादिवन्निषेधातिक्रमात्। तथाच मनोः स्मरणम्।

"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्" ॥

इति। स्नातकव्रतलोपे च,—इति पुनः कुर्व्वन् नित्यत्वमेषां नानुजानाति। अनित्यानाञ्चोपक्रान्तानामेव परमतिक्रमे प्रायश्चित्तमिष्यते। अतएव स्नातकव्रतोपक्रमे तेनैवोक्तम्।

"स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत्"।

इति। तथोपसंहारेऽपि।

"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती।
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः।
अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित्।
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते"।

इति। अत्र, वृत्तिः शाश्वती – नित्या, स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः—इति व्यक्तममीषामनित्यत्वम्। गौतमोऽपि स्नातकव्रतान्यभिधाय, "एवमाचारो मातापितरौ पूर्व्वापरान् संबन्धान् दुरितेभ्यो मोचयिष्यन् स्नातकः शश्वद्ब्रह्मलोकान्न च्यवते"—इत्युपसंहरन्नेतदेवाह। तत्र च, कस्यचित् स्नातकव्रतमध्यपठितस्यापि पृथक्प्रतिषेधसम्भवात् व्रताकरणेऽपि नित्यवत् परिपालनं बोद्धव्यम्। यथा वृथावचनपरिहारो यद्यपि स्नातकव्रतेषु पठ्यते, तथापि मिथ्यावदनस्य पृथक् प्रतिषिद्धत्वात् स्नातकव्रतान्यननुतिष्ठताऽपि नैव मिथ्या वदितव्यम्। एवमन्यत्रापि यथासम्भवमूहनीयम्।

यदि पुनरनित्यत्वेऽप्यमीषामकरणे वाचनिकं प्रायश्चित्तमित्युच्यते। तदा, 'अजातलोम्न्या सह उपहासो मया न कर्त्तव्यः' —इत्येवमादिकस्य सङ्कल्पस्याकरण एव प्रायश्चित्तम्, न पुनरजातलोम्न्या सहोपहास एव,—इति स्यात्। परमकरणेऽपि प्रायश्चित्ताभ्युपगमे कीदृशममीषामनित्यत्वम्?—इत्ययं पर्य्यनुयोगः समाधेयः ॥ ० ॥ ३७ ॥ ० ॥

यानि च शिष्टा विदध्युः ॥ ३८ ॥

यानि शिष्टा विदध्युः—वेदशास्त्राविरोधेन तर्कबलेन कुर्य्युः, तानि च समावृत्तव्रतानि। चशब्दात् यानि तन्त्रान्तरसिद्धानि तानि च ॥ ० ॥ ३८ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य पञ्चमी खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

तृतीयप्रपाठके षष्ठी खण्डिका।

केचित् यज्ञाः पूर्व्वमुक्ताः, केचिच्च वक्ष्यन्ते। ते खल्वाज्यादि-हविःसाध्याः, तानि च गवामायत्तानि, गावश्च परिपुष्टा एव हवींषि दातुं प्रभवन्ति। अतः सर्व्वयज्ञसाधनभूतानां गवांपुष्टि-कर्म्म वक्तव्यम्। तत्र तावद्गवाश्रयं किञ्चित् कर्म्मोपदिशत्युत्त-रार्थम्—

गाः प्रकाल्यमाना अनुमन्त्रयतेमा मे विश्वतो-वीर्य्य इति॥ १॥

प्रकाल्यमानाः तृणचरणाय गृहान्नीयमानाः गाः अनुमन्त्रयेत, इमा मे—इति मन्त्रेण। तदिदमनुमन्त्रणं गवां गृहान्निष्क्रमण-काले कर्त्तव्यम्॥ ०॥ १॥ ०॥

प्रत्यागता इमा मधुमतीर्मह्यमिति॥ २॥

प्रत्यागताः सायं गृहमागताः गाः, इमा मधुमतीरिति मन्त्रेणानु-मन्त्रयेत॥ ०॥ २॥ ०॥

अथेदानीं गवां पुष्टिकर्म्माह,—

पुष्टिकामः प्रथमजातस्य वत्सस्य प्राङ्मातुः प्रलेह-नाज्जिह्वया ललाटमुल्लिह्य निगिरेद्गवाᳪ श्लेष्मासीति॥ ३॥

पुष्टिः पोषः उपचयः,—इत्यनर्थान्तरम्। तां कामयते इति पुष्टिकामः। अधिकाराद्गवामेव। सा खल्वियं पुष्टिरविशेषात् शरीरस्य संख्यायाश्च बोद्धव्या। वर्षासु प्रायेण गावः प्रसूयन्ते, तदानीं जातानां वत्सानां मध्ये यः प्रथमं पूर्व्वं,—प्रथमः पूर्व्वो-वा जायतेस्म, सोऽयं प्रथमजातः, तस्य वत्सस्य, प्राक् पूर्व्वं मातुः प्रलेहनात्,—(प्रलेहनमास्वादनम्) यावन्न माता वत्सं प्रलेढ़ि, तावत्तस्य ललाटं जिह्वया रसनया तूष्णीमुल्लिह्य आ-स्वाद्य गवां श्लेष्मासीतिमन्त्रेण निगिरेत्। सामर्थ्यान्मनसैव मन्त्रः पठनीयः। केचित् पुनरेतदादीनां त्रयाणामपि पुष्टिकर्म्मणां वसन्तादारभ्य मासत्रयं करणमिच्छन्ति। तदसङ्गतम्। कुतः? वर्षास्वेव बाहुल्येन गवां प्रसवोपलम्भात् तत्रैव कर्म्मसमुचितत्वात्। तथा चोक्तम्।

"ललाटलेहनादीनि गवां कर्म्माणि पुष्टये।
वर्षासु त्रीणि कार्य्याणि भूयस्तत्प्रसवा हि ताः"।

इति ॥ ० ॥ ३ ॥ ० ॥

पुष्टिकाम एव संप्रजातासु निशायां गोष्ठेऽग्निमुप-समाधाय विलयनं जुहुयात् संग्रहणसंग्रहाणेति ॥४॥

पुष्टिकाम एव गवामित्यर्थः। सम्प्रजातासु,—सर्व्वासु गोषु प्रसू-तासु, निशायां रात्रौ, गोष्ठे गवां स्थाने, अग्निमुपसमाधाय संग्रहणेतिमन्त्रेण जुहुयात्। ननु, अग्निमुपसमाधाय,—इत्येतदवा-च्यम्? जुहोतिचोदनाबलादेव खल्वग्निरवगम्यते। नैष दोषः।

कस्मात् ? यस्मात् एतद्वचने जलहोमादिवत् गोष्ठएवायं होमः स्यात् न पुनरग्नौ। तथाप्युपसमाधाय—इत्यनर्थकम् ? न। अग्निमुपसमाधायैव जुहुयात् नाग्न्यायातनं कुर्यादित्येव-मर्थत्वात्तस्य। तेन क्षिप्रहोमः स्यात्। किं जुहुयात् ? विल-यनम्। विलयनशब्देन घृतनिस्यन्दनमर्द्धमथितं दधि चोच्यते। तथाचोक्तम्।

"दध्यर्द्धमथितं सर्व्वं तद्दै विलयनं स्मृतम्।
घृतनिस्यन्दनञ्चात्र क्षिप्रमेका तयाऽऽहुतिः"।

इति। द्रवद्रव्यकत्वात् स्रुवेणायं होमः स्यात्। एका चाहुतिः॥ ॥ ० ॥ ४ ॥ ० ॥

पुष्टिकाम एव संप्रजातास्वौदुम्बरेणासिना वत्स-मिथुनयोर्लक्षणं करोति पुंसएवाग्रेऽथ स्त्रिया भुव-नमसि साहस्रमिति ॥ ५ ॥

पुष्टिकाम एव सम्प्रजातास्वित्युक्तार्थम्। औदुम्बरेण ताम्रमयेन, न काष्ठमयेन। कस्मात् ? 'लोहितेन स्वधितिना'—इति मन्त्र-लिङ्गात्। न हि काष्ठमयोऽसिर्लोहितो भवति। सामर्थ्याच्च। ताम्रमयः खल्वसिर्लक्षणकरणे समर्थो न काष्ठमयः। असिना क्षुरेण। कुतः ? 'लोहितेन स्वधितिना'—इति मन्त्रलिङ्गा-देव। चूडाकरणे किल स्वधितिशब्दः क्षुरे प्रयुक्तः। 'स्वधिते मैनंहिंसीः'—इति। एवमेके। असिना खड्गेन—इत्य-

परे। कस्मात्? असिशब्दस्य तदर्थत्वात्। न च मन्त्रलिङ्गात् क्षुरः—इति युक्तं वक्तुम्। किं कारणम्? लिङ्गमपेक्ष्य श्रुतेर्बलवत्त्वम्। न खलु लिङ्गानुरोधात् श्रुतिरुत्स्रष्टुं युज्यते। अतएव, "धान्यमसीति तण्डुलानावपति",—इत्यत्र मन्त्रस्य एव धान्यपदे तण्डुललक्षणा, न तु तण्डुलपदस्य धान्यपरत्वम्—इति सिद्धान्तः। तद्वदत्रापि स्वधितिपदस्यैव वरं खड्गपरता स्यात्, न पुनरुत्पत्तिशिष्टस्यासिपदस्य स्वधितिपरता।

वत्समिथुनयोः। मिथुनं स्त्रीपुंसौ। वत्सयोर्मिथुनं वत्समिथुनं तयोः वत्समिथुनयोः। यावन्ति वत्समिथुनानि सन्ति तावतामेव। द्विवचनकरणात् द्वयोर्द्वयोर्लक्षणं कर्त्तव्यम्। कथं नाम? एकस्य वत्समिथुनस्य लक्षणं कृत्वा पुनरन्यस्य करणीयम्। एवमपरापरस्यापि। लक्षणं करोति। लक्ष्यतेऽनेनेति लक्षणं चिह्नं करोति। कुत्र प्रदेशे करोति? कर्णयोः। कस्मात्? 'मिथुनं कर्णयोः कृतम्'—इति मन्त्रलिङ्गात्।

केन क्रमेण करोति? उच्यते। पुंस एवाग्रेऽथ स्त्रियाः। अग्रे आदितः पुंस एव वत्सस्य लक्षणं करोति, अथानन्तरं स्त्रियावत्साया लक्षणं करोति। एतदनेनोक्तं भवति। एकस्य वत्सस्य द्वयोरपि कर्णयोर्लक्षणं कृत्वा, अथ एकस्या वत्साया द्वयोरपि कर्णयोः कर्त्तव्यम्। ततोऽपरस्य वत्सस्य अपरस्याश्च वत्सायाः। एवमन्येषामपि। कस्मात् पुनः कारणादेवमवगम्यते, सर्व्वेषामेव वत्सानां लक्षणमादितः कृत्वा परतः सर्व्वासां वत्सिकानामेव कुतो-न क्रियते? उच्यते। वत्समिथुनयोरिति द्विवचनोपन्यासस्यार्थवत्त्वार्थमेवमवगच्छामः। द्विवचनकरणात् खल्वेकस्य वत्सस्यैकस्याश्च

वत्साया लक्षणकरणमवगम्यते। अन्यथा वत्समिथुनानाम्—इत्येव कुर्य्यात्। तदिदं द्विवचनं मिथुनस्यैकत्वात् मिथुनावयवौ स्त्रीपुंसावपेक्ष्य द्रष्टव्यम्। एवकाराथशब्दयोस्तोपादानात्। अग्रे पुंस एवेति करणात् खलु स्त्रियमेवापेक्ष्य पुंसोऽग्रत्वमवगम्यते। तत्र यदि सर्व्वेषां वत्सानामादितो लक्षणं क्रियते, तदा पुंसोऽप्यग्रे पुंसो-लक्षणं स्यात् न स्त्रिया एव। एवमथ स्त्रियाः—इति करणात् पुंस एव लक्षणकरणात् परतः स्त्रियालक्षणकरणं प्रतीयते। सर्व्वासां वत्सिकानां परतो लक्षणकरणे च स्त्रिया अपि परतः स्त्रियालक्षणकरणं स्यात् न पुंस एव परतः। तदिदमेकैक-मिथुनाभिप्रायं वचनम्। अपि च। पुंस एवाग्रेऽथ स्त्रियाः—इति वचनात् एकवचनसंयोगाच्च एकस्य पुंसो लक्षणकरणानन्तरमेवै-कस्याः स्त्रियाः लक्षणकरणमवगम्यते। अवगम्यते चेत्, न युज्यते विना कारणमुत्स्रष्टुम्। तस्मात् यथोक्त एवार्थः। अन्ये तु, 'पुंस एव-वाग्रेऽधः स्त्रियाः'—इति पठन्ति। कर्णस्याग्रप्रदेशे पुंसोऽधः प्रदेशे च स्त्रिया लक्षणं करोति—इति व्याचक्षते च। केन मन्त्रेण लक्षणं करोति? भुवनमसि—इति मन्त्रेण। प्रतिकर्णं मन्त्रा-वृत्तिर्बोद्धव्या। कस्मात्? "भेदे मन्त्रावृत्तिः"—इति सूत्रा-न्तरात्॥ ०॥ ५॥ ०॥

कृत्वा चानुमन्त्रयेत लोहितेन स्वधितिनेति॥ ६॥

लक्षणं कृत्वा लोहितेनेति मन्त्रेण अनुमन्त्रयेत। कृत्वा—इति करणात् सर्व्वेषां लक्षणकरणात् परतोऽनुमन्त्रणम्। चशब्दः क्रम-

विशेषणार्थः। कथं नाम? येनैव क्रमेण लक्षणकरणं तेनैव क्रमेणानुमन्त्रणम्—इति। प्राजापत्यपशूनां येनैव क्रमेणाञ्जनं तेनैव क्रमेणाभ्यञ्जनमितिवत्। तस्मात् प्रतिकर्ण्णमेवानुमन्त्रणं स्यात्। मन्त्रावृत्तिश्च ॥ ० ॥ ६ ॥ ० ॥

तन्तीं प्रसार्य्यमाणां बद्धवत्साञ्चानुमन्त्रयेतेयं तन्ती गवां मातेति ॥ ७ ॥

तन्ती वत्सबन्धनदाम। तन्तीं—इति केचित् पठन्ति। तामपराह्णे वत्सबन्धनाय प्रसार्य्यमाणामनुमन्त्रयेत—इयं तन्तीति मन्त्रेण। बद्धवत्साञ्च। बद्धो वत्सो यया, तां बद्धवत्सामपि तन्तीमनुमन्त्रयेत तेनैव मन्त्रेण। तदिदमनुमन्त्रणद्वयं बोद्धव्यम् ॥ ० ॥ ७ ॥ ० ॥

तत्रैतान्यहरहः कृत्यानि भवन्ति ॥ ८ ॥

तत्र तस्मिन् काम्ये कर्म्मणि एतानि वक्ष्यमाणसूत्रोद्दिष्टानि अहरहः कृत्यानि प्रतिदिनं कर्त्तव्यानि भवन्ति ॥ ० ॥ ८ ॥ ० ॥
कानि पुनस्तानि? उच्यते,—

निष्कालनप्रवेशने तन्तीविहरणमिति ॥ ९ ॥

निष्कालनं पूर्व्वोक्तं गाः प्रकाल्यमाना इति, प्रवेशनमपि पूर्व्वोक्तं प्रत्यागता इति, तन्तीविहरणमनन्तरोक्तमित्येतानि ॥ ० ॥ ९ ॥ ० ॥

गोयज्ञे पायसश्चरुः ॥ १० ॥

गवां पुष्टिकामस्याग्न्यादीनां यजनं गोयज्ञः। तस्मिन् गोयज्ञे

पायसः पयसि भवः चरुः स्थालीपाकः कर्त्तव्यः इति सूत्रशेषः॥
॥०॥ १०॥०॥
तेन च चरुणा,—

अग्निं यजेत पूषणमिन्द्रमीश्वरम्॥ ११॥

यजेत इत्यस्य प्रत्येकमन्वयः। असमासकरणं निर्व्वापहोमयोः पृथक्त्वप्रज्ञापनार्थम्। पूष्णोऽप्यत्र तण्डुलचरुरेव भवति। कस्मात्? अग्नीन्द्रेश्वरसामान्यात्। तथाचोक्तम्—

"यद्यप्यदन्तकः पूषा पिष्टमत्ति सदा चरुम्।
अग्नीन्द्रेश्वरसामान्यात् तण्डुलोऽत्र विधीयते"।

इति॥०॥ ११॥०॥

ऋषभपूजा॥ १२॥

ऋषभोऽनड्वान्। तस्य पूजा—गलशृङ्गादावाभरणप्रदानेन यवसदानादिना च सत्कारो गोयज्ञे कर्त्तव्यः॥०॥ १२॥०॥
प्रसङ्गात् भूयसा साधर्म्म्याच्च गोयज्ञविध्यतिदेशेनैवाश्वयज्ञमप्युपदिशति,—

गोयज्ञेनैवाश्वयज्ञो व्याख्यातः॥ १३॥

ऋजुरक्षरार्थः। स खल्वयमश्वयज्ञो विद्यमानाश्वेनाश्वपुष्टिकामेन कर्त्तव्यः, न येन केनचित्, नाप्यश्वमुत्पाद्य,—इति बोद्धव्यम्। पायसचरुणा पूर्व्ववदत्राग्न्यादयो यष्टव्याः॥०॥ १३॥०॥
अयं पुनरत्र विशेषः,—

यमवरुणौ देवतानामन्वाधिकौ ॥ १४ ॥

देवतानामिति सम्बन्धलक्षणा षष्ठी। अत्राश्वयज्ञे गोयज्ञनिर्दिष्टानां देवतानां यमवरुणौ अधिकौ। यमः पञ्चमो वरुणः षष्ठः। अत्रापि पूर्व्ववत् पृथगेवं निर्व्वापो होमश्च। ऋषभपूजास्थाने चाश्वपूजा बोद्धव्या ॥ ० ॥ १४ ॥ ० ॥

प्रासङ्गिकमभिधायेदानीं पुनर्गोयज्ञशेषमेवाह,—

गन्धैरभ्युक्षणं गवां गन्धैरभ्युक्षणं गवाम् ॥ १५ ॥

सायमागतानां गवां गन्धोदकैरभ्युक्षणमाभिमुख्येनोक्षणं सेचनं कर्त्तव्यम्। द्विर्व्वचनमादरार्थम्। अथवा। द्विर्व्वचनाद्गोयज्ञएव गवामभ्युक्षणम्—इत्यवगम्यते। तस्मादश्वयज्ञेऽयं विशेषो नास्ति। अपि च। गोयज्ञस्य कियतीमावृतं सूत्रयित्वा, अश्वयज्ञमभिधाय, पश्चादपि गोयज्ञस्यावृतं सूत्रयन्नाचार्य्यः,—पूर्व्वसूत्रितामेव गोयज्ञस्यावृतमश्वयज्ञेऽतिदिशति न सूत्रयिष्यमाणामपि—इत्यवधार्य्यते। अन्यथा सर्व्वामेव गोयज्ञस्यावृतं सूत्रयित्वा परस्तादेवाश्वयज्ञे तामतिदिशेत्। तस्मात् क्रमभेदकरणादवगच्छामः,—अश्वयज्ञेऽश्वानामभ्युक्षणं नास्ति—इति। अन्ये तु,—अश्वयज्ञेऽप्यश्वानां गन्धैरभ्युक्षणमिच्छन्ति।

ननु प्रकरणशेषेऽप्यत्र गोयज्ञाश्वयज्ञयोः कालो न श्रूयते, अतस्तयोः कः कालः?—इति वक्तव्यम्। उच्यते। कालान्तरानुपदेशात् परिभाषासिद्ध एवोदगयनादिः कालोऽनयोर्भविष्यति। अथवा। तन्त्रान्तरविधानानुसारात् मार्गपालीदिने गोयज्ञो नीराजनदिने चाश्वयज्ञः स्यात्। तथाच कर्म्मप्रदीपः।

"पारिभाषिक एव स्यात् कालो गोवाजियज्ञयोः ।
अन्यस्यानुपदेशात्तु खसरारोहणस्य च ।
अथवा मार्गपाल्यह्नि कालो गोयज्ञकर्म्मणः ।
नीराजनेऽह्नि चाश्वानामिति तन्त्रान्तरे विधिः" ।

इति । मार्गपालीदिनञ्च सुखरात्रानन्तरा प्रतिपत् । कुतः ? तदधिकारे,—

"ततोऽपराह्णसमये पूर्व्वस्यां दिशि भारत !
मार्गपालीं प्रबध्नीयात् तुङ्गे स्तम्भेऽथ पादपे" ।

इति पुराणवचनात् । नीराजने च कालविकल्पाः श्रूयन्ते । तथा च वराहमिहिरः ।

"द्वादश्यामष्टम्यां
कार्त्तिकशुक्लपक्षस्य पञ्चदश्यां वा ।
आश्वयुजे वा कुर्य्या—
न्नीराजनसंज्ञितां शान्तिम्" ।

इति ॥ ० ॥ १५ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य षष्ठी खण्डिका ॥ ० ॥

———

तृतीयप्रपाठके सप्तमी खण्डिका ।

अथातः श्रवणाकर्म्म ॥ १ ॥

अथशब्दः प्रकरणान्तरोपन्यासार्थः । श्रवणाकर्म्म,—इति कर्म्मणो-नामधेयम् । वर्त्तिष्यते,—इति सूत्रशेषः । अतःशब्दो हेत्वर्थः । यस्मादाहिताग्निरेभिः श्रवणाकर्म्मादिभिर्देवादीनयजमानः अम-रादीन् निराकुरुते निराकृतिरिति चाख्यायते, अतः—एतस्मात् कारणात् श्रवणाकर्म्मादिकमिदानीं वक्तव्यमित्यभिप्रायः । तथा चोक्तम् ।

"यस्त्वाधायाग्निमालस्याद्देवादीनैभिरिष्टवान् ।
निराकर्त्ताऽमरादीनां स विज्ञेयो निराकृतिः" ।

इति ॥ ० ॥ १ ॥ ० ॥

तदिदं श्रवणाकर्म्म,—

पौर्णमास्यां कृत्यम् ॥ २ ॥

पौर्णमास्यां श्रावण्यां, कृत्यं करणीयम् । श्रावण्याम्—इति कुतो-लभ्यते । समाख्यासामर्थ्यादित्याह । श्रवणाकर्म्म—इति समाख्याने श्रूयमाणे श्रावणो मासः खल्वागच्छति हृदयम् । आगच्छति चेत् , न युज्यते विना कारणमुत्स्रष्टुम् । एतस्मात् कारणात्

श्रावण्यां पौर्णमास्यामेतत् करणीयम्। गृह्यान्तरवचनाच्च। तथाच गृह्यान्तरम्। "अथातः श्रवणाकर्म्म" "श्रावण्यां पौर्ण-मास्याम्"—इति ॥ ० ॥ २ ॥ ० ॥

कथं कर्त्तव्यम्? तदभिधीयते,—

पुरस्ताच्छालाया उपलिप्य शालाग्नेरग्निं प्रणयन्ति ॥ ॥ ३ ॥

पुरस्तादग्रतो न पूर्व्वस्यां दिशि। शालाया अन्यागारस्य, (गोमयादिना) उपलिप्य, तत्र शालाग्नेरग्निं प्रणयन्ति लक्षणा-दिभिः स्थापयन्ति। बहुवचनादनियतः कर्त्ता। शालाग्नेरित्य-वयवलक्षणा षष्ठी। तेन, शालाग्नेरेकदेशं प्रणयन्ति न सर्व्वम् ॥ ॥ ० ॥ ३ ॥ ० ॥

अभितश्चत्वार्य्युपलिम्पन्ति ॥ ४ ॥

प्रक्रतत्वात् प्रणीतस्याग्नेरभितः—इतश्चेतश्च चत्वारि स्थानानि उप-लिम्पन्ति। कर्त्तुरनियमः ॥ ० ॥ ४ ॥ ० ॥

किं विदिक्षु? न। किन्तर्हि? उच्यते,—

प्रतिदिशम् ॥ ५ ॥

दिशं दिशं प्रति उपलिम्पन्ति ॥ ० ॥ ५ ॥ ० ॥

कियन्तं देशमुपलिम्पन्ति? तदभिधीयते,—

साधिके प्रक्रमे ॥ ६ ॥

अधिकेन सह वर्त्तमाने साधिके—स्तोकाधिके इत्येतत्। प्रक्रमे—

"संसक्तपदविन्यासस्त्रिपदः प्रक्रमः स्मृतः।
स्मार्त्ते कर्म्मणि सर्व्वत्र श्रौते त्वध्वर्य्यचोदितः"।

इत्युक्तलक्षणे, उपलिम्पन्ति। उपलेपनक्रियाऽऽधारत्वविवक्षया सप्तमीनिर्देशः॥ ०॥ ६॥ ०॥

अग्नौ कपालमाधाय सकृत्संगृहीतं यवमुष्टिं भृज्जत्यनुपदहन्॥ ७॥

प्रकृतेऽग्नौ कपालमाधाय। अथ, अग्नाविति शक्यमवक्तुम्? प्रकृतः खल्वग्निरित्यसौ गम्येत। नैष दोषः। यतोऽभित उपलिप्तस्थानानां सन्निहिततरत्वात् तत्रैव कपालाधानमप्याशङ्कीत कश्चिदिति तन्निरासार्थमग्नावित्याह। कपालम् --

"कपालं मृन्मयं पात्रं चक्राघटितमुच्यते।
आसुरं चक्रघटितं दैवे पैत्रे च वर्ज्जयेत्"।

इत्युक्तलक्षणम्, अग्नौ आधाय अग्नेरुपरि कृत्वा, सकृत्संगृहीतं यवानां मुष्टिं भृज्जति। किं कुर्व्वन्? अनुपदहन्। अदहन्नित्यर्थः। उपेत्ययमुपसर्गः॥ ०॥ ७॥ ०॥

पश्चादग्नेरुलूखलं दृꣳहयित्वाऽवहन्त्युद्धेचम्॥ ८॥

प्रकृतस्याग्नेः पश्चादुलूखलं दृंहयित्वा दृढीकृत्य—निश्चलीकृत्येत्येतत्। प्रकृतान् भृष्टान् यवान् तत्र स्थापयित्वा मुसलेन पूर्व्ववदवहन्ति,- सक्तुनिष्पत्त्यर्थम्। कर्त्तुरनियमः। किं कृत्वा?

उद्देचम्। कृत्वा—इति शेषः। क्रियाविशेषणं वा। उद्देचः पृथग्भावः। "विचिर पृथग्भावे"—इति स्मरणात्। तथाच, भृष्टानां यवानां स्थूलान् सूक्ष्मांश्च पृथक् कृत्वा प्रवहन्ति॥ ०॥ ८॥ ०॥

सुकृतान् सक्तून् कृत्वा चमस ओप्य शूर्पेणापिधाय निदधाति॥ ९॥

सुकृतान् शुभान् सुविहितान् वा, सक्तून् कृत्वा, चमसे दारुमयपात्रविशेषे, ओप्य—आ उप्य सम्यक् स्थापयित्वा, शूर्पेण यथोक्तलक्षणेन अपिधाय आच्छाद्य, निदधाति स्थापयति। कस्मिन्? अन्तर्गृहे। कस्मात्? "अस्तमिते चमसदर्व्यावादाय"—इत्यादिवक्ष्यमाणसूत्रार्थपर्य्यालोचनात्॥ ०॥ ९॥ ०॥

दक्षिणपश्चिमे अन्तरेण सञ्चरः॥ १०॥

अन्तरेण-शब्दो मध्यवचनः। तद्योगात् दक्षिणपश्चिमे—इति द्वितीया। दक्षिणपश्चिमे ये द्वे स्थाने उपलिप्ते, ते अन्तरेण तयोर्मध्यप्रदेशः,—इत्येतत्। सोऽयं सञ्चरः;—सञ्चरत्यनेनेति सञ्चरो-गमनागमनमार्ग इत्यर्थः। स खल्वयं वक्ष्यमाणोपयोगी विधिरिहैव प्रसङ्गादुक्तः। एतावदह्नि कर्त्तव्यम्॥ ०॥ १०॥ ०॥

अस्तमिते चमसदर्व्यावादाय शूर्पञ्चातिप्रणीतस्यार्द्धं व्रजति॥ ११॥

अस्तमिते सवितरि, चमसदर्व्यौ शूर्पञ्च आदाय गृहीत्वा, अति-

प्रणीतस्य,—अतिरुपसर्गः स खल्वयं प्रणीत एवाग्निरतिप्रणीतो-भण्यते । तन्त्रान्तरप्रसिद्धो वा । एवं हि तन्त्रान्तरकाराः स्मरन्ति । "अग्निमुपसमाधाय तस्यैकमुल्मुकं प्राक् दक्षिणा प्रणयेत् ,—ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति पुरापुरो-निपुरो ये भवन्त्यग्निष्टाल्लोकात् प्रणुदात्वस्मादिति, सोऽग्निरति-प्रणीतो भवति"—इति.। तदस्य अतिप्रणीतस्य अग्नेः, अर्द्ध समीपं व्रजति सव्येतरेण गच्छति । अर्द्धशब्दः समीपवचनः ॥ ० ॥ ११ ॥०॥

गत्वा च,—

सूर्पे सक्तूनावपति चमसे चोदकमादत्ते ॥ १२ ॥

पूर्व्वं चमसे स्थापितान् सक्तून् इदानीं सूर्पे आवपति निःक्षिपति, चमसे च उदकं आदत्ते गृह्णाति ॥ ० ॥ १२ ॥ ० ॥

ततश्च,—

सकृत् संगृहीतान् दर्व्या सक्तून् कृत्वा पूर्व्वं उप-लिप्त उदकं निनीय बलिं निवपति; यः प्राच्यां दिशि सर्पराज एष ते बलिरिति ॥ १३ ॥

कतिपयान् सक्तून् दर्व्या बलिहरणार्थं सकृदेकवारं संगृहीतान् कृत्वा, सव्येतरेण प्रदक्षिणं गत्वा उपविश्य पूर्व्वं उपलिप्ते,—पूर्व्वस्यां यत् स्थानमुपलिप्तं तस्मिन् , उदकं चमसस्थं निनीय निषिच्य, बलिं निवपति हरति,—यः प्राच्यां दिशि,—इति मन्त्रेण ॥ ० ॥ १३ ॥ ० ॥

उपनिनयत्यपाꣳ शेषं यथा बलिं न प्रवक्ष्यतीति ॥१४॥

उपशब्दः समीपवचनः। उप समीपे बलेः, निनयति निषिञ्चति निक्षिपति, इत्येतत्। किं निनयति? अपां चमसस्थानां शेषमवशिष्टम्। कथं निनयति? यथा बलिं न प्रवक्ष्यतीति। यथा येन प्रकारेण निक्षिप्तमुदकं बलिं न प्रवक्ष्यति न स्थानान्तरं प्रापयिष्यति, इति तथा निनयतीत्यर्थः ॥ ० ॥ १४ ॥ ० ॥

सव्यं बाहुमन्वावृत्य चमसदर्व्यावभ्युत्य प्रताप्यैवं दक्षिणैवं प्रतीच्यैवमुदीची यथालिङ्गमव्यावर्त्तमानः ॥ ॥ १५ ॥

'सव्यं बाहुमनु' लक्ष्यीकृत्य—वामपार्श्वेनेत्यर्थः। 'आवृत्य',—तत्रैव स्थितः परिवृत्य। यत्र खल्वावर्त्तनमुपदिश्यते, तत्र प्रायेण तत्स्थानस्थितस्यैव परिवर्त्तनमभिप्रेयते;—"अथैनं प्रदक्षिणमावर्त्तयति"—इत्येवमादौ। अन्ये तु वर्णयन्ति,—'सव्यं बाहुमन्वावृत्य,—अप्रादक्षिण्येनाग्निं गत्वा'—इति। 'चमसदर्व्यौ अभ्युक्ष्य',—समासकरणात् तच्छेषेणैवोदकेनाभिषिच्य, तच्छेषेणैव प्रकृतेऽग्नौ 'प्रताप्य 'एवम्' उक्तेन प्रकारेण,—सकृत् संगृहीतान्—इत्यादिप्रकारेणेत्येतत्। 'दक्षिणा' दक्षिणस्यां दिशि बलिं निवपति। एवं प्रतीच्यामेवमुदीच्याम्। 'दक्षिणा'—इत्यादौ सर्व्वत्र पूर्व्वसवर्णः। 'यथा लिङ्गम्' यो मन्त्रो यल्लिङ्गः, तेनैव मन्त्रेण तस्यां दिशि बलिं निवपति। 'यो दक्षिणस्यां दिशि सर्पराज एष ते बलिः', 'यः प्रतीच्यां दिशि', 'य उदीच्यां दिशि',—इति मन्त्रविशेषः

इत्यर्थः। यस्याञ्च दिशि बलिं निवपति तदभिमुख एव स्यात्। तथा चोक्तम्।

"यस्यां दिशि बलिं दद्यात् तामेवाभिमुखो दिशम्।
श्रवणाकर्म्मणि भवेत् न्यत्रकर्म्म न सर्व्वदा"।

इति। 'अव्यावर्त्तमानः'। विशेषेणावर्त्तनमकुर्व्वन्,—सव्यं बाहुमन्वावृत्य—इति यदुक्तं, तद्विशेषेणाकुर्व्वन्—इत्यर्थः। कियन्मात्रमप्यावर्त्तनं न शक्यते प्रतिषेद्धुम्। किं कारणम्? तासु तासु बलिनिवपने तत्तन्मुखत्वविधानम्। अतो विशेषेणावर्त्तनं प्रतिषिषेधयिषुराचार्य्यः 'अव्यावर्त्तमानः'—इत्याह। तस्मात् प्रतीच्युदीचीबल्योर्व्यावर्त्तनं न कर्त्तव्यम् तथैव खल्ववस्थितस्तत्तद्दिङ्मुखो भूत्वा बलिनिवपनं कुर्य्यात्। व्यावर्त्तनप्रतिषेधादेव तदुत्तरंभाविनोरभ्युक्षणप्रतापनयोरपि प्रतिषेधोऽवगम्यते। अतएव, 'एवं दक्षिणा'—इति सूत्रितम्। दक्षिणाबलौ खल्वावर्त्तनाभ्युक्षणप्रतापनानि सूत्रितत्वादेव प्राप्नुवन्ति, तदर्थं पुनः 'एवं दक्षिणा'—इत्येवंशब्दोऽनतिप्रयोजन एव स्यात्। तस्मात्, 'एवं दक्षिणा'—इत्यत्र आवर्त्तनाभ्युक्षणप्रतापनातिरिक्तं पूर्व्वोक्तम् 'एवं' शब्दस्यार्थः,—इत्यकामेनापि वाच्यम्। तत्सामान्यात् 'एवं प्रतीची एवमुदीची'—इत्यनयोरप्येवंशब्दयोः स एवार्थो वर्णनीयः।

तस्मात्, आवर्त्तनाभ्युक्षणप्रतापनातिरिक्तस्यैव 'एवं' शब्देनातिदेशात् प्रतीच्युदीचीबल्योरावर्त्तनाभ्युक्षणप्रतापनानि न कर्त्तव्यानि भवन्ति। यद्येवं 'अव्यावर्त्तमानः'—इत्यनर्थकं, तदतिरिक्तस्यैव 'एवं' शब्देनातिदेशाद्व्यावर्त्तनस्याप्रसक्तेः। उच्यते। अव्या-

वर्त्तमानः,—इति विशेषणावर्त्तनं प्रतिषेधस्याचार्य्यस्तत्त्विद्भ्यत्व-त्वानुगुणं क्रियमात्रमावर्त्तनमनयोरपि वत्योरनुजानाति। सोऽयम् 'अव्यावर्त्तमानः'—इत्यस्यार्थः पूर्व्वमुपपादितोऽस्माभिः। अन्ये तु, 'अव्यावर्त्तमानः',—इति करणाद् व्यावर्त्तनस्यैव प्रतिषेधादभ्यु-क्षणप्रतापनयोः सर्व्वत्रैव करणम् इच्छन्ति ॥ ० ॥ १५ ॥ ० ॥

सूर्पेण शेषमग्नावोप्यानतिप्रणीतस्यार्द्धं व्रजति ॥ १६ ॥

शेषं बलिशेषं सूर्पेण अग्नौ ओप्य,—आ उप्य प्रक्षिप्य। मन्त्रानुप-देशात् व्याहृतित्रयप्रयोगेन,—इत्यर्थः। कुत एतत् ?

"यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत्।
मन्त्राणामेवचादेशे मन्त्रात् कर्म्म समाचरेत्"।

इति गृह्यासंग्रहवचनात्। एवमेके। अपरे तु मन्यन्ते,—"मन्त्रानु-पदेशादमन्त्रकम्"—इति। बलिशेषस्य प्रतिपत्तिः खल्वसौ। प्रतिपत्तौ च मन्त्रान्वयो न प्रयोजनवान्—इति तेषामाशयः। दृश्यते तु वैश्वदेवादिशेषस्य प्रतिपादने बलिहरणादौ मन्त्रान्वयः। अर्थकर्म्मणि तत्र शेषः प्रतिपाद्यते इति चेत्। कएवमाह नेदमर्थ-कर्म्मेति। निःसन्देहायामपि प्रतिपत्तौ स्विष्टकृदादौ तत्रभवन्तो-मन्त्रं प्रयुञ्जते। सन्देहे च व्याहृतिप्रयोगे न किञ्चिद्धीयते।

तदेवं कृत्वा, अनतिप्रणीतस्यार्द्धं व्रजति। प्रणीतम्—इति भावे निष्ठा। प्रणीतं प्रणयनमतिक्रान्तोऽतिप्रणीतः, तथाविधो न भवतीत्यनतिप्रणीतः प्रकृतोऽग्निर्भण्यते। प्रकृतस्य खल्वग्नेः परि-ग्रहार्थम् अनतिप्रणीतस्य—इत्याह। अन्यागारे खल्वन्योऽप्यग्नि-रस्ति। अथ वा। अतिप्रणीतस्तन्त्रान्तरप्रसिद्धो व्याख्यातः, स

न भवतीत्यनतिप्रणीतः। तदस्याग्नेरवं समीपं व्रजति सञ्चरमार्गेणेत्यर्थः ॥ ० ॥ १६ ॥ ० ॥

गत्वा च,—

पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्य नमः पृथिव्या इत्येतं मन्त्रं जपति ॥ १७ ॥

प्रकृतस्याग्नेः पश्चात् न्यञ्चौ अधोमुखौ पाणी हस्तौ, भूमौ प्रतिष्ठाप्य,—

"दक्षिणं वामतो वाह्यमात्माभिमुखमेवच ।
करं करस्य कुर्व्वीत करणे न्यञ्चकर्म्मणः" ।

इति कर्म्मप्रदीपोक्तप्रकारेण संस्थाप्य, नमः पृथिव्यै,—इत्येतं मन्त्रं जपति। 'एतम्'—इति स्वरवर्णसम्पादनार्थम्। 'मन्त्रम्'—इति मन्त्रे दुष्टे यत् प्रायश्चित्तं, तस्य प्राप्त्यर्थम्। अन्याप्रतिषेधार्थं वा एतं मन्त्रमिति वचनम्। कथं नाम? अन्योऽप्येतत्कर्म्म कुर्व्वन्नेतं मन्त्रमेवम्भूतमेव जपति न पुनरूहेत,—इत्यभिप्रायः। कथं पुनरन्यस्य कर्म्मकरणपक्षे ऊहस्याशङ्का? उच्यते। "नमः पृथिव्यै दंष्ट्राय विश्वभृन्मा ते अन्ते रिषाम"—इत्यस्मद्वता विभक्तिर्मन्त्रे पठ्यते। तस्मात्, अन्यस्य कर्म्मकरणपक्षे ऊहमप्याशङ्कीत कश्चिन्मन्दमतिरिति तन्निरासार्थोऽयं प्रयत्नः ॥ ० ॥ १७ ॥ ० ॥

प्रदोषे पायसश्चरुः ॥ १८ ॥

रात्रेः प्रथमो यामः प्रदोषः। कस्मात्? "प्रदोषपश्चिमौ यामौ" —इति, तथापि प्रदोषशब्दप्रयोगात्। तस्मिन् प्रदोषे, पयसि

भव: पायस: , चरु: स्थालीपाक:, कर्त्तव्य:--इति वाक्यशेष: । एवञ्च, सन्ध्योपासनसायंहोमबलिकर्माणि कृत्वा चरुरयं कर्त्तव्य: । कुत: ? तत्तत्कालातिपाते प्रायश्चित्तोपदेशात् । एवमर्थ: प्रदोषशब्द: ॥ ० ॥ १८ ॥ ० ॥

तस्य जुहुयात् ; श्रवणाय विष्णवेऽग्नये प्रजापतये विश्वेभ्यो देवेभ्य: स्वाहेति ॥ १९ ॥

तस्य,--इत्यवयवलक्षणा षष्ठी । तस्य पायसस्य चरोर्जुहुयात् , श्रवणाय स्वाहा,--इत्यादिना मन्त्रेण प्रत्येकम् । सोऽयं स्वाहाशब्द: प्रत्येकमभिसम्बध्यते । तथा चोक्तम् । "मन्त्रान्ते स्वाहाकार:"--इति । किमर्थं तर्हि पुनरिह स्वाहाकारपाठ: ? उच्यते । मन्त्रब्राह्मणोक्तानां मन्त्राणां विनियोगस्य वक्तुमारब्धत्वात् षष्ठि तेषां बुद्ध्यारूढत्वम् । अतस्तेषामेव मन्त्रशब्दार्थत्वात्तएव मन्त्रा: स्वाहाकारान्ता: स्यु:--इत्यपि स्यादाशङ्का कदाचित् कस्यचिन्मन्दमतेरिति तन्निरासार्थमिह स्वाहाशब्दमपठदाचार्य: । मन्त्रा: खल्वेते मन्त्रब्राह्मणे न पठ्यन्ते । अथवा । श्रवणाय, --इत्यादिचतुर्थीविभक्तीनामुद्देश्यतामात्रपरत्वमभ्युपेत्य तन्त्रेणापि होमं कश्चिदाशङ्कीत । अत: स्वाहाशब्दयोगेनैवैताश्चतुर्थीविभक्तय:,--इति प्रज्ञापनार्थमिह स्वाहाकार: पठित: । श्रवणो-नक्षत्रविशेष: । विष्णवादय: प्रसिद्धा: । असमासकरणमपि निर्वापहोमयो: पृथक्त्वप्रज्ञापनार्थमेव । केचित् पुनर् ,--एकामाहुतिमेकञ्च निर्वापमिच्छन्ति । तदसङ्गतम् । पूर्वोक्तयुक्ते: । असमस्ताभिधानञ्चैवं स्यात् । कर्मप्रदीपोऽपि--

"श्रावण्यां वा प्रदोषे यः क्षयारम्भे तथैवच ।
कथमेतेषु निर्वापाः ? कथञ्चैव जुहोतयः ?
देवतासङ्ख्यया गृह्य निर्व्वापांश्च पृथक् पृथक् ।
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक्" ।

इति श्रावण्यां प्रदोषेऽपि पृथक् पृथक् निर्व्वापं होमश्चाह ॥
॥ ० ॥ १९ ॥ ० ॥

स्थालीपाकावृताऽन्यत् ॥ २० ॥

अन्यत् सर्व्वं स्थालीपाकावृता स्थालीपाकरीत्या कुर्य्यात् । अथ, "एषोऽत ऊर्द्धं हविराहुतिषु न्यायः"--इति परिभाषाप्राप्तत्वादेतदवाच्यम् ? नैष दोषः । परिसङ्ख्यानार्थत्वात् । कथं नाम ? होमादन्यदेव स्थालीपाकावृता कुर्य्यात्, होमे तु "सकृद्वा त्रिर्व्वा"--इति योऽयं विकल्प उक्तः, सोऽत्र न भवति । तस्मात् सकृदेव जुहुयात् । कर्म्मक्रमप्रज्ञापनार्थं वा वचनं वर्णनीयम् । कथं नाम ? स्थालीपाकावृता अन्यत् कर्म्मशेषं समाप्य वक्ष्यमाणसूत्रोक्तं कर्म्म कृत्वा परस्तात् परिभाषासिद्धं वामदेव्यगानं कुर्य्यात्--इति । एतस्य खल्वसूत्रणे वक्ष्यमाणसूत्रोक्तं कर्म्म प्रधानहोमानन्तरमेव वा स्यात् वामदेव्यगानात् परतो वा स्यात् ।

परमार्थतस्तु, अत्र चरोर्बहुदैवतत्वादवघात एव होमः प्राप्नोति । तत्र चाज्यभागौ अवदानधर्म्मश्च न भवति । अस्माच्च वचनादाज्यभागौ अवदानधर्म्मश्च इह प्राप्यते । कथं ज्ञायते ? आचार्य्यपुत्रस्मरणात् । तथाच गृह्यासंग्रहः ।

"आसीपाकाहृताऽन्यत्तु यत्र संज्ञा निपात्यते ।
तत्राज्यभागौ हुत्वैव सुचमासीर्य्याविध्यति" ।

इति । सोऽयमस्यार्थः । एवमुत्तरत्रापि वर्णनीयम् ॥ ० ॥ २० ॥०॥

उत्तरतोऽग्नेर्दर्भस्तम्बꣳसमूलं प्रतिष्ठाप्य सोमोराजेत्येतं मन्त्रं जपति याꣳसन्ध्याꣳसमधत्तेति च ॥ २१ ॥

समूलं मूलसहितं दर्भस्तम्बं कुशगुच्छं प्रकृतस्याग्नेरुत्तरतः प्रतिष्ठाप्य,—"प्राङ्मुखकरणस्थानादेशे"—इत्यस्मत्सूत्रकारवचनात् प्रागग्रं स्थापयित्वा, सोमोराजेति यां सन्धामिति च मन्त्रद्वयं जपति । "एतं मन्त्रम्"—इति व्याख्यातम् । इदानीं वामदेव्यगानम् । केचित् अत्र दर्भस्तम्बे कुशसंख्यामिच्छन्ति । तदसङ्गतम् । कस्मात् ?

"यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा ।
दर्भसङ्ख्या न विहिता विष्टरास्तरणेष्वपि" ।

इति कर्म्मप्रदीपवचनात् ॥ ० ॥ २१ ॥ ० ॥

श्वस्ततोऽक्षतसक्तून् कारयित्वा नवे पात्रेऽपिधाय निदधाति ॥ २२ ॥

श्वः आगामिनि दिने,—तस्यां पौर्णमासीगर्व्येयां प्रभातायां सत्यामित्येतत् । ततः, प्रातर्होमानन्तरम् । अथवा । ततः,—इति सार्व्वविभक्तिकस्तसिः । तस्मैवाहृता, अक्षतसक्तून् अक्षता यवाः

तेषां सक्तून् कारयित्वा, नवे पात्रे कृत्वा पात्रान्तरेण अपिधाय स्थगयित्वा, निदधाति गृहे स्थापयति। कारयित्वा,—इति वच-नात् कर्त्तुरनियमः ॥ ० ॥ २२ ॥ ० ॥

तैश्च सक्तुभिः,—

अहरहस्तूष्णीं बलीन् हरेत् सायं प्राग्घोमादाग्र-हायण्याः ॥ २३ ॥

अहरहः प्रत्यहं, पूर्व्वोक्तान् बलीन् हरेत्। तूष्णीमिति वाग्-व्यापारप्रतिषेधान्मनसा मन्त्रमुच्चार्य्येत्यर्थः। अथवा। तूष्णीमिति करणादमन्त्रकमेवैतान् बलीन् हरेत्। तूष्णीमिति वाग्यमन-नियमार्थं न मन्त्रोच्चारणप्रतिषेधार्थम्—इति केचित्। कस्मिन् काले बलीन् हरेत्? सायम्,—अस्तमयादूर्द्धम्। प्राक् पूर्व्वं होमात्। ननु होमात् पूर्व्वमेव बलिहरणं पुरस्तात् सूचितं तत् किमिति प्राग्घोमादिति क्रियते? उच्यते। अनया भङ्ग्या होममप्यहरहर्दर्शयति। इतरथा, बलीन् हरेदिति करणात् होमो न स्यात्—इति कश्चिदाशङ्कीत। कियन्तं कालं बलीन् हरेत्? आग्रहायण्याः,—आ आग्रहायण्याः, आग्रहा-यणीपौर्णमासीपर्य्यन्तम्।

अत्र बलिहरणहोमयोरभिधानात् अहरहः प्रयोगे बलिशेषस्य हवनं लक्षणपूर्व्वकमग्निस्थापनञ्च न स्यात्, अमसदर्व्वोः प्रताप-नार्थमुल्मुकन्तु प्रत्यहमप्यासादयेत्। नमः पृथिव्यै—इत्येतदपि मन्त्रकरणं प्रत्यहं नैव भवति। तथा चोक्तम्।

"बलिशेषस्य हवनमग्निप्रणयनन्तथा ।
प्रत्यहं न भवेयातामुत्सुकस्य भवेत् सदा" ।

इति । "न्यस्तकर्म्म न सर्व्वदा"—इति च ॥ ० ॥ २१ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य सप्तमी खण्डिका ॥ ० ॥

तृतीयप्रपाठके अष्टमी खण्डिका।

उक्तं श्रवणाकर्म्म। अथेदानीमाश्वयुजीकर्म्म प्रस्तूयते,—

आश्वयुज्यां पौर्णमास्यां पृषातके पायसश्चरू रौद्रः॥१॥

अश्वयुक् अश्विनीनक्षत्रं, तद्युक्ता पौर्णमासी आश्वयुजी। तस्यां पौर्णमास्याम्। आश्वयुजीग्रहणम् अश्विनीनक्षत्रसम्बन्धद्वारेण आश्विनपौर्णमासीप्रज्ञापनार्थम्। पौर्णमासीग्रहणं पौर्णमास्याः प्राधान्यख्यापनार्थम्। तेन, नक्षत्रालाभेऽपि आश्विनपौर्णमास्यामेव कर्त्तव्यम्। आज्यसंयुक्तं पयो दधि वा पृषातकमित्युच्यते। तस्मिन् पृषातके,—सप्तमीनिर्देशात् वक्ष्यमाणावेक्षणाद्यर्थं समासादिते सतीत्यर्थो बोद्धव्यः। रुद्रो देवताऽस्येति रौद्रः, पायसः—पयसि भवश्चरुः कर्त्तव्यः। तच्चैतत् पयः पृषातकादन्यदेव स्यात्। तथाच कर्म्मप्रदीपः।

"पयो यदाज्यसंयुक्तं तत् पृषातकमुच्यते।
दध्येके, तदुपासाद्य कर्त्तव्यः पायसश्चरुः"।

इति। रुद्राय त्वा,—इति निर्व्वापः। समासादितञ्च पृषातकं होमकाले अग्नेरुत्तरपूर्व्वतः स्थापनीयम्। तथाच गृह्यासंग्रहः।

"दधि सर्पिश्च संयुक्तं प्रोक्तोह्येष पृषातकः।
होमकाले तु तस्याग्नेः स्थानमुत्तरपूर्व्वतः"।

इति॥०॥१॥०॥

तस्य जुहुयादा नो मित्रावरुणेति * प्रथमां मान-स्तोक इति द्वितीयाम् ॥ २ ॥

तस्येत्यवयवलक्षणा षष्ठी। तस्य पायसस्य चरोरेकदेशं जुहुयात्। आ नो मित्रावरुणेति मैत्रावारुण्यर्चा प्रथमामाहुतिं जुहुयात्। मा न स्तोके इति रौद्रार्चा द्वितीयामाहुतिं जुहुयात्। ननु मैत्रावारुण्यर्चा कथं होमः सूत्र्यते? पायसचरुः खल्वयं रौद्रः सूत्रितः। न चैकस्मै हविर्निरुप्य अन्यस्मै हूयते,—इति युक्तम्। उक्तञ्च,—

"निरुप्य हविरन्यस्मा अन्यस्मै न हि हूयते"।

इति। आद्यस्य किल मन्त्रस्य मित्रावरुणयोर्देवतात्वं लिङ्गादवगम्यते। नैष दोषः। श्रुतेर्बलवत्त्वात्। रौद्रः—इति श्रुत्या तावत् रुद्रस्य देवतात्वमवगम्यते, लिङ्गाच्च मित्रावरुणयोः, दुर्ब्बलञ्च श्रुतेर्लिङ्गम्। तस्मात् "ऐन्द्र्या गार्हपत्यमुपतिष्ठेत"—इति वदिहापि श्रुत्या लिङ्गं बाधितव्यं भवति। श्लोकमपि उदाहरन्ति।

"तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन चेष्यते।
देवतासङ्गतिस्तत्र दुर्ब्बलन्तु परं परम्"।

इति। पाठक्रमादेवाहुत्योः प्रथमद्वितीयत्वसिद्धेः पुनः प्रथमादिग्रहणम्,—अनयोरेवाहुत्योश्चरोरभिसम्बन्धप्रज्ञापनार्थम्। तेन, प्रथमद्वितीये एव चर्व्वाहुती। याश्चान्या आहुतयो वक्ष्यन्ते, ताः सर्व्वा एवाज्याहुतयः। तथा च कर्म्मप्रदीपः।

* आ नो मित्रेति प्रथमां इति पाठान्तरम्।

"आग्रयुण्यां तथा क्रय्यां वास्तुकर्म्मणि याज्ञिकाः ।
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते ।
हे पञ्च हे क्रमेणैता हविराहुतयः स्मृताः ।
शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत्" ।

इति ॥ ० ॥ २ ॥ ० ॥

गोनामभिश्च पृथक् काम्यासीत्येतत्प्रभृतिभिः ॥ ३ ॥

गवां नामानि गोनामानि । तैर्गोनामभिश्च काम्यासि,—इत्येतत्प्रभृतिभिरष्टाभिः, पृथक् नाना, अष्टावाज्याहुतीर्जुहुयात् । गोनामानि च,—

"काम्या प्रिया च हव्या च इड़ा रन्ता सरस्वती ।
मही विश्रुता चाघ्न्या च गोनामानि विदुर्बुधाः" ।

इति गृह्यासंग्रहोक्तानि । "चकारा असिशब्दस्याध्याहारार्थाः"—इति गृह्यासंग्रहभाष्ये दीक्षितः । यद्यपि नवैव गोनामानि पठ्यन्ते, तथापि अघ्न्यानाम्ना होमो नास्तीत्यष्टावेवाहुतयो भवन्ति । एतदिति करणाच्चैवम्भूतैरेव होमः, न चतुर्थी प्रयोक्तव्या । तथाच कर्म्मप्रदीपः ।

"धृतिहोमे न प्रयुञ्ज्याद्गोनामसु तथाऽष्टसु ।
चतुर्थीमघ्न्या इत्येतद्गोनाम्नि न हि हूयते" ।

इति । एवञ्च, काम्यासि स्वाहा,—इत्येवमादिकः प्रयोगः सिद्धो भवति । अत्र किञ्चिद्वक्तव्यमस्ति । काम्या प्रिया हव्या इति नामत्रयान्ते असिशब्दोऽध्याहार्य्यः । अन्यानि च नामानि संबोधनान्तानि प्रयोक्तव्यानि । कथमर्द्धजरतीयं वर्ण्यते, क्वचित् असि-शब्दस्याध्याहारः क्वचिच्च संबोधनविभक्त्यन्तता,—इति । ननु

सर्व्वत्रैव 'चसि' शब्दस्याध्याहारो वा स्यात् संबोधनविभक्त्य-न्तता वेति युक्तं वर्णयितुम्।

नैष दोषः। कस्मात्? ताण्ड्यब्राह्मणे तथैव पठितत्वात्। तथाच तत्र समामनन्ति। "काम्यासि प्रियासि हव्यासीड़े रन्ते सरस्वति महि विश्रुते एतानि तेऽघ्न्ये नामानि"--इति। अत्र विश्रुते इत्यनन्तरं एतानि तव नामानीत्यभिधानादष्टावेव परिभाषिकानि गोनामानि भवन्ति। अघ्न्याशब्दस्तु योगेन तत्र प्रयुक्तः। अहननीया खल्वसौ। अतएव कात्यायनेन गोनामहोमे अघ्न्याशब्देन होमोनास्ति इत्युक्तम्। आचार्य्यपुत्रेण तु अघ्न्या शब्दस्यापि गवि प्रयोगदर्शनात् तस्यापि गोनामत्वमभिहितम्। तस्माद् यथापठितैरेव स्वाहाकारान्तैर्गोनामभिरष्टावाहुतयो होतव्याः। भट्टभाष्येऽपि तथैव लिखितम्॥ ० ॥ ३ ॥ ० ॥

स्थालीपाकावृताऽन्यत्॥ ४ ॥

गतभाष्यं सूत्रम्॥ ० ॥ ४ ॥ ० ॥

पृषातकं प्रदक्षिणमग्निं पर्य्याणीय ब्राह्मणानवेक्ष-यित्वा स्वयमवेक्षेत;--तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्च-रत् पश्येम शरदः शतं जीवेम शरदः शतमिति॥५॥

अग्निप्रादक्षिण्येन पृषातकमानीय ब्राह्मणानवेक्षयित्वा स्वयमवे-क्षेत,--तच्चक्षुरिति मन्त्रेण। सामान्येनाभिधानात् ब्राह्मणाना-

मपि मन्त्रो भवति, न पुनरामन्त्र्यातिरेकात् यजमानस्यैव।
तथा चोक्तम्।

"पृषातकप्रेक्षणयोर्मन्त्रस्य हविषस्तथा।
शिष्टस्य प्राशने मन्त्रस्तत्र सर्व्वेऽधिकारिणः"।

इति। यदि पुनः कस्माच्चित् कारणात् केऽपि ब्राह्मणास्तदानीं सन्निहिता न स्युः, तदा स्वयमेव पृषातकमवेक्षेत। तथा चोक्तम्।

"ब्राह्मणानामसान्निध्ये स्वयमेव पृषातकम्।
अवेक्षेतविधिः शेषं नवयज्ञेऽपि भक्षयेत्"।

इति ॥ ० ॥ ५ ॥ ० ॥

ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा जातुषान्मणीन् सर्व्वौषधिमिश्रानाबध्नीरन् स्वस्त्ययनार्थम् ॥ ६ ॥

ब्राह्मणान्,—बहुवचनात् त्रिप्रभृतीन्, भोजयित्वा, स्वयञ्च भुक्त्वा। अथ, "अपवर्गेऽभिरूपभोजनं यथाशक्ति"—इति सिद्धत्वादेतदवाच्यम्? उच्यते। अत्यन्ताशक्तावप्यस्मिन् कर्म्मणि त्रयाणामावश्यकत्वार्थमिदमुक्तम्। अशक्तौ खल्वेकस्यापि ब्राह्मणस्य भोजनं प्राप्नोति, यथाशक्त्युपदेशात्। तन्निरासार्थं ब्राह्मणान् भोजयित्वा,—इत्याह। नैतत् युक्तम्। कस्मात्? अशक्योपदेशात्। यो हि त्रीन् भोजयितुं न शक्नोति, कथं तस्य तदुपदिश्येत! अशक्योपदेशः खल्वप्रमाणमेव स्यात्। न च प्रमाणं शास्त्रमप्रमाणं कल्पयितुमुचितम्।

अपर आह। भोजयित्वा,—इति कर्माकाङ्क्षायां पृषातक-मिति प्रकृतमन्वीयते। अन्यथा, प्रकृतहानाप्रकृतप्रक्रिये प्रस-ज्येयाताम्,—इति। एतदपि न सुन्दरम्। कस्मात्? यस्मात् ब्राह्मणान् भोजयित्वा,—इत्युक्ते निर्व्विशेषितमेव भोजनं ताव-दवगम्यते, न किञ्चिदत्रापेक्षणीयमस्ति। येन तृप्तिः सम्पद्यते, तेन केनापि भोजयति,—इत्यवगम्यत एव। "ब्राह्मणान् भोजय" "कौण्डिन्यान् भोजय" "शयाना भुञ्जते यवनाः"—इत्येवमादि-प्रत्ययव्यपदेशानां लोके बहुलमुपलम्भात्। "लोके येष्वर्थेषु प्रसि-द्धानि पदानि, तानि (सति सम्भवे) तदर्थान्येव सूत्रेषु"—इति हि नः प्रतिज्ञातम्। पृषातकं भोजयित्वा,—इति खल्वानुमानिकं परिचिकल्पयिषितम्। न चैतत् शब्दस्य श्रवणमात्रात् योऽर्थो-ऽवगम्यते तं बाधित्वा शक्नोत्यात्मानं लब्धुम्। नापि पृषातकेन तृप्तिः सम्पद्यते। भुजिचोदनायाश्चैवमेवार्थोऽन्यत्रापि दृश्यते;—"अपवर्गेऽभिरूपभोजनम्"—इत्येवमादौ।

अपि च। उत्तरत्र पृषातकमिति कुर्व्वन्नाचार्य्योऽत्र पृषातकव्यतिरिक्तस्यैव भोजनं दर्शयति। तस्मात्, अस्मिन् कर्म्मणि अपवर्गविहितव्यतिरिक्तस्यापि ब्राह्मणभोजनस्याभ्यनुज्ञानार्थं ब्राह्मणान् भोजयित्वा,—इति वचनम्। कर्म्मक्रमप्रज्ञापनार्थं वा। कथं नाम? अपवर्गविहितं ब्राह्मणभोजनमिदानीं कारयित्वा स्वयञ्च भुक्त्वा वक्ष्यमाणं कर्म्म कर्त्तव्यम्। अवचने खल्विदानीमेतन्न प्राप्नोति। कस्मात्? इतः परमपि कर्म्मोपदेशात्। तस्मात्, अपवर्गविहितं ब्राह्मणभोजनं सायं माभूदिति तदेव ब्राह्मण-भोजनमिदानी मुच्यते,—इत्यादरणीयम्।

तदेवं ब्राह्मणान् भोजयित्वा स्वयञ्च भुक्त्वा, जातुषान् लाक्षाकृतान् मणीन्, सर्व्वौषधिमिश्रान्, सर्व्वौषधयो व्याख्याताः। तन्मिश्रान्, सर्व्वौषधिगर्भान्—इत्यर्थः। आबध्नीरन्, स्वस्त्ययनार्थम्। स्वस्ति,—मङ्गलं, तस्य अयनं प्राप्तिः, तदर्थम्। बहुवचनोपादानात् न परं गृहपतिरेवाबध्नीत, किन्तु अन्येऽपि स्वस्त्ययनेप्सवो गृह्या आबध्नीरन्। कुत्र आबध्नीरन्? स्ववाहौ, बालानाञ्च ग्रीवासु। कुतः? तथा प्रसिद्धेः। स्वस्त्ययनार्थम्,—इति मणिबन्धनं स्तौति, न फलविधिः। वाक्यभेदापत्तेः। कथं नाम? मणीन् आबध्नीरन्, तच्च स्वस्त्ययनार्थं भवति,—इति यदि द्वावप्यर्थौ विधित्सितौ, भिद्येत वाक्यम्। अन्ये तु वर्णयन्ति,—'स्वस्त्ययनार्थमिति वचनात् मणिबन्धनस्य काम्यत्वं गम्यते। ततश्चैतस्मिन्नक्रियमाणेऽपि न दोषः। यद्यपि, "एतस्यैव बलिहरणस्यान्ते कामं प्रब्रुवीत"—इत्यादौ नित्येऽपि कामसम्बन्धो दृश्यते, तथापि रक्षामणिप्रतिसरादिबन्धनस्य लोके भूयसा काम्यतैव दृश्यते। अतो न दोषः।' इति ॥ ० ॥ ६ ॥ ० ॥

सायं गाः पृषातकं प्राशयित्वा सहवत्सा वासयेत ॥ ॥ ७ ॥

सायं रात्रौ, गाः पृषातकं प्रकृतं, प्राशयित्वा, सहवत्साः वासयेत,—वत्सैः सहाविमुक्ताः कृत्वा वासयेत तां रात्रिम्। 'वासयेरन्'—इति केचित् पठन्ति। पृषातकम्,—इति द्वितीयानिर्देशात् सर्व्वमेव पृषातकं प्राशयितव्यं, न किञ्चिदप्यवशेषणीयम्,—इति दर्शयति ॥ ० ॥ ७ ॥ ० ॥

अनेन खलु पृषातकप्राशनादिना,—

स्वस्ति हासां भवति ॥ ८ ॥

स्वस्ति मङ्गलं, ह किल, आसां गवां भवति ॥ ० ॥ ८ ॥ ० ॥

आश्वयुजे किल मासि कालवशाद्यवयवस्थानि भवन्ति। ओषधयः खल्वत्र पच्यन्ते। नवयज्ञमकृत्वा तदश्नन् अग्निमान् प्रत्यवैति, प्रायश्चित्तञ्च प्राप्नोति। तदाह कर्म्मप्रदीपः।

"अनिष्ट्वा नवयज्ञेन नवान्नं योऽश्नकामतः।
वैश्वानरश्चरुस्तस्य प्रायश्चित्तं विधीयते"।

इति। अतो नवयज्ञस्तावदिदानीं प्रस्तूयते,—

नवयज्ञे पायसश्चरुरैन्द्राग्नः ॥ ९ ॥

नवेन शस्येन यज्ञो नवयज्ञः। तस्मिन् ऐन्द्राग्नः पायसश्चरुः,—कर्त्तव्यः,—इति सूत्रशेषः। इन्द्रश्च अग्निश्च इन्द्राग्नी, तौ देवता अस्येति ऐन्द्राग्नः। सेयं द्वन्द्वदेवता। इन्द्राग्निभ्यां त्वा,—इति निर्व्वापः। इन्द्राग्निभ्यां स्वाहा,—इति होमः ॥ ० ॥ ९ ॥ ० ॥

तस्य मुख्याꣳहविराहुतिꣳहुत्वा चतसृभिराज्याहुतिभिरभिजुहोति;—शतायुधायेत्येतत्प्रभृतिभिः ॥
॥ १० ॥

तस्य चरोरेकदेशेन मुख्यां हविराहुतिं हुत्वा चतसृभिः आज्या-

स्तुतिभिः अभिजुहोति,—अभि सर्व्वतोभावेन ;—समाहितमनाश्छन्दोदैवतार्षादीन्यनुस्मरन् जुहोति, शतायुधाय,—इत्येतत्प्रभृतिभिश्चतुर्भिर्मन्त्रैः ॥ ० ॥ १० ॥ ० ॥

स्थालीपाकावृताऽन्यत् ॥ ११ ॥

व्याख्यातमेतत् ॥ ० ॥ ११ ॥ ० ॥

हविरुच्छिष्टशेषं प्राशयेद् यावन्त उपेताः स्युः ॥ १२ ॥

यावन्तो ब्राह्मणा उप समीपं इता गता स्युर्भवेयुः, तावतो-ब्राह्मणान् हविरुच्छिष्टशेषं प्राशयेत्,—प्रकर्षेण वक्ष्यमाणविधिना आशयेत् भोजयेत्। ननु, हविरुच्छिष्टं प्राशयेत्,—इति वक्तव्ये शेषग्रहणं किमर्थम्? उच्यते। हविरुच्छिष्टं ब्राह्मणान् प्राशयित्वा शेषं स्वयं प्राश्नीयात्,—इत्येतत्प्रज्ञापनार्थं शेषग्रहणम्। कथं नाम? शिष्यते अस्मादिति शेषः, हविरुच्छिष्टञ्च तत् शेषश्चेति हविरुच्छिष्टशेषं प्राशयेत्,—इति वचनव्यक्त्या तावत् ब्राह्मणप्राशनादप्यवशेषोऽवगम्यते, तस्य च यजमानप्राशनं कल्प्यते। कस्मात्? वक्ष्यमाणप्राशनविधौ विशेषानुपदेशात्। तदर्थत्वाच्च नवयज्ञस्य। नवयज्ञमकुर्व्वतो नवान्नप्राशनप्रतिषेधात् नवयज्ञात् परतो यजमानस्य तत्प्राशनावगतेः। अतएव, शिष्टस्य नवहविषः प्राशनमन्त्रे सर्व्वेषामधिकारं स्मरता कात्यायनेन सर्व्वशब्दात् यजमानस्यापि शेषप्राशनमनुशिष्टम्। तच्चोपदर्शितमुपदर्शयिष्यते च। हविरुच्छिष्टशेषम्,—इति द्वितीयाकरणात् सर्व्वस्यैव शेषस्य प्राशनं यजमानः कुर्य्यात् न तु यत्किञ्चिदेव प्राश्य शेषमन्यस्मै

दद्यात्,—इति बोद्धव्यम्। स खल्वयं कृतकार्य्यो यजमानः स्वभोजनकाले सर्व्वं प्राश्नीयात्। यदि पुनः केऽपि ब्राह्मणा नोपेताः स्युः, तदा स्वयमेव प्राश्नीयात्। कस्मात्?

"ब्राह्मणानामसान्निध्ये स्वयमेव पृषातकम्।
अवेक्षेत्तद्विषः शेषं नवयज्ञेऽपि भक्षयेत्"।

इति वचनात्॥ ०॥ १२॥ ०॥

अथ प्राशनविधिरभिधीयते,—

सकृदपामुपस्तीर्य्य द्विश्चरोरवद्यति॥ १३॥

सकृदेकवारम् अपामुदकस्य उपस्तीर्य्य स्रुवेणोपस्तरणं कृत्वा, द्विः,—द्विःकृत्वः—मध्यात् पूर्व्वार्द्धाच्च, चरोरवद्यति मेक्षणेनाव-दानं करोति। कुत्र अवद्यति? दक्षिणे पाणौ। कस्मात्? "यत्रोपदिश्यते कर्म्म"—इति परिशिष्टकारवचनात्,, इति भट्ट-नारायणोपाध्यायाः। एवञ्च, उपस्तरणादिकं वामेनैव पाणिना कर्त्तव्यं भवति। कस्मात्? दक्षिणस्यान्यत्र व्यापृतत्वात्॥ ०॥ ॥ १३॥ ०॥

त्रिर्भृगूणाम्॥ १४॥

भृगूणां चरोस्त्रिःकृत्वोऽवद्यति। पश्चार्द्धादिति तेषामधिकम्॥ ॥ ०॥ १४॥ ०॥

अपाञ्चैवोपरिष्टात्॥ १५॥

अवदानानामुपरिष्टादपामभिघारयति स्रुवेणैव। चशब्दोऽभि-

चारणव्यापारस्मारणार्थः। एवंशब्दो यासामपामुपस्तरणं कृतं, तासामेवापामभिघारणकरणार्थः ॥ ० ॥ १५ ॥ ० ॥

एवं चरुशेषं पाणौ कृत्वा,

असंस्वादं निगिरेद्भद्रान्नः श्रेय इति ॥ १६ ॥

असंस्वादं सम्यगास्वादनं यथा न भवति, तथा निगिरेत् भक्षयेत्, भद्रान्नः श्रेय इति मन्त्रेण। असंस्वादमिति कुर्व्वन् दन्तैरचर्व्वयित्वा निगरणमुपदिशति। कियन्मात्रमप्यास्वादनं न शक्यते प्रतिषेद्धुम् इति खल्वसंस्वादमित्याह। किं कारणम्? निगरणपक्षेऽपि तस्यावर्ज्जनीयत्वम् ॥ ० ॥ १६ ॥ ० ॥

एवं त्रिः ॥ १७ ॥

एवमनन्तरोक्तया रीत्या त्रिर्व्वारत्रयं निगिरेत्। प्रथमेन सहैव त्रित्वं बोद्धव्यम् ॥ ० ॥ १७ ॥ ० ॥

तूष्णीं चतुर्थम् ॥ १८ ॥

चतुर्थं निगरणं तूष्णीं कुर्य्यादमन्त्रकमित्यर्थः। अयमेव विशेषः। उपस्तरणादिकं सर्व्वमत्रापि पूर्व्ववदेव भवति ॥ ० ॥ १८ ॥ ० ॥

भूय एवावदाय ॥ १९ ॥

भूय एव पुनरपि चरोरवदाय निगिरेत्। भूयः पुनरपि चरोरवदायैव--इति वा वर्णनीयम्। तस्मादुपस्तरणमभिघारणञ्चात्र न भवति। इतरथा खल्ववदायेति पुनर्व्वचनमनर्थकमेव स्यात्। सोऽयमेवशब्दोऽस्यार्थस्योपोद्बलको भवति ॥ ० ॥ १९ ॥ ० ॥

कामन्तत्र सप्र्खादयेरन् ॥ २० ॥

तत्र तस्मिन्निगरणे काममिच्छया संखादयेरन्। सेयं प्राशनेतिकर्त्तव्यता सर्व्वेषामेव स्यात्। कस्मात्?

"पुरोडाशकप्रैषणयोर्नवस्य हविषस्तथा।
शिष्टस्य प्राशने मन्त्रस्तत्र सर्व्वेऽधिकारिणः"।

इति वचनात् ॥ ० ॥ २० ॥ ० ॥

आचान्तोदकाः प्रत्यभिमृशेरन्मुखप्र्शिरोऽङ्गानीत्यनुलोममसीति ॥ २१ ॥

आचान्तोदकाः मुखं शिरोऽङ्गानि,—बाहुजठरादीनि च अभिमृशेरन् स्पृशेरन्। बहुवचनात् सर्व्वे। इतिशब्दः चशब्दार्थः समुच्चये। कथमभिमृशेरन्? अनुलोमम्। लोमामनुकूलं यथा भवति तथा अभिमृशेरन्। केन मन्त्रेण? अमोऽसि,—इति मन्त्रेण। अत्राह। आचान्तोदकाः—इति किमर्थमुच्यते, ननु निगरणादुच्छिष्टा एव सर्व्वे कथमनाचान्तोदकाः कर्म्म वा करिष्यन्ति, मन्त्रं वा पठिष्यन्ति? उच्यते। अत्राचान्तोदकाः—इति कुर्व्वन् बोधयति; यत्राचमनं न चोद्यते,—तत्रोच्छिष्टत्वमेव न भवति, यथा प्राणाग्निहोत्रसोमभक्षणादौ। तथाचोक्तं स्मृतिसंग्रहे।

"मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च।
अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः।

प्राणाहुतिषु सोमेषु मधुपर्के तथैव च ।

आस्यहोमेषु सर्व्वेषु नोच्छिष्टो भवति द्विजः" ।

इति । इदमिदानीं सन्दिह्यते । किमभिमर्शनमन्त्रः प्रत्यवयवमावर्त्तते आहोस्वित् सक्कदेव भवति ? इति । प्रत्यवयवमावर्त्तते,— इति ब्रूमः । कस्मात् ? अवयवभेदात् । 'भेदे मन्त्रावृत्तिः"— इति च सूत्रकारवचनात् । प्रतिशब्दकरणाच्च । प्रत्यभिमृशेरन्— इति प्रतिशब्दं कुर्व्वन्नाचार्य्यः प्रत्यवयवं समन्त्रकमभिमर्शनं दर्शयति । अन्यथा खल्वनर्थक एव प्रतिशब्दो भवेत् ॥ ० ॥ २१ ॥ ० ॥

आश्वयुजीप्रस्तावात् व्रीहीनधिकृत्य नवयज्ञः सूचितः । व्रीहयोहि शरदि पच्यन्ते । तस्मात् व्रीहियज्ञ एवायम् । इदानीमन्यत्राप्येतस्यातिदेशः क्रियते,—

एतयैवावृता श्यामाकयवानाम् ॥ २२ ॥

एतया व्रीहियज्ञोक्तयैवावृता रीत्या श्यामाकयवानामपि हवनप्राशनादिकं कुर्य्यात् । एवशब्दः कृत्स्नकर्म्मणोऽतिदेशार्थः । श्यामाका यवाश्च शस्यभेदाः । एवञ्च शालियज्ञोऽस्माकं नावश्यकः । कस्मात् ? अस्मदाचार्य्येणानुपदेशात् । श्यामाकयज्ञश्च गृहमेधिनो न भवति, किन्तु वैखानसस्यैव । कस्मात् ? तस्य ग्राम्यप्रतिषेधात् । तथा चोक्तम् ।

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।

धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः" ।

इति । एतस्माच्च लिङ्गात् शरदि व्रीहियज्ञः, वसन्ते च यवयज्ञः

कर्त्तव्यः। "श्टहमेधी व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत, श्यामाकेर्वेनी वर्षासु, आपत्कालेऽन्येन पुरातनैर्वा"—इति च ब्राह्मणं भवति। इक्षुप्रभृतयस्तु विनैव नवयज्ञं भक्षणीयाः। तत्र तदनुपदेशात्। तथाच श्लोकसंग्रहः।

"इक्षवः सर्व्ववल्लाश्च कोद्रवा वरटैः सह।
अकृताग्रयणा भक्ष्या येषां नोक्ता हविर्गुणाः"।

इति। गोधूमादिष्वपि नास्त्येव नियमः। कस्मात्? अनुपदेशादेव। तदप्याह स एव।

"नवयज्ञेऽधिकारस्थाः श्यामाका व्रीहयो यवाः।
नाश्नीया न च इत्वेवमन्येष्वनियमः स्मृतः"।

इति। अत एव श्यामाकयवयोरेव भक्षणमन्त्रः सूत्रयिष्यते॥ ०॥
॥ २२॥ ०॥

अयमत्र विशेषः,—

अग्निः प्राश्नातु प्रथम इति श्यामाकानाम्॥ २३॥

अग्निः प्राश्नातु,—इति श्यामाकानां हविरुच्छिष्टशेषप्राशनमन्त्रः। सर्व्वमन्यत् पूर्व्ववदेव बोद्धव्यम्॥ ०॥ २३॥ ०॥

एतमुत्यं मधुना संयुतं यवमिति यवानाम्॥ २४॥

एतमुत्यमिति यवानां हविरुच्छिष्टशेषप्राशनमन्त्रः। समानमन्यत्। 'तत्रापि पौर्णमासेनेष्ट्वा दर्शमकृत्वा अन्तरा नवयज्ञो न कर्त्तव्यः। कुतः?

"नैकस्मिन् कर्म्मणि तत कर्म्मान्यत्तायते यतः" ।

इति वचनात्'—इति शिष्टाः । पौर्णमासाद्यं दर्शान्तं खल्विद-मेकं कर्म्म ॥ ० ॥ २४ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य अष्टमी खण्डिका ॥ ० ॥

तृतीयप्रपाठके नवमी खण्डिका ।

आग्रहायण्यां बलिहरणम् ॥ १ ॥

अग्रे हायनमस्येत्यग्रहायणो मार्गशीर्षः, तस्येयं पौर्णमासी आग्रहायणी, तस्यां बलिहरणं कर्त्तव्यमिति सूत्रशेषः ॥ ० ॥ १ ॥ ० ॥

तत् श्रावणेनैव व्याख्यातम् ॥ २ ॥

तत् आग्रहायणीबलिहरणं श्रावणेनैव बलिहरणेन व्याख्यातम्—इति कृत्स्नकर्म्मातिदेशः। तस्मादत्रापि, पुरस्ताच्छालाया उपलेपनम्—इत्येवमादि—सत्तुविधानान्तमङ्गि कृत्वा, अस्तमिते सवितरि तथैव रीत्या बलिहरणं कर्त्तव्यम्। ननु एतस्योपरितनैः सूत्रैः पूर्व्वाह्णे कर्म्मोपदेशात् इदमपि पूर्व्वाह्ण एव तस्मादादितः क्रियताम् ? न,—इत्युच्यते। उपन्यासमात्रत्वादस्य। कालोऽपि हि तदीय एव चोदकात् प्राप्नोति। आनुमानिकं खल्वस्य पूर्व्वाह्णकालत्वं चिकल्पयिषितम्। तच्च चोदकं बाधित्वा सेद्धुं नार्हतीति। तस्मात् श्रावणीबलिहरणवत् इदमपि बलिहरणमस्तमयात् परत एव करणीयम्। श्रावणेनैव,—इत्ययमेवकारोऽपि अस्यार्थस्योपोद्बलको भवति ॥ ० ॥ २ ॥ ० ॥

अयमत्र विशेषः,—

नमः पृथिव्या इत्येतं मन्त्रं न जपति ॥ ३ ॥

ऋज्वर्थं सूत्रम् ॥ ० ॥ ३ ॥ ० ॥

अथ पूर्व्वाह्न एव प्रातराहुतिꣳहुत्वा दर्भान् शमीं वीरणां फलवतीमपामार्गꣳ शिरीषमेतान्याहारयित्वा तूष्णीमक्षतसक्तूनामग्नौ कृत्वा ब्राह्मणान् स्वस्तिवाच्यैतैः सम्भारैः प्रदक्षिणमग्न्यागारात् प्रभृति धूमꣳ शातयन् गृहाननुपरीयात् ॥ ४ ॥

प्रातराहुतिं हुत्वा अथानन्तरं पूर्व्वाह्न एव दर्भाहरणादिकं कुर्य्यादिति व्यत्यासेन योजनीयम्। सिद्धाऽपि प्रातराहुतिः पुनरुच्यते कर्म्मक्रमार्थम्। कथं नाम ? प्रातराहुतिं हुत्वैव दर्भाहरणादि, न पुनरौपवसथिकस्थण्डिलोपलेपनादिकमपि कृत्वा,—इति। कथं पुनरेवं ज्ञायते, ननु प्रातराहुतिं हुत्वा अथ स्थण्डिलोपलेपनादिकमपि कृत्वा,—इत्येवमपि शक्यं वर्णयितुम् ? सत्यं शक्यं, तथापि नैवं वर्ण्यते। कस्मात् कारणात् ? यस्मादस्यां वर्णनायामादौ कृतमपि स्थण्डिलोपलेपनमासादितमप्याज्यादिकं पश्चात् धूमशातनवेलायामुपमृद्येत दुष्येत च। तच्चानिष्टम्। तस्मात् पूर्व्वामेव वर्णनामाद्रियामहे।

दर्भादयः प्रसिद्धाः। वीरणा,—वीरण इति यः कथ्यते। फलवती,—वदर्य्याः फलयुक्ता शाखा। तथा चोक्तम्।

"सफला वदरीशाखा फलवत्यभिधीयते"।

इति । तान्येतानि दर्भादीनि षट् केनचिदाहारयित्वा । अन्यस्याहर्त्तुरभावे च स्वयमप्याहृत्य 'तूष्णीं' प्रजापतिं मनसा ध्यायन्नित्यर्थः । एवमेके । तूष्णीममन्त्रकम् । एवमपरे । तदत्र-भगवन्तो भूमिदेवाः प्रमाणम् । 'अक्षतसक्तूनाम्' अवयवलक्षणेयं षष्ठी । यवसक्तूनामेकदेशं दक्षिणहस्तेनादाय 'अग्नौ' 'कृत्वा' प्रक्षिप्य, 'ब्राह्मणान्' बहुवचनात् त्रिप्रभृतीन् 'स्वस्तिवाच्य' स्वस्ति वाचयित्वा (तेभ्यः स्वस्तिवाचनिकं किञ्चित् दत्त्वा) 'एतैः' प्रकृतैः, 'सम्भारैः'—सम्भ्रियन्ते इति सम्भारास्तैः,—एकत्री-कृतैर्दर्भादिभिरित्येतत् । 'प्रदक्षिणं' यथा भवति तथा, 'अग्न्या-गारात् प्रभृति' अग्निगृहादारभ्य, गृहपटलादिसंलग्नं 'धूमं' 'शातयन्' सर्व्वान् 'गृहान्' 'अनु' लक्षीकृत्य, 'परि' सर्व्वतो-भावेन, 'इयात्' गच्छेत् ।

अक्षतसक्तूनाम्,—इति करणात् दर्भादीनामाहरणानन्तरं अक्षतसक्तव उत्पादयितव्याः, ततस्तेषामेकदेशमग्नौ करोति,—इति बोद्धव्यम् । न खल्वनुत्पादितानामक्षतसक्तूनां शक्योऽग्नौ कर्त्तुम् । तस्मादुत्पादयितव्या अक्षतसक्तवः । ननु वर्षास्वहरह-र्बलिहरणार्थं ये अक्षतसक्तवः स्थापिताः, तच्छेषाणां प्रतिपत्ति-रियं स्यात् ? न स्यात् । कुतः ? यतो न खल्वप्रकृतानामसं-शब्दितानां प्रतिपत्तिः शक्या वर्णयितुम् । असन्निधानात् । नि-त्यानित्यसंयोगविरोधाच्च । नित्यं खल्वेतदग्नौ करणम् । अनित्यश्च बलिशेषः । न चानयोः संयोगः सम्भवति । तस्मादुत्पादयितव्या एवाक्षतसक्तवः ।' एवमेके ।

अपर आह । वर्षास्वहरहर्बलिहरणार्थं ये अक्षतसक्तवः

स्थापिताः, तच्छेषाणां प्रतिपत्तिरेवेयम्,—इति। न च नित्या-नित्यसंयोगविरोधः शङ्कनीयः। अस्यापि नित्यत्वे प्रमाणा-भावात्। न खलु शेषाणां प्रतिपत्तिरियमित्यस्यां वर्णनायाम् अस्य नित्यत्वं शक्यते वक्तुम्। न चात्रान्यत् किमपि प्रमाणं पश्यामः।

स्यादेतत्। अप्रकृतानामसंशब्दितानामसन्निहितानां कथं प्रतिपत्तिर्व्वर्ण्यते? उच्यते। नात्यन्तमप्रकृता असन्निहिता-श्चाक्षतसक्तवः। कथम्? इत्थम्। ये खल्वक्षतसक्तवो वर्षा-स्वहरहर्ब्बलिहरणार्थं स्थापितास्तैरेव आग्रहायणीपर्य्यन्तं बल-यो हर्त्तव्याः,—इति स्थितम्। एवञ्चास्त्येव तेषां कियन्मात्रमपि प्रकृतत्वं सन्निहितत्वञ्चाग्रहायण्या। तथाच सत्यकिञ्चित्करमसंश-ब्दितत्वम्। अपि च। अस्मिन् शास्त्रे "पानव्यापच्च तद्वत्"—इत्यादिवत् व्यवहितस्याप्यभिसम्बन्धः आचार्य्यस्यानुमतः। कथं ज्ञायते? आचार्य्यपुत्रवचनात्। तथा च गृह्यासंग्रहः।

"पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम्।
गोभिले ये न गृह्णन्ति न ते जानन्ति गोभिलम्"।

इति। तस्मादसन्निहितानामप्यस्तु सम्बन्धः। तत्र ब्रूमः। नित्य-प्रकरणाम्नानात् गौतमेनाग्रहायणी कर्म्मणः पुरुषसंस्कारमध्ये पठितत्वाच्चास्य नित्यत्वावगतेरेतदक्षतसक्तूनामग्नौ करणमनित्य-मित्यसमीचीनं वचनम्। तस्मात् पूर्व्वोक्त एवार्थ आदरणीयः॥ ॥०॥४॥०॥

उत्सृजेत् कृतार्थान् सम्भारान्॥५॥

अर्थः प्रयोजनम्। तच्च धूमघातनलक्षणम्। कृतोऽर्थो यैः, तान् सम्भारान् दर्भादीन् उत्सृजेत्। अर्थात् प्राप्तस्याप्युत्सर्गस्य वचन-मानन्तर्य्यार्थम्। कथं नाम? धूमघातनानन्तरक्षण एवोत्सृजेत् न क्षणमपि गृहे धारयेत्—इति॥०॥५॥०॥

एतस्मिन् क्रमे औपवसथिकं स्थण्डिलोपलेपनादि कृत्वा,—

जातशिलासु मणिकं प्रतिष्ठापयति वास्तोष्पत-इत्येतेन द्विकेन सर्व्वेन॥६॥

जातशिलाः,—

"घना विसिकताश्चक्षाः स्मृता जातशिलास्तु ताः"।

इत्युक्तलक्षणाः। तासु, बहुवचनात् त्रिप्रभृतिषु, मणिकमलिञ्जरं महदुदकभाण्डमित्येतत्। प्रतिष्ठापयति स्थापयति। वास्तोष्पते,—इत्येतस्यां ऋचि गीयमानेन द्विकेन साम्ना—सर्व्वेन प्रकृतयैव ऋचा सह वर्त्तमानेन,—इत्यर्थः। द्विकेन साम्ना ऋचा चेति यावत्। ननु, एतेन—इति शक्यमवक्तुम्, अथोच्यते,—कारणं वक्तव्यम्? क्रमार्थमित्याह। द्विकेन सर्व्वेन—इत्येतावत्युच्यमाने न ज्ञायते,—किं द्विकात् पुरस्तादृक् स्यात्? आहोस्वि-दुपरिष्टात्? उताहोमध्ये? अथ वा प्रतिसाम? यद्वा सूत्रन्या-यादुभयतः?—इति। तदेतन्निरासार्थमाचार्य्यः एतेन—इत्याह। एतेन एवम्भूतेन यथाक्रमोपन्यस्तेनेत्यर्थः। तेन, पूर्व्वं द्विकमु-च्चार्य्य पश्चादृचमुच्चारयेत्॥०॥६॥०॥

द्वावुदकुम्भौ मणिक आसिञ्चेत् समन्यायन्तीत्येतयर्चा ॥ ७ ॥

द्वौ उदकपूर्णौ कुम्भौ प्रतिष्ठापिते मणिके आसिञ्चेत् समन्यायन्ति,—इत्येतया ऋचा। ऋक्ग्रहणं सामप्रतिषेधार्थम्। अत्र प्रतिकुम्भम् ऋगावृत्तिर्बोद्धव्या। कस्मात्? "भेदे मन्त्रावृत्तिः"—इति सूत्रणात्। तथा चोक्तम्। "प्रतिकुम्भमृचं पठेत्"—इति। सोऽयं मणिकसंस्कारः। एवञ्च, "मणिकाद्वा गृह्णीयात्"—इति यदुक्तं, तदेतस्मात् संस्कृतान्मणिकाद्ग्रहणीयम्। यच्च, उदधानस्य बलिहरणमुक्तं, तदप्येतस्यैवेति बोद्धव्यम्।

अत्रेदं सन्दिह्यते। आग्रहायण्या ऊर्द्ध्वं यदि मणिको नष्टो-विनष्टो वा भवति, तदा किमेतावन्तं कालमपेक्ष्य पुनराग्रहायण्यामागतायामेव मणिकान्तरं संस्करणीयम्, उत यदैव विपद्यते तदैवान्यदाहृत्य?—इति। तदैव,—इति ब्रूमः। कस्मात्? अस्य कर्म्मार्थत्वात्। तावन्तं कालं मणिकाभावे हि कर्म्मणोनाभिनिष्पत्तिः स्यात्, स्याद्वा न सुकरा भवेत्। तथा चोक्तम्।

"नष्टो विनष्टो मणिकः शिलानाशे तथैव च।
तदैवाहृत्य संस्कार्य्यौ नापेक्षेदाग्रहायणीम्"।

इति। यदि पुनरन्यस्यामाग्रहायण्यामागतायामपि पूर्व्वसंस्कृत एव मणिको दृढ़ो वर्त्तते, तदोदकुम्भासेचनमात्रं कर्त्तव्यम्। कुतः?

"हुतश्चेदाग्रहायण्यामाहुत्यावपि कर्म्मणः।
कुर्थ्यो मन्त्रवदासिञ्चेत् प्रतिकुम्भमृचं पठेत्"।

इति वचनात् ॥ ० ॥ ७ ॥ ० ॥

प्रदोषे पायसश्चरुः ॥ ८ ॥

आग्रहायण्यामित्येव। आग्रहायण्यै त्वा जुष्टं निर्व्वपामि,—इति निर्व्वापः। कुतः ? देवतान्तरस्यानुपदेशात् मन्त्रस्य चाव्यक्तलिङ्गत्वात् श्रुताया एवाग्रहायण्यादेवतात्वस्य कल्पयितुमुचितत्वात्। "अनाम्नातेषु तथादेशम्"—इत्यग्रे सूत्रणाच्च ॥ ० ॥ ८ ॥ ० ॥

तस्य जुहुयात् प्रथमा ह व्युवासेति ॥ ९ ॥

व्याख्यातप्रायमेतत् ॥ ० ॥ ९ ॥ ० ॥

स्थालीपाकावृताऽन्यत् ॥ १० ॥

कृतभाष्यं सूत्रम् ॥ ० ॥ १० ॥ ० ॥

पश्चादग्नेर्व्वर्हिषि न्यञ्चौ पाणी प्रतिष्ठाप्य प्रतिक्षत्र इत्येता व्याहृतीर्जपति ॥ ११ ॥

अग्नेः पश्चिमतः वर्हिषि कुशोपरि न्यञ्चौ अधोमुखौ पाणी पूर्व्वोक्तप्रकारेण प्रतिष्ठाप्य, प्रतिक्षत्र इत्येताः प्रतिशब्दा व्याहृतीर्जपति। व्याहृतिग्रहणं स्तुत्यर्थम्। अत्राग्रहायणीकर्म्मणः परिसमाप्तिः। वामदेव्यमिदानीं गातव्यम्। यदि कैश्चित् कथञ्चित् श्रवणाकर्म्म न कृतं, तदा तैराग्रहायण्यां बलयो न हर्त्तव्याः, सर्व्वमन्यत् पूर्व्ववदेव करणीयम्। तथा चोक्तम्।

"श्रवणाकर्म्म लुप्यत कथञ्चित् सूतकादिना ।
आग्रहायणिकं कुर्य्याद्बलिवर्ज्जमशेषतः" ।

इति ॥ ० ॥ ११ ॥ ० ॥

अथेदानीं स्वस्तरारोहणं प्रस्तूयते,—

पश्चादग्नेः स्वस्तरमास्तारयेत् ॥ १२ ॥

ऋजुरक्षरार्थः । अत्र किञ्चिद्वक्तव्यमस्ति । पश्चादग्नेरिति करण-मग्न्यागारनियमार्थम् । तेन, अग्न्यागार एव स्वस्तरास्तरणं कर्त्तव्यम् । एवञ्च, अग्न्युपदेशस्यान्यार्थत्वादहोमकोऽयम्—इति केचित् । पुंसवनादिवत्तु अयमपि सहोमक एव स्यात्—इति अपरे । प्रागवसस्मादुदगयने यत् पुण्यमहस्तत्र पूर्व्वमन्वाहार्य्य-श्राद्धं कृत्वा सायं बलिहरणान्ते नित्यकर्म्मणि कृते, स्वस्तरास्तरणं करणीयम् । तथा च गृह्यान्तरम् । "प्रागवसस्मादुदगयने पुण्येऽह्नि सायं स्वस्तरमुदगग्रमास्तीर्य्य"—इत्यादि । अस्मद्गृह्यकारपरिभाषा-सिद्धमुदगयनादिमात्रं वा स्वस्तरारोहणस्य कालः स्यात् । केचि-त्तु,—"ऊर्द्ध्वं स्वस्तरशायी स्यात्"—इति वचनमालोचनमात्रेण पश्यन्तः, आग्रहायण्यङ्गत्वं स्वस्तरारोहणस्य मन्यमानाः, तत्रैवा-वसरे स्वस्तरास्तरणम्—इच्छन्ति । तदसङ्गतम् । ऊर्द्ध्वमित्येनेना-ग्रहायण्या ऊर्द्ध्वत्वमात्रस्यावगमात् ।

"पारिभाषिक एव स्यात् कालो गोवाजियज्ञयोः ।
अन्यस्यानुपदेशात्तु स्वस्तरारोहणस्य च" ।

इति परिशिष्टवचनविरोधाच्च ॥ ० ॥ १२ ॥ ० ॥

उदगग्रैस्तृणैः ॥ १३ ॥

स्रस्तरमास्तारयेदिति वर्त्तते ॥ ० ॥ १३ ॥ ० ॥

उदक्प्रवणम् ॥ १४ ॥

उत्तरस्यां दिशि क्रमनिम्नं स्रस्तरमास्तारयेत् ॥ ० ॥ १४ ॥ ० ॥

तस्मिन्नहतान्यास्तरणान्यास्तीर्य्य दक्षिणतो गृह-पतिरुपविशति ॥ १५ ॥

तस्मिन् स्रस्तरे अहतान्यखण्डितानि आस्तरणानि कम्बलादीनि आस्तीर्य्य, दक्षिणतः—स्रस्तरस्य दक्षिणे भागे, गृहपतिरुपविशति ॥ ० ॥ १५ ॥ ० ॥

तस्य चोत्तरतः,—

अनन्तरा अवरे यथाज्येष्ठम् ॥ १६ ॥

अवरे कनिष्ठाः, अनन्तराः अव्यवहिताः सन्तो यथाज्येष्ठं ज्येष्ठा-नुक्रमेणोपविशन्ति। यो यो ज्येष्ठः स स गृहपतेरनन्तरो यथा स्यादित्यर्थः।

एवं वा,—

अनन्तरा अव्यवहिताः—एकपाकोपजीविनः तद्गृह्या इत्येतत्। तदेवम्भूता अवरे यथाज्येष्ठमुपविशन्ति ॥ ० ॥ १६ ॥ ० ॥

तेषामप्युत्तरतः,—

अनन्तराश्च भार्य्याः सजाताः ॥ १७ ॥

अनन्तराः,—इत्युक्तार्थम्। भार्य्याः गृहपतिप्रभृतीनां पत्न्यः

सजाताः सापत्या उपविशन्ति । जातमपत्यम् । चशब्दः उपवेशन-क्रमविशेषद्योतनार्थः । कथं नाम ? येन क्रमेण गृहपतिप्रभृतय-उपविष्टाः, तेनैव क्रमेण तेषां भार्य्या अप्युपविशेयुः । अपत्या-न्यपि स्वस्याः स्वस्या मातुरुत्सङ्गे उत्तरतो वा उपविशेयुः,—इति ।

अथैवम्, अत्र यथाज्येष्ठमुपवेशनं न स्यात्? मा भवतु, का नो-हानिः । अथवा । पत्युरेव वयसा स्त्रीणां वृद्धत्वस्मरणात् पतीनाञ्च यथाज्येष्ठमुपवेशनात् भार्य्याणां स्वस्वपतिक्रमेणोपवेशने यथा-ज्येष्ठत्वमपि कथञ्चिदनुगृह्यत एव । परमार्थतस्तु, सजातानां भार्य्याणामुपवेशनं सूत्रयन्नाचार्य्यो नात्र यथाज्येष्ठमुपवेशनमनु-जानातीत्यवगम्यते । एतदर्थं चशब्दं प्रयुक्तवान् । भार्य्याः पुनः सापत्या उपविशन्ति, न पुनरत्रापि यथाज्येष्ठत्वनियमः,—इत्य-भिप्रायः । न खल्वेवमपत्यानां यथाज्येष्ठमुपवेशनं सम्भवति । अन्ये पुनरत्रापि यथाज्येष्ठमुपवेशनमिच्छन्ति ॥ ० ॥ १७ ॥ ० ॥

समुपविष्टेषु गृहपतिः स्वस्तरे न्यञ्चौ पाणी प्रति-ष्ठाप्य स्योना पृथिवि नो भवेत्येतामृचं जपति ॥ १८ ॥

समुपविष्टेषु,—सम्यक् - प्राङ्मुखेषु उपविष्टेषु सत्स्वित्यर्थः । क-स्मात् ? "प्राङ्मुखकरणञ्चानादेशे"—इति सूत्रकारवचनात् । स्पष्टमन्यत् । एतामिति स्वरवर्णसम्पादनार्थं छन्दोविज्ञानार्थं-मविलोपार्थञ्च । कथं नाम ? एतामेवम्भूतां सेतिकरणामेव जपतीति । अन्यथा खल्वितिकरणविलोपमपि कश्चिदाशङ्कीत ॥ ॥ ० ॥ १८ ॥ ० ॥

समाम्नायाथं संविशन्ति दक्षिणैः पार्श्वैः ॥ १६ ॥

समाम्नायामेव ऋचि दक्षिणैः पार्श्वैः संविशन्ति, स्वपन्ति। तस्मिन्नेव स्तरे ॥ ० ॥ १६ ॥ ० ॥

एवं त्रिरभ्यात्ममावृत्य ॥ २० ॥

एवमनेन प्रकारेण—दक्षिणपार्श्वेनेत्यर्थः। अनन्तरोक्तं संवेशनमेव न तु स्वस्तरास्तरणमपीति द्रष्टव्यम्। त्रिरावृत्य त्रिःकृत्वोऽभ्यस्य। किमविशेषेणैव? न। कथन्तर्हि? अभ्यात्मम्। आत्मनो गृहपतेराभिमुख्येन,—आत्मन आरभ्येत्यर्थः। कथं नाम? येनैव क्रमेणोपविष्टाः तेनैव क्रमेण संवेशनं त्रिरावर्त्तयेयुः,—इति। प्रथमेन सहैव त्रित्वम् ॥ ० ॥ २० ॥ ० ॥

स्वस्त्ययनानि प्रयुज्य यथाज्ञानम् ॥ २१ ॥

स्वस्त्ययनानि अप्रतिरथादीनि यथाज्ञानं प्रयुज्य—यो यत् जानाति स तदुच्चार्य्य ॥ ० ॥ २१ ॥ ० ॥

अरिष्टथं साममंयोगमेके ॥ २२ ॥

अरिष्टं अरिष्टवर्गाख्यं साममंयोगं—सामसमुदायं "अबोध्यग्निर्मस्त्रिणामिति द्वे"—इत्यादिकं प्रयुज्य इत्येके आचार्य्या मन्यन्ते ॥ ० ॥ २२ ॥ ० ॥

अप उपस्पृश्य यथार्थम् ॥ २३ ॥

अप उदकमुपस्पृश्य दक्षिणेन पाणिना स्पृष्ट्वा, यथार्थमिति कर्म्मणः परिसमाप्तिं दर्शयति। तेन वामदेव्यगानमिदानीं स्यात्। अन्ये

तु,—स्वस्त्ययनात् परत एव वामदेव्यगानमिच्छन्ति। यथार्थमिति,—इदानीं कर्म्मणः परिसमाप्तत्वात् यस्य यदभिप्रेतं स तत् कुर्य्यात्, न तु तत्रैवावस्थाननियमः,—इति व्याकुर्व्वते च। गृहपतेः किल बहवः पक्षाः स्वस्तरशयने ग्रन्थान्तरे पठ्यन्ते। स यदि सद्यःपक्षमाश्रयेत्, तदा स्वस्तरादुत्थाय अभिप्रेते शयनान्तरे शयीत। अथान्यपक्षमाश्रयेत्तर्हि तत्रैव स्वपेत्। तथा चोक्तम्।

"ऊर्द्ध्वं स्वस्तरशायी स्यान्मासमर्द्धमथापि वा।
सप्तरात्रं त्रिरात्रं वा एकां वा सद्य एव वा।
नोर्द्ध्वं मन्त्रप्रयोगः स्यान्नाग्न्यगारं नियम्यते।
नाहतास्तरणञ्चैव न पार्श्वञ्चापि दक्षिणम्"।

इति। प्रथमाया रात्रेरूर्द्ध्वमन्यासु रात्रिषु स्वस्तरशयने स्वस्त्ययनमुत्तरश्लोकोक्तो विशेषोद्रष्टव्यः॥०॥२३॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य नवमी खण्डिका॥०॥

तृतीयप्रपाठके दशमी खण्डिका ।

अथेदानीमष्टकाकर्म्म प्रस्तूयते,—

अष्टका रात्रिदेवता ॥ १ ॥

अष्टका,—इत्येकवचनमधिकारार्थम् । उपरिष्टादष्टकाबहुत्वस्योपदेशात् । तथाच, या काचिदष्टका वक्ष्यमाणा सा सर्व्वा रात्रिदेवता प्रत्येतव्या, न पुनरानन्तर्य्यादपूपाष्टकैव । रात्रिर्देवता यस्याः सेयं रात्रिदेवता अष्टका, कर्त्तव्या,—इति सूत्रशेषः ॥ ० ॥ १ ॥ ० ॥

सा खल्वियमष्टका,—

पुष्टिकर्म्मा ॥ २ ॥

पुष्टिः कर्म्म फलमस्या इति पुष्टिकर्म्मा । पुष्टिकर्म्म,—इति पाठे पुष्टये कर्म्म पुष्टिकर्म्म । तदिदमष्टकाकर्म्म पुष्टये भवतीति तदर्थः । आह । ननु, परस्तादप्यष्टकादेवताः सूत्रयिष्यन्ते, तत् किमिति पुष्टिकर्म्मा,—इति मध्ये सूत्रयित्वा रात्रिदेवतायाः सूत्रयिष्यमाणानाञ्च देवतानां व्यवायः क्रियते ? उच्यते । अष्टका रात्रिदेवता,—इति निर्व्विशेषितमष्टकाकर्म्मोपदिश्य, पुष्टिकर्म्मा, —इति परतः कुर्व्वन् नित्यत्वमस्यादर्शयति । कथं नाम ? रात्रिदेवता तावदष्टका कर्त्तव्या, पुष्टिः फलमप्यस्या एव भवति, न

पुनः पुष्टिकाम एवाष्टकास्वधिक्रियते,—इति । कथं ज्ञायते ? कर्त्तव्यचोदनायां फलाश्रवणात् । अधिकारवेलायां तदनुपदेशाच्च । यदि पुनरष्टका पुष्टिकर्म्मा,—इति कुर्य्यात्, तर्हि रात्रिसत्र-न्यायेन सन्निहिततरं पुष्टिफलमेव कामयमानस्तामधिकरोति,—इत्यपि कस्यचिदाशङ्का स्यात् । सा माभूदिति खल्वाचार्य्यः अष्टका रात्रिदेवता पुष्टिकर्म्मा,—इति व्यत्यासेन प्रयुङ्क्ते । काम्य-तैवाष्टकानां कुतो न स्यात् ? व्यत्यासेन फलवादाम्नानान्नित्यत्वा-वगतेरिति ब्रूमः । नित्यप्रकरणे चोपदेशात् । नित्यानां हि श्रवणाकर्म्मादीनां प्रकरणे अष्टका उपदिश्यते । तस्मात् साऽपि नित्या भवितुमर्हति । तथा गौतमेनापि नित्यानामेव पुरुष-संस्काराणां मध्ये,—"अष्टकापार्व्वणश्राद्धश्रावण्याग्रहायणीचैत्रा-श्वयुजी"—इत्यष्टका सूत्रिता । कर्म्मप्रदीपोऽप्याह ।

"संस्काराः पुरुषस्यैते स्मर्य्यन्ते गौतमादिभिः ।
अतोऽष्टकादयः कार्य्याः सर्व्वे कालक्रमोदिताः" ।

इति । उपदेशादेव सर्व्वेषामविशेषेण करणे सिद्धे पुनः करणोप-देशोऽवश्यंकरणमेव बोधयति । अष्टकादिप्रक्रमे तदकरणे दोष-श्रवणाच्च । तथा चोक्तम् ।

"यस्त्वाधायाग्निमालस्याद्देवादीन्नैभिरिष्टवान् ।
निराकर्त्ताऽमरादीनां स विज्ञेयो निराकृतिः"

इति । तस्मादष्टका नित्येति सिद्धम् । अत्राह । यदि नामाष्टका नित्या, तर्हि पुष्टिकर्म्मापि कथं भवति ? उच्यते । अस्तु नाम नित्या, काम्याऽपि भविष्यति । कस्मात् ? फलोपदेशस्यार्थवत्त्वोप-पत्तेः । यद्वा । फलवाद एवायमष्टकां स्तौति, न पुनः फलमप्य-

मेनोपदिश्यते । किं कारणम् ? उभयविधाने वाक्यभेदः । पाठान्तरेऽपि "ऊर्ज्जोऽवरुद्धै"—इत्यादिवत् फलवादत्वं बोद्धव्यम्। अथवा । नित्यत्वेऽप्यानुषङ्गिकमेव पुष्टिफलं भविष्यति ।

"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिम्" ।

इति स्मरणात् । यथैवं समस्ता एव देवता उपदिश्य परत एव पुष्टिकर्म्मा,—इति कुतो न सूत्रितम् ? परत एव वक्ष्यामः । अन्ये त्वाहुः,—"तथात्वे पुष्टिकर्म्म चतुरष्टको हेमन्तः,—इत्युत्तर-सूत्रेणैकसूत्रताशङ्का स्यात् , अतस्तथा न कृतम्"—इति ॥ ० ॥ ॥ २ ॥ ० ॥

आग्नेयी पित्र्या वा प्राजापत्यर्त्तुदेवता वैश्वदेवीति देवताविचाराः ॥ ३ ॥

अग्नेरियमाग्नेयी । प्रकृतत्वादष्टकेति सम्बध्यते । पितॄणामियं पित्र्या । प्रजापतेरियं प्राजापत्या । ऋतवो वसन्तादयः, ते देवता यस्याः सेयमृतदेवता । विश्वेदेवाः सर्व्वेदेवाः, तेषामियं वैश्वदेवी । वाशब्दः प्रत्येकमभिसम्बध्यते । आग्नेयी वा पित्र्या वा प्राजापत्या वा ऋतुदेवता वा वैश्वदेवी वा । इति एते देवता-विचारा भवन्ति ।

इदमिदानीं सन्दिह्यते । किं पशुप्रोक्षणनिर्व्वापहोमेष्वेत-द्विकल्पोक्तानां देवतानां मध्यादिच्छया अन्यतमस्या अभि-सन्धानं कर्त्तव्यम् ? आहोस्वित् सर्व्वासाम् ? उताहो नैकस्या-अपि ? इति । नैकस्या अपि,—इति ब्रूमः । किंदेवताका तर्ह्यष्टका ? न खल्वदेवताका भवितुमर्हति । उच्यते । न-

वयमदेवताकामष्टकामाचक्ष्महे, रात्रिदेवताकान्तु ब्रूमहे। कस्मात् पुनः कारणात् सतीष्वेतद्विकल्पोक्तास्वन्यास्वपि देवतासु रात्रिदेवतैवाष्टकाऽभ्युपगम्यते ? सूत्रप्रमाणादित्याह। अष्टका रात्रिदेवता,--इति खल्वाचार्य्येण सूत्रितम्। तत्प्रामाण्यात् रात्रिदेवता अष्टका अभ्युपगम्यते। ननु, आग्नेयी पित्र्या वा,--इत्येतदप्याचार्य्यस्यैव सूत्रम् ? सत्यमाचार्य्यस्यैव सूत्रमेतत्, किन्तु नैतत् देवताविधानार्थं परन्तु परमतोपन्यासार्थम्। कथं पुनरवगम्यते,--परमतोपन्यासार्थमेतदिति। शृणु यथाऽवगम्यते। अष्टका रात्रिदेवता,--इति देवतामष्टकायाः सूत्रयित्वा, पुष्टिकर्म्मा,--इति च फलवादम्, आग्नेयीत्यादिकं सूत्रयन्नाचार्य्यः परमतमेतदिति दर्शयति। तदिदमर्थं पुष्टिकर्म्मा,--इति मध्ये सूत्रितम्। अन्यथा देवतोपदेशानां मध्ये फलवादोपन्यासोऽनुचित एव स्यात्।

यच्च,--उत्तरेण सूत्रेण सहैकसूत्रताशङ्का-निरासार्थं मध्य एव फलवादोपन्यासः,--इति वर्णितम्। तदपि नातीव समीचीनम्। कस्मात् ? तदाशङ्काया अकिञ्चित्करत्वात्। एकसूत्रतायामपि क्षतेरभावाच्च। तस्मात्, अष्टका रात्रिदेवता पुष्टिकर्म्मा,--इत्यनेन स्वमतमभिधाय आग्नेयीत्यादिना परमतमादर्शितम्--इत्यादरणीयम्। गृह्यान्तरेऽप्येकैकमतपरतयैवैतासां देवतानामुपन्यासो दृश्यते। तथाच गृह्यान्तरम्। "तां हैके वैश्वदेवीं ब्रुवत आग्नेयीमेके ** प्राजापत्यामेके रात्रिदेवतामेके ** ऋतुदेवतामेके पितृदेवतामेके"--इति। तस्मादेता देवता नैकस्याभिमताः अपि त्वेकैका देवता एकैकस्याचार्य्यस्य। तत्र, "रात्रिदेवतामेके" --इत्येतदस्मदाचार्य्यमतस्योपन्यासः,--इति बोद्धव्यम्। अएतव

आचार्य्येण,—"अष्टका रात्रिदेवता"—इति सूत्रयित्वा, "इति देवताविचाराः"—इति सूत्रितं, न देवताविकल्पाः—इति। एतासां देवतानां स्वाभिमतत्वे तु, "नव षट् त्रय इति विकल्पः" —इतिवत् "देवताविकल्पाः",—इत्येव कुर्य्यात्। तस्मात्,—देवताविचारा एवैते, न पुनरेता देवता भवन्ति। देवता त्वस्याभिमतैव,—अष्टका रात्रिदेवता,—इति। सोऽयमाचार्य्यस्याभिप्रायः। देवताविचारप्रकारश्च बुद्धिमद्भिरूहनीयः। ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः।

यत्र मन्त्रलिङ्गमग्न्यादीनामस्ति, न तद्देवताश्रुतिचोदितां रात्रिं बाधितुमीष्टे। दुर्बलं हि लिङ्गं श्रुतेरिति खल्ववोचाम। यथा च, मन्त्रलिङ्गावगताऽपि देवता तद्धितशिष्टया देवतया बाध्यते, तथैव देवताशब्दशिष्टयाऽपि बाधिष्यते। न्यायस्याविशेषात्। अन्ये तु मन्यन्ते,—"अन्यतरस्या देवताया अभिसन्धानं न घटते। कुतः? मध्यमाष्टकायाम्, अग्नावग्निः,—इति मन्त्रलिङ्गविरोधात्। तस्मात्, सर्व्वासामभिसन्धानं कर्त्तुं युक्तम्। अत्रापि यत्र मन्त्रान्तरेण होमः, तत्र होमकाले मन्त्रदेवतामेवाभिध्यायेत्। तथैव तत्राभिध्याततया भक्तिसाहचर्य्यात् सर्व्वा अप्येकदा देवता अभिध्याता इष्टाश्च भवन्ति" —इति ॥ ० ॥ ९ ॥ ० ॥

कियत्यः पुनरष्टका भवन्ति? उच्यते,—

चतुरष्टको हेमन्तः ताः सर्व्वाः समाꣳसाश्चिकी-

षेदिति कौत्सः * ॥ ४ ॥

चतस्रोऽष्टका यस्मिन्, सोऽयं चतुरष्टको हेमन्तः ऋतुविशेषः। तदिदं ऋतुसंवत्सराभिप्रायं सूत्रम्। एतदुक्तं भवति। हेमन्त-मासचतुष्टये चतस्रोऽष्टका भवन्ति,--इति। ताः सर्व्वाश्चतस्रो-ऽप्यष्टकाः समांसाः मांससहिताश्चिकीर्षेत् कर्त्तुमिच्छेत्। चिकी-र्षेत्,--इति गुरुकरणं केनाप्युपायेन मांससम्पत्तिं कर्त्तुमिच्छे-दित्युपदेशार्थम्। इति,--अनन्तरोक्तं,--चतस्रोऽष्टकाः--इति, तासु सर्व्वासु मांसम्--इति च, कुत्सस्यापत्यं कौत्स आचार्यो-मन्यते ॥ ० ॥ ४ ॥ ० ॥

त्र्यष्टक इत्यौद्गाहमानिः ॥ ५ ॥

तिस्रोऽष्टका यस्मिन्, सोऽयं त्र्यष्टको हेमन्तः,--इत्यौद्गाहमानि-राचार्य्यो मन्यते। उद्गाहमानस्यापत्यमौद्गाहमानिः ॥ ० ॥ ५ ॥ ०॥
यथौद्गाहमानिराचार्य्यो मन्यते,--

तथा गौतमवार्कखण्डी ॥ ६ ॥

आचार्य्यावपि मन्येते। एवञ्च, औद्गाहमानिगौतमवार्कखण्डी-नामाचार्य्याणामनुमतस्त्र्यष्टकपक्ष एवास्मदाचार्य्यस्याप्यभिप्रेतः,--

* अत्र भट्टभाष्ये 'चतुरष्टको हेमन्तः'--इति 'ताः सर्व्वाः समांसा-श्चिकीर्षेदितिकौत्सः'--इति सूत्रद्वयं कल्पितम्। चतुरष्टकपक्षस्यापि कौत्सीयत्वात् भट्टभाष्यीयमुत्तरसूत्रं 'ताः सर्व्वाः समांसाश्चिकीर्षेत्'-- 'इति कौत्सः'--इति च द्विधा भङ्क्त्वा सूत्रत्रयं कल्पितमासीन्मया प्रथम-संस्करणे। इदानीन्तु तयोरेकसूत्रत्वमेवोचितं पश्यता तथैव कृतम्।

इत्यवगच्छामः। कस्मात्? तिसृणामेव परतः कर्म्मोपदेशात्। अस्मिंश्च पक्षे मध्यमाष्टकैव समांसा कर्त्तव्या। कस्मात्? प्रथमामतिक्रम्य मध्यमायामेव तदुपदेशात्। इतरयोर्द्रव्यान्तरोपदेशाच्च। एवमेतस्मिन् पक्षे अन्वष्टक्यमपि मध्यमायामेव भवति। कस्मात् कारणात्? तस्याष्टकासंज्ञपितपशुसाध्यत्वात्। मध्यमाष्टकायामेव च पशुसंज्ञपनोपदेशात्। तथाच वक्ष्यति,--"वामं सक्थ्यन्वष्टक्याय निदध्यात्"--इति। तथा चोक्तम्।

"अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ।
वार्कखण्डिश्च, सर्व्वासु कौत्सो मेनेऽष्टकासु च"।

इति। वचनस्य खल्वेतस्योक्तन्यायमूलतया त्र्यष्टकपक्ष एव गोभिलाचार्य्यस्यानुमतः,--इति, भङ्ग्यन्तरेण कात्यायनः स्पष्टयाञ्चकार। कौत्सस्य पुनराचार्य्यस्य मते सर्व्वासामेवाष्टकानां समांसत्वात् सर्व्वस्वेवान्वष्टक्यं सम्भवति,--इति द्रष्टव्यम्। तस्मादाचार्य्येण चतुर्थ्या अष्टकायाः कर्म्मासूत्रणात् त्र्यष्टकपक्ष एवादरणीयः। चतुरष्टकपक्षस्तु कौत्सानुमतोऽपि बहुभिर्व्विरोधादुपरोक्ष्यः। अथाच वाक्यार्थविद्भिरभिहितम्।

"अल्पानां यो विघातः स्यात् स बाधो बहुभिः स्मृतः।
प्राणसम्मित इत्यादि वाशिष्ठं बाधितं यथा।
विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्।
तुल्यप्रमाणसत्त्वे तु न्याय एव प्रवर्त्तकः"।

इति॥ ० ॥ ६ ॥ ० ॥

अथेदानीं तिस्रोऽष्टकाः क्रमेणोपदेष्टुमाह,

योऽसौमाग्रहायण्यास्तामिस्राष्टमी तामपूपाष्टके-त्याचक्षते ॥ ७ ॥

आग्रहायण्याः पौर्णमास्याऊर्द्धं परतो या तामिस्रा कृष्णपक्षीया अष्टमी। तमिस्राष्टमी,—इति केचित् पठन्ति, तत्रापि स एवार्थः। तां अपूपाष्टका,—इति आचक्षते कथयन्ति आचार्य्याः। यथेय-मपूपविधानादपूपाष्टका भण्यते, तथा मध्यमाऽपि मांसविधाना-न्मांसाष्टका, अन्तिमाऽपि शाकविधानात् शाकाष्टकोच्यते,—इति द्रष्टव्यम्। अथैवम्,—अपूपविधानादेवाभिधाने सिद्धे 'अपूपाष्टके-त्याचक्षते',—इत्येतदवाच्यम्? उच्यते। एवन्तर्हि गुणार्थोऽय-मनुवादो भविष्यति। कथं नाम? ब्राह्मणभोजनार्थमप्यपूपाः कर्त्तव्याः,—इति। एवञ्च, अष्टकाविहितमन्यदपि यत् कर्म्म—श्राद्धं, तदप्यपूपैः करणीयमिति सिध्यति। तथाच पुराणेषु स्मर्य्यते।

"आद्याऽपूपैः सदा कार्य्या मांसैरन्या भवेत् सदा।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः"।

इति ॥ ० ॥ ७ ॥ ० ॥

स्थालीपाकावृता तण्डुलानुपस्कृत्य चरुꣳश्रपयति ॥ ८ ॥

स्थालीपाकरीत्या पूर्व्वोक्तया, तण्डुलानुपस्कृत्य संस्कृत्य चरुं श्रप-यति ॥ ० ॥ ८ ॥ ० ॥

अष्टौ चापूपान् कपालेऽपरिवर्त्तयन् ॥ ९ ॥

अष्टसङ्ख्याकान् मण्डकान्। तथा चोक्तम्।

"त्रैयम्बकं करतलमपूपा मण्डकाः स्मृताः।
पालाशा गोलकाश्चैव लौहचूर्णश्च चीवरम्"।

इति। कपाले,—

"कपालं मृन्मयं पात्रं चक्राघटितमुच्यते।
आसुरं चक्रघटितं दैवे पैत्रे च वर्ज्जयेत्"।

इत्युक्तलक्षणे, अपरिवर्त्तयन् परिवर्त्तनमकुर्व्वन्। चशब्दात् श्रपयति,—इत्यनुषज्यते ॥ ० ॥ ९ ॥ ० ॥

किमेकस्मिन्नेव कपाले अष्टावपूपान् श्रपयति? न। कथन्तर्हि? उच्यते,—

एककपालान् ॥ १० ॥

एकैककपालान्—इत्यर्थः। तथाच, एकैकस्मिन् कपाले एकैकमपूपं श्रपयति। कथं ज्ञायते? सूत्रारम्भस्यार्थवत्त्वादित्याह। कपाले,—इत्येतावन्मात्रसूत्रणादप्यविशेषादेकस्मिन्नेव कपाले भविष्यति, किं सूत्रान्तरारम्भेण? तस्मात् सूत्रान्तरारम्भादवगच्छामः,—एकैकस्मिन् कपाले एकैकस्यापूपस्य श्रपणम् इति।

ननु, अविशेषात् द्वे त्रीणि वा कपालान्यपि प्राप्नुयन्ति? प्राप्नुवन्तु नाम, तावताऽप्येकस्मिन् कपाले क्रियत एव। क्रियते चेत्,—तत्रैव क्रियताम्, अलं कपालान्तरकल्पनया? तस्मादेकैककपालान्—इत्यस्मदुक्तैव वर्णना। तथा चोक्तम्।

"पृथक्कपालान् कुर्व्वीत अपूपानष्टकाविधौ"।

इति ॥ ० ॥ १० ॥ ० ॥

कपालप्रसङ्गात् पुरोडाशधर्म्माणामपि प्रसङ्गं कश्चिदाशङ्कीत, अतस्तन्निषेधार्थमाह,—

अमन्त्रानित्यौद्गाहमानिः ॥ ११ ॥

अमन्त्रान् मन्त्ररहितानष्टावपूपानित्यौद्गाहमानिराचार्य्यो मन्यते ॥ ॥ ० ॥ ११ ॥ ० ॥

अपूपानां प्रमाणेनैव कपालानामपि प्रमाणं सेत्स्यति,—इत्यभिप्रायेणापूपानामेव प्रमाणमुपदिशति,—

त्रैयम्बकप्रमाणान् ॥ १२ ॥

अष्टावपूपान् श्रपयति,—इति सम्बध्यते। त्रैयम्बकप्रमाणान् करतलप्रमाणान्—इत्यर्थः। तथा चोक्तम्। "त्रैयम्बकं करतलम्"—इति। एतस्य पुनरसम्भवे गृह्यासंग्रहोक्तं प्रमाणमपि द्रष्टव्यम्। तथाच गृह्यासंग्रहः।

"चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा।
कपालस्य प्रमाणेन अपूपानष्टकाविधौ।
चतुर्भागं पाणितलात् कपालं याज्ञिका विदुः।
पृथक्-कपालान् कुर्व्वीत अपूपानष्टकाविधौ"।

इति ॥ ० ॥ १२ ॥ ० ॥

शृतानभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ १३ ॥

शृतान् पक्वानपूपान् घृतेनाभिघार्य्य अग्नेरुत्तरतोऽवतार्य्य पुनर्घृतेनाभिघारयेत्। कपालानां स्थालीपाकधर्म्मानतिदेशादेवं सूचितम्। एवञ्च, यावदुक्तत्वात् नात्राभिघारणे पवित्राभ्यर्हितत्वमपेक्षितम्। चरौ तु स्थालीपाकधर्म्मातिदेशादेवैतानि प्राप्नुवन्ति। वैकृतत्वात् यावद्वचनमेव माभूदित्याशङ्कया वा वचनम् ॥ ० ॥ ॥ १३ ॥ ॥ ० ॥

स्थालीपाकावृताऽवदाय चरोश्चापूपानाञ्चाष्टकायै स्वाहेति जुहोति ॥ १४ ॥

स्थालीपाकधर्म्मेण चरोश्च अपूपानाञ्च सर्व्वेषां पृथक् पृथगवदाय अष्टकायै स्वाहेति तन्त्रेणैव जुहोति। अत्र सन्दिह्यते। किं चरोरपूपानाञ्च सर्व्वेषां मध्येभ्योऽवदाय ततः पूर्व्वार्द्धेभ्योऽवद्यति ? आहोस्विदेकैकस्य मध्यात् पूर्व्वार्द्धाच्चावदाय पुनरपरापरस्य तथैवावद्यति ? एकैकस्य मध्यात् पूर्व्वार्द्धाच्चावदाय पुनरपरापरस्यापि तथैवावद्यति,—इति प्रतिपद्यामहे। कस्मात् ? चरोश्चापूपानाञ्च,—इति चशब्दद्वयकरणात्। प्रत्येकं चशब्दबलात् प्रत्येकमेव तावत् यथोक्तावदानमवगम्यते। अवगम्यते चेत्, न युज्यते विना कारणमुत्स्रष्टुम्। अन्यथा चरोरपूपानाञ्च,—इति कुर्य्यात् ॥०॥ १४ ॥०॥

स्थालीपाकावृताऽन्यत् ॥ १५ ॥

उक्तभाष्यमेतत्। अत्रापूपाष्टकाकर्म्मणः परिसमाप्तिः ॥०॥ १५ ॥०॥

अथेदानीं मांसाष्टकाप्रकरणं प्रस्तूयते,--

तैष्या ऊर्द्धमष्टम्यां गौः ॥ १६ ॥

तैषी पौषी पौर्णमासी । तस्या ऊर्द्धं--तस्याः परस्यामष्टम्यां गौ-रालब्धव्या,—इति सूत्रशेषः ॥ ० ॥ १६ ॥ ० ॥

कथमालब्धव्या ? उच्यते,--

ताᳫंसन्धिवेलासमीपं पुरस्तादग्नेरवस्थाप्योपस्थि-तायां जुहुयात्—यत्पशवः प्रध्यायतेति ॥ १७ ॥

रात्रयह्नोः सन्धिरेव सन्धिवेला । सा चार्थात् पूर्व्वैव बोद्धव्या, न पश्चिमा । उभैव सन्धिवेलाशब्दार्थः,--इति केचित् । तस्याः सन्धिवेलायाः समीपं "कालाध्वनोरत्यन्तसंयोगे"--इति द्वितीया । सन्निधावित्यर्थः । पुरस्तात् पूर्व्वस्यां दिश्यग्नेः, तां गां अवस्थाप्य प्रत्यङ्मुखीं स्थापयित्वा, उपस्थितायामागतायां सन्धि-वेलायां, यत् पशवः,—इत्यनेन मन्त्रेण जुहुयात् । द्रव्यानुप-देशादाज्येन । स्रुवेण चायं होमः स्यात् । एतदुक्तं भवति । सन्धि-वेलाया अल्पत्वात् तदानीं होतुं तस्याः समीपमेवाग्नेः पूर्व्वतो-गामवस्थापयति, तत आगतायां सन्धिवेलायां जुहोति,—इति ।

ननु, उपस्थितायां गवि जुहुयात्,—इत्ययमेव सम्बन्धः कस्मा-न्न वर्ण्यते ? विरोधादित्याह । कथं नाम ? यदि नामोपस्थि-तायामेव गवि हूयते, न तर्ह्यग्नेः पुरस्तात्तामवस्थाप्य जुहोति । अथाग्नेः पुरस्तात्तामवस्थाप्य जुहोति, व्यक्तं तर्हि तस्यामुपस्थिता-

यामेव न जुहोति—अपि तु अग्नेः पुरस्तादवस्थापितायामिति।

अथापि स्यात्,—नेयमुपस्थितिरवस्थानाद्भिद्यते। यत् खल्ववस्थापनं "पुरस्तादग्नेरवस्थाप्य"—इत्यनेन सूचितं, तत्र याऽवस्थितिः सैवोपस्थितायामित्यनेन परामृश्यते। न,—इत्युच्यते। कस्मात् न—इत्युच्यते? शृणु, यथा न—इत्युच्यते। यदि नाम सैवावस्थितिः परामृश्येत, नूनमवस्थितायामित्यकरिष्यत्। तदकरणाच्चावगच्छामः,—नात्र सैवावस्थितिः परामृश्यते,—इति। न खल्ववस्थितिमभिप्रयन्नुपस्थितायामिति च कुर्व्वन्नाचार्य्योऽस्माकं प्रतीतिं स्थगयति,—इति युक्तमभ्युपगन्तुम्। आनर्थक्यञ्चैवमापद्येत। पुरस्तादग्नेरवस्थाप्य जुहुयात्,—इति ह्यभिप्रेतम्।

तस्मात्, सन्धिवेलायामुपस्थितायाम्—इत्यस्मदुक्त एवार्थ आदरणीयः। शब्दस्यवणमात्रात् खल्वयमेवार्थोऽवगम्यते। अवगम्यते चेत्, न युज्यते परित्यक्तुम्। अतएव, सन्धिवेलासमीपं गोरवस्थापनं सन्धिवेलायामुपस्थितायां होमाङ्गम्। सन्धिवेलासमीपम्,—इत्यस्य प्रातराहुत्यनन्तरपरतया वर्णनायाञ्च तदेवानर्थकं स्यात्। परिभाषाबलादेव तत्प्राप्तेः। नापि सन्धिवेलासमीपमित्यनेनाक्षरेणैतदवगम्यते। तस्मान्न किञ्चिदेतत्।

कश्चिदिदं सूत्रम्—उपस्थितायां गवि,—इत्यन्यथा व्याख्याय, बहुप्रकारं वर्णयाञ्चकार। "ननु, अवस्थाप्य—इत्युक्त्वा, पुनरुपस्थितायामिति कस्मादुच्यते? अत्राह। अस्य होमस्य पशूपस्थापनेन सङ्घातिसम्बन्धार्थम्। पश्वभावे स्थालीपाकं कुर्व्वीत,—इत्यस्मिन् पक्षे निवृत्तिरेव स्यात्। प्रोक्षणपर्य्यग्निकरणमन्त्रौ तु स्थालीपाकपक्षेऽप्यविरोधात् पठनीयौ। अथवा। आज्यसंस्कार-

प्रतिषेधार्थम् उपस्थितायामिति पुनर्व्वचनम्। कथन्नाम? उपस्थितायां जुहुयादेव, न तावदाज्यं संस्कुर्य्यात्,—इति। अथवा। आसादनीये आसादिते कर्म्मणः क्रताक्रतप्रत्यवेक्षणकर्त्तरि ब्रह्मणि चोपविष्टे तत्रापि होमस्य प्राप्तत्वात् तथा माभूदित्यानर्थ्यार्थं पुनर्व्वचनम्। तेन किम्? उपस्थितायामनन्तरमेव जुहुयादेव, न तावत् किञ्चिदपि कुर्य्यात्"—इति ॥ ० ॥ ॥ १७ ॥ ० ॥

हुत्वा चानुमन्त्रयेतानु त्वा माता मन्यतामिति ॥१८॥

हुत्वा, अनु त्वा माता,—इति मन्त्रेण गामनुमन्त्रयेत,—अनामिकाग्रेण स्पृशन्। तथाचोक्तम्।

"स्पृशन्ननामिकाग्रेण क्वचिदालोकयन्नपि।
अनुमन्त्रणीयं सर्व्वत्र सर्व्वदैवानुमन्त्रयेत्"।

इति। चतुष्पथप्रतिमन्त्रणादौ अवलोकयन्निति संबन्धनीयम्। योग्यत्वात्। प्रतिमन्त्रणमभिमन्त्रणमनुमन्त्रणमिति खल्वनर्थान्तरम्। हुत्वा,—इति वचनं हुत्वैवानुमन्त्रयेत न तु तन्त्रसमापनमपि क्रत्वा,—इत्येवमर्थम्। चशब्दश्च यवमिश्रोदकादीनामासादनार्थः। तेन,—यवमिश्रमुदकं, पवित्रं, क्षुरः, शाखाविशाखे पलाशकाष्ठे, बर्हिः, इध्मः, आज्यं, समिधौ, स्रुवः,—इत्येतानि यथावदासाद्य, अनन्तरमनुमन्त्रयेतेत्यर्थः ॥ ० ॥ १८ ॥ ० ॥

यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टां प्रोक्षामीति ॥ १९ ॥

पूर्व्वमासादिताभिर्यवमतीभिरद्भिर्गां प्रोक्षेत्—प्रकर्षेण सिञ्चेत् अष्टकायै,—इति मन्त्रेण ॥ ० ॥ १९ ॥ ० ॥

उल्मुकेन परिहरेत् परिवाजपतिः कविरिति ॥ २० ॥

उल्मुकमलातमित्यनर्थान्तरम्। तेन गां परिहरेत् प्रदक्षिणी-कुर्य्यात् परिवाजपतिरिति मन्त्रेण ॥ ० ॥ २० ॥ ० ॥

अपः पानाय दद्यात् ॥ २१ ॥

तस्यै गवे पानायोदकं दद्यात्—मन्त्रानुपदेशात् व्याहृतित्रितयं जपन्। कथं ज्ञायते ?

"यत्र मन्त्रा न विद्यन्ते व्याहृतित्रितयं जपेत्।
मन्त्राणामेव चादेशे मन्त्रात् कर्म्म समाचरेत्"।

इति गृह्यासंग्रहवचनात्। एवमन्यत्रापि बोद्धव्यम्। मन्त्रानुपदेशादमन्त्रकमिति वर्णयन्तु उच्चावचानामवलोकनेन। इध्मादीनामेव केवलं तूष्णीं करणमाचार्य्यपुत्रेणोपदिष्टम् ॥ ० ॥ ॥ २१ ॥ ० ॥

पीतशेषमधस्तात् पशोरवसिञ्चेदात्तं देवेभ्यो हविरिति ॥ २२ ॥

तस्याः पीतावशिष्टमुदकं, पशोस्तस्या एव गोरधस्तादवसिञ्चेत् अवाचीनं सिञ्चेत् आत्तं देवेभ्यः,—इति मन्त्रेण ॥ ० ॥ २२ ॥ ० ॥

अथैनामुदगुत्सृप्य संज्ञपयन्ति ॥ २३ ॥

अथ,—अनन्तरमेव, एनां गां उदगुत्तरस्यामग्नेरुत्सृप्य नीत्वा सञ्ज्ञपयन्ति। कर्त्तुरनियमः। सञ्ज्ञपनं हननम् ॥ ० ॥ २३ ॥०॥ कीदृशीं सञ्ज्ञपयन्ति ? उच्यते,—

प्राक्‌शिरसमुदक्‌पदीं दैवदैवत्ये ॥ २४ ॥

प्राक्‌शिरसं पूर्व्वाभिमुखशिरस्कां, उदक्‌पदीमुदङ्मुखपदीं सञ्ज्ञपयन्ति। देवदैवत्ये,—देवानुद्दिश्य यत् क्रियते, तस्मिन् ॥ ० ॥ ॥ २४ ॥ ० ॥

दक्षिणाशिरसं प्रत्यक्‌पदीं पितृदैवत्ये ॥ २५ ॥

पूर्व्वसूत्रव्याख्यानेनैवेदमपि सूत्रं व्याख्यातम्। सेयमष्टका-प्रसङ्गात् साधारणकर्म्मपरिभाषा क्रियते। ततश्च, देवतान्तरेषु प्रोक्षण-मन्त्रमूहेत। तेन, —वास्तुकर्म्मणि, वास्तोष्पतये त्वा जुष्टां प्रोक्षामि,—इति। "श्रोत्रियेऽभ्यागते श्राद्धं महोक्षेण महाजेन पयस्विन्या वा दद्यात्" इत्युक्तलक्षणे पित्रे,—पितृभ्यस्त्वा, जुष्टमिति वा जुष्टामिति वा। एवमन्यत्रापि। तथा चोक्तम्।

"ऊहः प्रोक्षणमन्त्रस्य लिङ्गदेवतयोर्वशात्"।

इति ॥ ० ॥ २५ ॥ ० ॥

संज्ञप्तायां जुहुयात् यत् पशुर्मायुरकृतेति * ॥ २६ ॥

---

* मायुमक्रतेति,—इति पाठान्तरम्।

तस्यां संस्रुतायां तस्यां जुहुयात्, यत् पशुरितिमन्त्रेण ॥०॥ २६ ॥०॥

पत्नी चोदकमादाय पशोः सर्व्वाणि स्रोताᳩसि प्रक्षालयेत् ॥ २७ ॥

पत्नी उदकमादाय, चशब्दाद्दर्भकूर्च्चमप्यादाय, पशोर्हताया गोः सर्व्वाणि स्रोतांसि—

"सप्त तावन्मूर्द्धन्यानि तथा स्तनचतुष्टयम् ।
नाभिः श्रोणिरपानश्च गोः स्रोतांसि चतुर्दश" ।

इत्युक्तलक्षणानि । प्रक्षालयेत् ,—दर्भकूर्च्चेण स्रोतांसि प्रकर्षेणाक्षत्य क्षालयेदित्यर्थः । स्रोतसां क्षालनश्चेदं तूष्णीं करणीयम् । क्रमस्त्विच्छाधीन एव भवति । तथा चोक्तम् ।

"क्षालनं दर्भकूर्च्चेण सर्व्वत्र स्रोतसां पशोः ।
तूष्णीमिच्छाक्रमेण स्यादपार्थं पार्णदारुणी" ।

इति ॥ ० ॥ २७ ॥ ० ॥

अग्रेण नाभिं पवित्रे अन्तर्धायानुलोममाकृत्य वपामुद्धरन्ति ॥ २८ ॥

अग्रेण नाभिं नाभेरग्रतः—अदूरप्रदेशे इत्यर्थः । पूर्व्वमासादिते पवित्रे अन्तर्धाय । द्विवचनं दत्तापेक्षम् ,—इति भट्टनारायणः । अनुलोमं लोम्नामनुकूलं यथा भवति, तथा आकृत्य—पूर्वमासादितेन क्षुरेण पाटयित्वा, वपां मांसचर्म्मणोरन्तर्व्वर्त्तिनीं वपां

उद्धरन्ति। कर्त्तुरनियमः। यद्यप्यत्र मन्त्रो नोपदिश्यते, तथापि व्याहृतिजपो न कर्त्तव्यः। कस्मात् ?

"वपाहोमे मुखेनैव होमे स्विष्टकृते तथा।
व्याहृतिर्न प्रयोक्तव्या मुखे नाप्सु च लक्षणम्"।

इति गृह्यासंग्रहवचनात्। ननु, वपाहोम एव व्याहृतिप्रयोगः-निषेधः वचनादवगम्यते ? सत्यम्। किन्तु वपाहोमे आचार्य्येण मन्त्रोपदेशात् व्याहृतिप्रयोगप्रसक्तिरेव नास्ति,--इति व्यर्थस्तत्र निषेधः। तस्मादवगच्छामः,—वपाहोमे कर्त्तव्ये यत् किञ्चित् क्रियते तदनुकूलं, तत्रैवासौ निषेधः,—इति ॥ ० ॥ २८ ॥ ० ॥

ताᳫं शाखाविशाखयोः काष्ठयोरवसज्याभ्युक्ष्य श्रपयेत् ॥ २९ ॥

शाखा एकशाखं काष्ठम्। विशाखा नानाशाखं काष्ठम्। शाखा च विशाखाच शाखाविशाखे, तयोः—शाखाविशाखयोः काष्ठयोः। ते च काष्ठे पालाशे बोद्धव्ये। कस्मात् ? "वपार्थे पार्णदारुणी" --इति वचनात्। तयोः काष्ठयोः तां वपां अवसज्य आरोप्य, उदकेनाभ्युक्ष्य श्रपयेत् ॥ ० ॥ २९ ॥ ० ॥

प्रश्चुतितायां विशसथेति ब्रूयात् ॥ ३० ॥

प्रश्चुतितायां प्रक्षरितायां। श्चुतिर क्षरणे,—इति स्मरणात्। प्रश्चुतितायां वपायां विशसथ,—इति ब्रूयात्। विशसथ, गां विकृतां कुरुत अपगतचर्म्मदेहां कुरुत,--इत्यर्थः। सोऽयं

सहायानां प्रैषः। सहायान् खल्वेवं प्रेष्य, अन्यदपि तानवबोधयेत् ॥ ० ॥ ३० ॥ ० ॥

किन्तत्? उच्यते,—

यथा न प्रागग्नेर्भूमिं शोणितं गच्छेत् ॥ ३१ ॥

यथा येन प्रकारेण विशस्यमानाया गोः शोणितं, प्रागग्नेर्भूमिं अग्नेः पुरस्ताद्भूमिभागं न गच्छेत न इयात्,—तथा विशसथ,—इत्यर्थः। एतस्माच्च कारणादेगगच्छामः,—अग्नेः समीप एव गौर्विशसनीया,—इति ॥ ० ॥ ३१ ॥ ० ॥

शृतामभिघार्य्योदगुद्रास्य प्रत्यभिघारयेत् ॥ ३२ ॥

शृतां वपाम्। कृतभाष्यमन्यत् ॥ ० ॥ ३२ ॥ ० ॥

स्थालीपाकावृता वपामवदाय,—स्विष्टकृदावृता वाऽष्टकायै स्वाहेति जुहोति ॥ ३३ ॥

स्थालीपाकावृता,—"अथ हविष उपस्तीर्य्यावद्यति मध्यात् पूर्व्वार्द्धात्"—इत्याद्युक्तप्रकारेणेत्यर्थः। पूर्व्वमासादितेन क्षुरेण वपामवदाय, स्विष्टकृदावृता वा कृत्स्नां वपामादाय, अष्टकायै स्वाहा,—इत्यनेन मन्त्रेण जुहोति। तथा चोक्तम्।

"क्षुरो मांसावदानार्थः, कृत्स्नां स्विष्टकृदावृता।
वपामादाय जुहुयात् तत्र तन्त्रं समापयेत्"।

इति। स्विष्टदावृता तावत् उत्तरार्द्धपूर्व्वार्द्धादवदानं प्राप्नोति। अयं पुनरत्र विशेषः, यत् कृत्स्नैव वपा स्विष्टकृदावृताऽवदातव्या—इति।

अनन्तरमेवान्यस्य कर्म्मण उपदेशादेककर्म्माशङ्का माभूदिति, "तत्र तन्त्रं समापयेत्"--इत्यनेन कर्म्मणो नानात्वं स्पष्टीकृतम् ॥ ० ॥ ३३ ॥ ० ॥

स्थालीपाकावृताऽन्यत् स्थालीपाकावृताऽन्यत् ॥ ३४ ॥

कृतभाष्यमेतत् । अस्मादपि वचनादिदानीमेकस्य कर्म्मणः परिसमाप्तिरवगम्यते । द्विर्व्वचनं प्रपाठकसमाप्तिप्रज्ञापनार्थम् ॥ ० ॥ ॥ ३४ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य दशमी खण्डिका समाप्ता ॥ ० ॥

समाप्तश्चायं तृतीयः प्रपाठकः ॥

चतुर्थप्रपाठके प्रथमा खण्डिका ।

वपाहोममुक्त्वा वपाश्रपण्योः पलाशशाखयोः प्रतिपत्तिमाह,—

अनुप्रहरति वपाश्रपण्यौ ॥ १ ॥

ययोः शाखाविशाखयोरवसज्य वपा श्रपिता, ते शाखाविशाखे वपाश्रपण्यौ उच्येते । ते वपाश्रपण्यौ अनु पश्चात् प्रहरति । कस्य पश्चात् ? द्रव्यासादनतद्दीक्षणप्रोक्षणप्रक्षोपवेशनपर्य्यन्तस्य । कस्मात् ? आरम्भसामर्थ्यादित्याह । पूर्व्वप्रपाठकपरिसमाप्तौ पूर्व्वस्य कर्म्मणः तन्त्रसमापनस्याभिधानात् अग्रे च चरुश्रपणस्य सूत्रयिष्यमाणत्वात् इदानीं खल्वनुशब्देन चरुश्रपण-पूर्व्वकर्त्तव्यानामेव कर्म्मणां परतः,—इत्यवगम्यते ।

तत्र च, क्षुरः, कांसपात्रत्रयं, प्लक्षशाखावाम् प्रस्तरः,—इत्येतेषामेव वैकृतानामासादनमत्राधिकम् । प्राकृतानामपि मध्ये, चरुस्थालीपवित्रप्रेक्षणानि इध्मश्च आसादयितव्यानि, विनियोगसामर्थ्यात् । सर्व्वमन्यत् प्रकृतवदेवासादयितव्यम् । प्रहरतिश्च यजतिवचनः,—इति प्रस्तर-प्रहरण-न्याये निर्णीतम् । "गार्हपत्ये प्रहराम:"—इति च श्रूयते । तथा सूत्रकारोऽप्याह । "अष्टावष्टौ सकलान्याहवनीये प्रहरेयुः"—इति । तस्मात् होमोऽयम् ॥ ॥ ० ॥ १ ॥ ० ॥

कथं प्रहरति ? उच्यते,—

प्राचीमेकशूलां प्रतीचीमितराम् ॥ २ ॥

एकं शूलमग्रं यस्याः सेयमेकशूला, तां—शाखां, प्राचीं प्रागग्रां प्रहरति। इतरां विशाखां प्रतीचीं प्रत्यगग्रां प्रहरति ॥०॥ २ ॥०॥

अवदान्यवदानानि सर्व्वाङ्गेभ्यः ॥ ३ ॥

अवदीयन्ते,—इत्यवदानानि मांसान्यभिधीयन्ते। प्रकृतस्य पशोः अवदानानि मांसानि अवद्यन्ति क्षुरेणोद्धरन्ति। बहुवचनादनियतः कर्त्ता। कुतोऽवद्यन्ति ? सर्व्वाङ्गेभ्यः—

"हृज्जिह्वाक्रोड़सक्थीनि यकृद्वृक्कौ गुदं स्तनाः।
श्रोणिः स्कन्धसटा पार्श्वे पश्वङ्गानि प्रचक्षते।
एकादशानामङ्गानामवदानानि संख्यया।
पार्श्वस्य वृक्कसक्थ्नोश्च द्वित्वादाहुश्चतुर्दश"।

इत्युक्तलक्षणेभ्यः। ननु, सर्व्वग्रहणं किमर्थम् ? उच्यते।

"हृदयं जिह्वा क्रोड़ं सव्यसक्थि पार्श्वनड़कं पार्श्वे च।
यकृदथ वृक्कौ च गुदं दक्षिणश्रोणिरितरा नाभिः"।

इति वचनात्परोक्तानामङ्गानामेवावदानानामिह ग्रहणं माभूत, किन्तु सर्व्वेषाम्—इत्येतदर्थमिति गृहाण ॥ ० ॥ ३ ॥ ० ॥

सर्व्वाङ्गेभ्यः,—इत्यस्यापवादमाह,—

अन्यत्र वामाच्च सक्थ्नः क्लोमस्य ॥ ४ ॥

सक्थि उरुः। क्लोम तिलकम्। वुक्कादूर्द्धं पिपासास्थानं क्लोम,—

इत्याचक्षते वैद्यकाः । वामात्—सव्यात् सक्थ्नः, क्लोमञ्चान्यत सर्व्वाङ्गेभ्य अवद्यन्ति । चशब्दद्वयं द्वयोस्तुल्यत्वप्रज्ञापनार्थम् । तदत्र चतुर्दशानामवदानानामवदानद्वयस्य पर्य्युदासात् द्वादशैवावदानानि भवन्ति । प्रयोजनञ्चास्य पर्य्युदासस्योत्तरसूत्रे वक्ष्यामः ॥ ४ ॥ ० ॥

वामंऽसवथ्यन्वष्टक्याय निदध्यात् ॥ ५ ॥

वामं सक्थि, अपवादसामर्थ्यात्तुल्यत्वप्रज्ञापनाच्च—क्लोम च, अन्वष्टक्याय,—तादर्थ्ये चतुर्थी, वक्ष्यमाणान्वष्टक्यकर्म्मार्थं निदध्यात् स्थापयेत् ॥ ० ॥ ५ ॥ ० ॥

तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च माꣳसचरुञ्च पृथङ्मेक्षणाभ्यां प्रदक्षिणमुदायुवन् ॥ ६ ॥

अग्निद्वये चरुद्वयस्य श्रपणं माशङ्कीत,—इति तस्मिन्नेवाग्नाविस्याह । कथंनाम ? पशुकर्म्मणि खल्ववदानानामन्यस्मिन्ने शामित्रे श्रपणं दृष्टम् । तद्वदत्राप्यन्यस्मिंस्तस्योपादानं कश्चिदाशङ्कीत । तन्मा प्रशङ्कीदिति तस्मिन्नेवाग्नाविति वचनम् । तत्राग्नौ ओदनचरुञ्च श्रपयति, मांसचरुञ्च श्रपयति—अवगिष्टैरेवावदानैः । ओदनचरुञ्च व्रीहितण्डुलनिष्पन्नो भवति । पृथक् नाना श्रपयति । किं कुर्व्वन् ? मेक्षणाभ्यां प्रदक्षिणमुदायुवन् । प्रदक्षिणं यथा भवति, तथा उदायुवन्, ऊर्द्ध्वमीषन्मिश्रयन् । ओदनचरुञ्च मांसचरुञ्च,—इत्यसमासकरणं चरुद्वयश्रपणस्य

पृथक्कालत्वप्रज्ञापनार्थम् । अपणक्रमश्रामयोः पाठक्रमादेव कल्प-
नीयः ॥ ० ॥ ६ ॥ ० ॥

शृतावभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ ७ ॥

व्याख्यातप्रायमेतत् । ननु, मांसचरोः स्थालीपाकधर्म्मानतिदेशात् तस्मिन्नेव चरावेतद्विधातव्यम् । तथाच, शृतमित्येकवचनं मांसचरुमिति वा कर्त्तुमुचितम् । कस्मात् द्विवचनं क्रियते ? असंमोहार्थमित्याह । अन्यथैकवचने कृते मांसचरुमिति वा सूचिते, तस्यैव चरोरभिघारणं न पुनरन्यस्यापि,—इति शिष्याः संमुह्येयुः । अथवा । यावदुक्तत्वादस्मिन्नोदनचरावपि अभिघारणे पवित्रान्तर्हितत्वं न करणीयमित्येतदर्थं शृताविति द्विवचनं कृतम् ॥ ० ॥ ७ ॥ ० ॥

एतस्मिन् क्रमे आज्यभागान्तं कृत्वा,—

कंसे रसमवासिच्य ॥ ८ ॥

कंसे,—पूर्व्वमासादितानां कंसपात्राणामेकस्मिन् कंसपात्रे, रसं अवदानमांसयूषं अवासिच्य निनीय ॥ ० ॥ ८ ॥ ० ॥

प्लक्षशाखावति प्रस्तरेऽवदानानि कृत्वा ॥ ९ ॥

प्लक्षोवृक्षविशेषः । प्रस्तरः कुशमुष्टिः । प्लक्षस्य शाखा प्लक्षशाखा । सा यस्यास्ति सोऽयं प्लक्षशाखावान् । तस्मिन् प्लक्षशाखावति प्रस्तरे भूमौ प्रागग्रनिहिते, अवदानानि अपनीतयूषाण्यवदानमांसानि, कृत्वा स्थापयित्वा ॥ ० ॥ ९ ॥ ० ॥

स्थालीपाकावृताऽवदानानां कंऽसेऽवद्यति ॥ १० ॥

स्थालीपाकावृता मध्यात् पूर्व्वार्द्धादित्युक्तया रीत्या, प्रत्येकं सर्व्वेषामवदानानां--अपनीतयूषाणां मांसानां, कंसे अपरस्मिन् कंसपात्रे,--यत्र यूषो नावसिक्तस्तस्मिन्--इत्यर्थः। अवद्यति क्षुरेणावदाय स्थापयति। अवदानानामिति संबन्धलक्षणा षष्ठी ॥ ० ॥ १० ॥ ०॥

स्विष्टकृतश्च पृथक् ॥ ११ ॥

स्विष्टकृतः स्विष्टकृदर्थं। चशब्दात् ,--स्थालीपाकावृताऽवदानानां कंसे अवद्यति। किं तस्मिन्नेव कंसे? न। कुत्र तर्हि? पृथक् ,--अन्यस्मिन् कंसे,--इत्यर्थः। अत्र च, स्विष्टकृदर्थत्वादवदानमांसानामुत्तरार्द्धपूर्व्वार्द्धेभ्योऽवदातव्यम् ॥ ० ॥ ११ ॥ ० ॥

चरोरुद्धृत्य विल्वमात्रमवदानैः सह यूषेण सन्नयेत् ॥ १२ ॥

चरोः प्रकृतत्वादोदनचरोः विल्वमात्रं विल्वपरिमाणं (परिमाणे मात्रट्) उद्धृत्य पूर्व्वोक्तयैव रीत्या मेक्षणेन गृहीत्वा। पात्रे स्थापयेदित्यर्थः। किमेकस्मिन्नेव पात्रे? न। पृथक्। कथं ज्ञायते? अत्रापि पृथगिति सम्बध्यते। कस्मात्? मध्यमणिन्यायात्। तेन, पृथक् पृथगेव मेक्षणेनावदाय पृथक् पृथगेव पात्रे स्थापयेत्। एतदुक्तं भवति। मध्यात् पूर्व्वार्द्धादित्युक्तक्रमेण मेक्षणेन चरोर्विल्वमात्रमवदाय यत्र मांसावदानानि स्थापितानि

तस्मिन् कांसपात्रे स्थापयति। एवमुत्तरार्द्धपूर्व्वार्द्धादित्युक्तरीत्या स्विष्टकृदर्थमपि पुरोविल्वमात्रं पृथगवदाय स्विष्टकृत्कांसपात्रे पृथगेव स्थापयति,--इति। अतएव, यथा सर्व्वैरप्यवदानै-र्व्विल्वमात्रमेवोद्धृतं भवति नाधिकं, तथोद्धरेदिति बोद्धव्यम्। ततश्च, तदुद्धृतं विल्वमात्रं पूर्व्वगृहीतैर्मांसावदानैः यूषेण च पूर्व्वावसिक्तेन सह सन्नयेत् सम्यगेकीकुर्य्यात् मिश्रयेदित्यर्थः॥ ०॥ ॥ १२॥ ०॥

एतस्मिन् क्रमे आज्यभागौ हुत्वा,

चतुर्गृहीतमाज्यं गृहीत्वाऽष्टर्च्चप्रथमया जुहुयाद-ग्नावग्निरिति॥ १३॥

चतुर्गृहीतमाज्यं गृहीत्वा,--इत्युक्तार्थम्। अग्नावग्निरिति योऽय-मष्टर्चः,--अष्टानामृचां समाहारः, तस्य प्रथमया ऋचा जुहु-यात्। भृगूणामपि चतुर्गृहीतमेवैतत्। कुतः? विशेषवच-नारम्भस्यार्थवत्त्वात्। पूर्व्ववत्तेषां विशेषस्यानुपदेशाच्च। सेयमा-ज्याहुतिः॥ ०॥ १३॥ ०॥

अथ चर्व्वाहुतिरभिधीयते,--

सन्नीतात् तृतीयमात्रमवदाय द्वितीयातृतीयाभ्यां जुहोति॥ १४॥

यत् प्रथमे पात्रे सन्नीतं मांसावदानं चर्व्ववदानं यूषश्च, तस्मात् सन्नीतात् तृतीयमात्रं त्रिभागैकभागमित्येतत्। अवदाय गृहीत्वा

प्रकृतस्याष्टर्चस्य द्वितीयातृतीयाभ्यां ऋग्भ्यां मिलिताभ्यां जुहोति ॥ ० ॥ १४ ॥ ० ॥

मन्त्रान्ते स्वाहाकारः,—इति सूत्रणात् प्रतिमन्त्रमेव स्वाहाकारं कश्चिदाशङ्कीत, अतस्तदपवादार्थमिदमाह,—

उत्तरस्याᳪ स्वाहाकारं दधाति ॥ १५ ॥

उत्तरस्यां ऋचि न पूर्व्वस्यां, स्वाहाकारं दधाति करोति। तत्रैव च जुहोति ॥ ० ॥ १५ ॥ ० ॥

एवमेवापरे चतुर्थीपञ्चमीभ्याᳪ षष्ठीसप्तमीभ्याञ्च ॥ १६ ॥

एवमेव पूर्व्वोक्तेनैव विधिना, अपरे द्वे तृतीयमात्रे अवदाय। अपरे—इति पाठेऽपि तथैवार्थः। प्रकृतस्याष्टर्चस्य चतुर्थीपञ्चमीभ्यां मिलिताभ्याम् एकामाहुतिं जुहोति, षष्ठीसप्तमीभ्याञ्चापराम्। अत्राप्युत्तरस्यामुत्तरस्यां स्वाहाकारं करोति, तत्रैव च जुहोति ॥ ० ॥ १६ ॥ ० ॥

शेषमवदाय सौविष्टकृतमष्टम्या जुहुयात् ॥ १७ ॥

शेषं स्विष्टकृदर्थमुत्तरार्द्धपूर्व्वार्द्धाभ्यां यद्गृहीतं, तदवदाय, प्रकृतस्यैवाष्टर्चस्य अष्टम्या ऋचा स्वाहाकारान्तया अग्नेरुत्तरार्द्धपूर्व्वार्द्धे जुहुयात् ॥ ० ॥ १७ ॥ ० ॥

एतन्तावत् मया यथोक्तेन विधिना यागः कर्त्तव्यः,—इत्यर्थं

प्रथमः कल्पः। यदा पुनर्गौर्न सम्पद्यते, तदा कथं कर्त्तव्यम्? तदिदानीमभिधीयते,—

यद्युवा अल्पसम्भारतमः स्यादपि पशुनैव कुर्य्यात् ॥ १८ ॥

सम्भ्रियते,—इति सम्भारो द्रव्यम्। अल्पः सम्भारो यस्य सोऽयमल्पसम्भारः। तस्यैवातिशयस्तमप्प्रत्ययार्थः। उ वै,—इति निपातौ। यद्युवा,—इति निपातसमुदायो यद्यर्थे,—इति केचित्। यदि अत्यल्पद्रव्यवान् स्यात्, अपि तदाऽपि पशुनैव कुर्य्यादष्टकायागम्। पशुरपि छाग एव स्यात्। कस्मात्? "अनादेशे पशुश्छागः"—इति गृह्यान्तरवचनात्। "छागपक्षे चरावपि"—इति च लिङ्गात्। एवकारकरणं पूर्व्वोक्तकृत्स्नविधिनियमार्थम्। तेन, अत्रापि कल्पे सर्व्व एव पूर्व्वोक्तो विधिः स्यात् ॥०॥ १८ ॥०॥
छागस्याप्यसम्भवे कथं कर्त्तव्यम्? तदुच्यते,—

अपि वा स्थालीपाकं कुर्व्वीत ॥ १९ ॥

ऋजुरक्षरार्थः। स खल्वयं स्थालीपाक ओदनचरोः परस्तान्मांसचरुस्थाने सवत्सायास्तरुण्या गोः पयसि श्रपयितव्यः। तथा चोक्तम्।

"स्थालीपाकं पशोः स्थाने कुर्य्याद् यद्यानुकल्पिकम्।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु"।

इति। पशोः स्थाने,--इति करणात् पशुकार्य्यकारित्वमस्यावगम्यते। तेन, अत्राप्यष्टर्च्चेन होमः स्यात्। एतञ्च, पशुपक्षे यावन्ति पशो-रवदानानि प्रस्तरे क्रियन्ते, स्थालीपाकपक्षेऽपि तावतः पायसान् पिण्डान् तत्र कुर्व्वीत। तथा चोक्तम्।

"चरितार्थ्या श्रुतिः कार्य्या यस्मादप्यनुकल्पशः।
अतोऽष्टर्च्चेन होमः स्याच्छागपक्षे चरावपि।
अवदानानि यावन्ति क्रियन्ते प्रस्तरे पशोः।
तावतः पायसान् पिण्डान् पश्वभावेऽपि कारयेत्"।

इति। ननु, अपि वा स्थालीपाकेन,--इति वक्तव्ये किमर्थं प्रकृत विभक्त्यतिक्रमः क्रियते? कस्यचित् कर्म्मणोऽतिक्रमसूचनार्थ-मित्याह। कथं नाम? अष्टर्च्चहोमवत्, पश्वभावेऽप्यविलोपार्थं वपाहोमोऽपि स्थालीपाकेनैव स्यात्। अतो वपाहोमस्य निवृत्ति-प्रज्ञापनार्थं प्रकृतविभक्त्यतिक्रमः क्रियते,--इति। अत एव, परि-शिष्टकारेणाप्यवदानसङ्ख्यैव पायसपिण्डकरणमुपदिशता आचा-र्य्यस्यायमभिप्रायः स्पष्टीकृतः॥ ०॥ १९॥ ०॥

अपि वा गोर्ग्रासमाहरेत्॥ २०॥

अपि वा अथ वा,—स्थालीपाकस्याप्यसम्भवे, गोः,—अविशेषेणोप-देशात् आत्मीयस्य परकीयस्य वा कस्यचिदनडुहः, ग्रासमाहरे-द्द्यात्। तावताऽप्यष्टकाकर्म्म कृतं भवतीत्यभिप्रायः। तथा च गृह्यान्तरम्। "अप्यनडुहो यवसमाहरेत्"—इति। केचिदत्र

प्रकारणात् गोशब्दस्य स्त्रीगवीपरत्वं वर्णयन्ति। घस्यते,—इति ग्रासस्तृणयवसादिः। स च यावता गोर्दिवसाहारः सम्पद्यते, तावान् दातुमुचितः। कस्मात्?

"यतः कुतश्चित् सम्प्राप्य गोभ्यो वाऽपि गवाह्निकम्।
अभावे प्रीणयन्नस्मान् श्रद्धायुक्तः प्रदास्यति"।

इति श्राद्धकरणाशक्तस्य तथा दर्शनात्। ग्रासोऽपि, एषा मेऽष्टकेति मन्त्रेण देयः। कुतः? सिंहावलोकितन्यायेन तस्यात्राप्यनुषङ्गात्। तस्य चाचार्य्यानुमतत्वात्। तथा चोक्तम्।

"कक्षोपधानमन्त्रोयः स गोर्ग्रासे विधीयते"।

इति ॥ ० ॥ २० ॥ ० ॥

अपि वाऽरण्ये कक्षमुपधाय ब्रूयादेषा मेऽष्टकेति ॥ २१ ॥

अपि वा, गोर्ग्रासाहरणस्याप्यसम्भवे,—इत्येतत्। अरण्ये, कक्षं बाहुमूलकोटरप्रदेशं, उपधाय,—(उप हीनार्थे) हीनाधानं कृत्वा,—कक्षतिरोधानमपनीय ऊर्द्ध्वबाहुर्भूत्वा,—इति यावत्। एषा मेऽष्टका,—इत्येतं मन्त्रं ब्रूयात् कथयेत्। तथा च, श्राद्धाशक्तौ गवाह्निकप्रदानस्याप्यसम्भवे पुराणस्मरणम्।

"सर्व्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः।
सूर्य्यादिलोकपालानामिदमुच्चैः पठिष्यति।
न मेऽस्ति वित्तं न धनं न चान्यत्
श्राद्धोपयुक्तं, स्वपितॄन्नतोऽस्मि।

तृप्यन्तु भक्त्या पितरो, मयैतौ
भुजौ कृतौ वर्त्मनि मारुतस्य"।

इति। तस्मादत्राप्येतत्परतया वर्णना शक्यते कर्त्तुम्। दृष्टपरिकल्पनाया न्याय्यत्वात्।

एवं वा—

अरण्ये, कक्षं तृणसङ्घमुपधाय,—अग्निना सन्धुक्ष्य, एषा मेऽष्टकेति ब्रूयात्। तथा च गृह्यान्तरम्। "अग्निना वा कक्षमुपोषेत्"—इति। अत्र किञ्चिद्वक्तव्यमस्ति। मुख्यकल्पानुकल्पभावेन तावदत्र पञ्च पक्षाउपदिष्टाः। तत्र योऽयमाद्यो गोपशुपक्षः स तावदिदानीं शिष्टैर्नानुष्ठीयते। अननुष्ठनाच्च साम्प्रतं पुराकल्पीभूतः। तथाच वाक्यार्थविद्भिरुक्तम्।

"विधिर्योऽनुष्ठितः पूर्व्वं क्रियते नेह साम्प्रतम्।
पुराकल्पः स यद्वच्च विधवाया नियोजनम्।
गोवधो मधुपर्कादौ मन्त्रोक्षोऽतिथिपूजने।
सम्प्रत्यकरणात्तस्य पुराकल्पत्वमागतम्।"

इति॥०॥२१॥०॥

न त्वेव न कुर्व्वीत न त्वेव न कुर्व्वीत॥२२॥

नैवाष्टकां न कुर्व्वीतेति नञ्द्वयेनावश्यं करणमुपदिशति। न वक्तव्यं तर्हि? अवश्यं करणस्य पूर्व्वमेव सिद्धत्वात्। उच्यते। मुख्यकल्पानुकल्पभेदात्तावदत्र पञ्च पक्षाः सूत्रिताः। शास्त्रान्तरेऽपि यानि पक्षान्तराण्युक्तानि,—"अपि वा अनूचानेभ्य उदकुम्भमाहरेत्"—

इत्येवमादीनि, तानि वा कुर्य्यात्, न त्वेव न कुर्व्वीत,--इत्येतदर्थमिदमुच्यते। तुशब्दः स्थालीपाकपचेऽप्यन्वष्टक्यस्यावश्यकरणप्रज्ञापनार्थः। इतरथा, पशुभावेन मांसाभावादस्य लोपः स्यात्। मध्यमाष्टकासंज्ञपितपशुमांसेनान्वष्टक्यविधानात्। तथा चोक्तम्।

"ओदनव्यञ्जनार्थन्तु पशुभावेऽपि पायसम्।
सद्रवं श्रपयेदेतदन्वष्टक्येऽपि कर्म्मणि"।

इति। द्विर्व्वचनमादरार्थं, मध्यमाष्टकाकर्म्मणः परिसमाप्त्यर्थं, वीप्सया सर्व्वास्वेवाष्टकासु यथासम्भवमनुकल्पप्राप्त्यर्थञ्च। अन्ये तु वर्णयन्ति। "अभ्यासः प्रकरणपरिसमाप्त्यर्थः। अथवा। अष्टकालोपे दोषगुरुत्वप्रज्ञापनार्थः। अविलोपे च फलभूयस्त्वप्रज्ञापनार्थोऽभ्यासः। तथाच यास्केनोक्तम्। अभ्यासे भूयांसमर्थं मन्यन्ते इति। अथवा। सूत्रद्वयमेतत्। अत्र पूर्व्वस्य यथोक्त एवार्थः। उत्तरं चोत्तरसूत्रेण सह संबध्यते, न त्वेव न कुर्व्वीत श्वस्ततोऽन्वष्टक्यम्—इति। तेन किं? स्थालीपाकपचेऽप्यन्वष्टक्यमवश्यं कुर्य्यादिति दर्शयति"--इति।

इदमिदानीं चिन्त्यते। किमेतेऽष्टकादयः पाकयज्ञाः सकृत् कर्त्तव्याः? उत प्रत्यब्दम्?--इति। तत्र, केचित् सकृदमीषां करणम्--इच्छन्ति। कस्मात्? एतेषां पुरुषसंस्कारत्वात्, सकृत् कृतेनैव च कर्म्मणा पुरुषसंस्कारस्य वृत्तत्वात्, पुनः करणे हेतोरभावात्,--इति। अन्ये त्वाहुः;--

"तस्मादुत्सृज्य कौन्तेय! गोवृषान् प्रति वत्सरम्"।

इति पौराणिक-लिङ्गदर्शनात् आवृत्तिरेवामीषाम्। न च पुरुषसंस्कारस्य वृत्तत्वात् किमर्थमावृत्तिरिति वाच्यम्। पुरुष-

संस्कारस्य कृतत्वेऽपि प्रत्यवायपरिहारार्थमावृत्तेर्युक्तत्वात्,--इति। वयन्तु पश्यामः। सकृदवश्यमेव करणं, आवृत्तौ तु नात्यन्तं नियमः। ततश्च, आवृत्तावभ्युदयः, अनावृत्तावपि न प्रत्यवायः। तथा चोक्तम्।

"सकृदप्यष्टकादीनि कुर्य्यात् कर्म्माणि यो द्विजः।

स पंक्तिपावनो भूत्वा लोकान् प्रैति घृतश्चुतः।

इति। अत्र खल्वपिशब्दादावृत्तिरपि अवगम्यते॥ ०॥ २२॥ ०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य प्रथमा खण्डिका समाप्ता॥ ०॥

चतुर्थप्रपाठके द्वितीया खण्डिका।

श्वस्ततोऽन्वष्टक्यम् ॥ १ ॥

ततस्तस्मादनन्तरोपदिष्टान्मांसाष्टकाकर्म्मणः, श्वः अनागतेऽह्नि,—नवम्यामित्यर्थः। एवमेके। अष्टकाकर्म्मण्यष्टम्याउपस्थितत्वादन्वष्टक्यस्यापि नवम्यां वर्णयितुमुचितत्वात्,—इति तेषामाशयः। अष्टकाकर्म्मदिनात् परदिन एव, न नवम्या नियमः। एवमपरे। अन्वष्टक्यं कर्त्तव्यमिति वाक्यशेषः। अष्टकायाः पश्चाद्भवतीत्यन्वष्टका, तत्र साधु अन्वष्टक्यमिति कर्म्मणो नामधेयम्।

कश्चित् सर्व्वत्रैवान्वष्टक्यं मन्यमानः सूत्रे ततः-शब्दस्य वीप्सां कृत्वा व्याचष्टे,—ततस्ततः अन्वष्टक्यम्,—इति। तदसङ्गतम्। मांसाष्टकाकर्म्मण एवानन्तरत्वात्। वीप्साया अश्रुतत्वाच्च। पठ्यमानमन्त्रकाण्डे मांसाष्टकाविनियुक्ताष्टर्च्चानन्तरमन्वष्टक्यमन्त्रस्य पठितत्वात्। सर्व्वत्रान्वष्टक्यपक्षस्याचार्य्याननुमतत्वाच्च। तदिदमधस्तादेवास्माभिरभिहितं,—"तथा गौतमवार्कखण्डी"—इत्यत्र।

अथैवं ततः,—इत्यनर्थकम्, अधिकारादेव मांसाष्टकाकर्म्मणोलाभात्। नियमार्थं तर्हि। किं नियम्यते? तस्मान्मांसाष्टकाकर्म्मण एव नान्यस्मादित्येतन्नियम्यते। किमर्थं पुनर्नियम्यते? अधिकाशङ्कानिरासार्थमित्याह। का पुनरत्राधिकाशङ्का? उच्यते। सप्तमी

तावदुपाष्टका, अष्टमी अष्टका, नवमी चान्वष्टकेतिभण्यते। तथाच अन्वष्टकायां भवम् अन्वष्टक्यम्,—इति समाख्याबलात् सर्व्वास्वेवाष्टकासु अन्वष्टक्यं कदाचिदापातेन प्रतिभायात् कस्यचित्। सेयमधिकाशङ्का। तन्निरासार्थं ततइत्युक्तम् ॥०॥१॥०॥

अपरस्वो वा ॥ २ ॥

अपरश्वः—एकान्तरिते अहनि वा अन्वष्टक्यं कर्त्तव्यम्। तिथिवृद्धिपक्षेऽयं विकल्पः,—इति नवम्यामन्वष्टक्यवादिनः। दिनवादिनस्त्वाहुः,—अशक्तावयं विकल्पः,—इति ॥०॥२॥०॥

अथेदानीम् अन्वष्टक्यं कर्म्म विवक्षुराह,—

दक्षिणपूर्व्वेऽष्टमदेशे परिवारयन्ति ॥ ३ ॥

वेश्मनो दक्षिणपूर्व्वे अष्टमदेशे उभयदिगष्टमभागे,—आग्नेय्यामित्येतत्। परिवारयन्ति, सर्व्वतोभावेनाच्छादयन्ति कटादिभिः किञ्चित् स्थानम्। बहुवचनादनियतः कर्त्ता ॥०॥१॥०॥

कथं परिवारयन्ति? उच्यते,—

तथाऽऽयतम् ॥ ४ ॥

तथेति दक्षिणपूर्व्वाष्टमदेशोभण्यते। दक्षिणपूर्व्वाष्टमदेशायतं यथा भवति, तथा परिवारयन्ति। आयतमायामोदैर्घ्यमित्यनर्थान्तरम्। परिहृतस्योत्तरार्द्धदक्षिणार्द्धयोरुपरिष्टात् कर्म्मोपदेशात् दक्षिणपूर्व्वाष्टमदेशे दक्षिणोत्तरायतमेव स्थानं परिहृतं भवतीत्याशङ्का-

निरासार्थं 'तथाऽऽयतम्'—इति सूत्रयाञ्चकार। तस्मात्, 'प्रक्रान्तत्वाद्दक्षिणपूर्व्वकोणायतं भविष्यति किं सूत्रेण,—इत्यसङ्गतं वचनम् ॥ ॥ ० ॥ ४ ॥ ० ॥

तथामुखैः कृत्यम् ॥ ५ ॥

यद्वक्ष्यमाणं कर्म्म, तत् तथामुखैः दक्षिणपूर्व्वाष्टमदेशाभिमुखैः कृत्यं करणीयम्। लाघवार्थमेवैतत् सूत्रितम्। अन्यत्र सूत्रणे हि दक्षिणपूर्व्वाष्टमदेशमुखैरिति सूत्रयितव्यं भवति ॥ ० ॥ ५ ॥ ० ॥

कियत्परिमितं स्थानं परिवारयन्ति ? उच्यते,—

चतुरवरार्ध्यान् प्रक्रमान् ॥ ६ ॥

चत्वारोऽवरार्ध्याः निकृष्टा येषां, तान् चतुरवरार्ध्यान् प्रक्रमान् परिवारयन्ति। तदस्यातिक्रान्ततरेण सूत्रेण संबन्धो बोद्धव्यः। प्रक्रमः श्रवणाकर्म्मण्येव व्याख्यातः। एतदुक्तं भवति। सर्व्वनिकृष्टोऽयं पक्षः;—यच्चतुर्णां प्रक्रमाणां परिवारणम्,—इति। इच्छया पुनरधिकमपि परिवारयन्ति ॥ ० ॥ ६ ॥ ० ॥

तस्य खलु परिवृतस्य,—

पश्चादुपसञ्चारः ॥ ७ ॥

पश्चात् पश्चिमदिशि उपसञ्चारः कर्त्तव्यः। उपसञ्चरत्यनेनेत्युपसञ्चारो द्वारमुच्यते ॥ ० ॥ ७ ॥ ० ॥

उत्तरार्द्धे परिवृतस्य लक्षणं कृत्वाऽग्निं प्रणयन्ति ॥ ८ ॥

परिवृतस्य श्चानस्योत्तरार्द्धे पूर्व्वोक्तं लक्षणसंज्ञकं कर्म्म कृत्वा अग्निं प्रणयन्ति। बहुवचनात् कर्त्तुरनियमः। एवञ्चात्र यावदुक्त-त्वाद्ब्रह्मासनादीनां निवृत्तिरवगम्यते। तथाच गृह्यासंग्रहः।

"एकाग्नौ पितृयज्ञे च ब्रह्माणं नोपकल्पयेत्।

सायं प्रातश्च होमेषु तथैव बलिकर्म्मसु"।

इति। इदमिदानीं सन्दिह्यते। किमेतदग्निप्रणयनं उपवीतिना प्राङ्मुखेन करणीयम्, उत प्राचीनावीतिना दक्षिणपूर्व्वाष्टमदिङ्मु-खेन?—इति। उपवीतिना प्राङ्मुखेन,—इति ब्रूमः। कस्मात्? "लक्षणावृदेषा सर्व्वत्र"—इति सर्व्वत्र-ग्रहणेन व्याप्त्यवगमात्। इह च, लक्षणं कृत्वा,—इति वचनस्यैवमर्थत्वात्। अन्यथा खल्व-ग्निप्रणयने लक्षणं प्राप्तमेवेति पुनर्व्वचनमनर्थकमेव स्यात्। तस्मात्, लक्षणे रेखानां प्रागग्रत्वानुरोधात् तत्र प्राङ्मुखकरणावधार-णाच्च, अत्रापि प्राङ्मुख एव कुर्य्यादित्यवगच्छामः। एवञ्च, यथा अन्यत्र लक्षणमुपवीतिना क्रियते, तथा अत्राप्यस्मिन् कर्म्म-ण्युपवीतिनैव भवितव्यम्। उपरिष्टात् खल्वाचार्य्यः,—"अत ऊर्द्धं प्राचीनावीतिना"—इति कुर्व्वन्, अधस्तात् किञ्चित् कर्म्म प्राची-नावीतिना, किञ्चिदुपवीतिना, किञ्चिच्चोभयथैव कर्त्तव्यमित्यु-पदिशति। एतच्चोपरिष्टादेव व्याख्यास्यामः। अतएव कर्म्मप्रदीपः।

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।

पातयेदितरज्जानु पितॄन् परिचरन्नपि"।

इति स्मरति। तदिदं वचनम्,—पितृकर्म्मान्तःपात्यपि देवपरि-चरणं दक्षिणजानुपातेन, एवं दैवकर्म्मान्तर्गतमपि पितृपरिचरणं इतरजानुपातेन करणीयम्,—इत्याह। कथं ज्ञायते? सदा-

शब्दस्यैवमर्थत्वात्। एवञ्च, जानुपातवदुपवीतित्वप्राचीनावीतित्वयोरपि तथैव वर्णयितुमुचितम्। कस्मात्? कारणस्याविशेषात्। अग्निं किल देवमाचक्षते नैरुक्ताः ॥ ० ॥ ८ ॥ ० ॥

पश्चादग्नेरुलूखलं दृढं हयित्वा सकृत् संगृहीतं व्रीहिमुष्टिमवहन्ति सव्योत्तराभ्यां पाणिभ्याम् ॥ ९ ॥

उत्तरशब्द उपरितनवचनः। सव्यः पाणिरुत्तरो दक्षिणश्चाधरो-ययोः पाण्योः, ताविमौ सव्योत्तरौ, ताभ्यां सव्योत्तराभ्यां पाणिभ्यां मुषलेनावहन्ति। उक्तार्थमन्यत्। सकृत् संगृहीतमिति वचनात् अनुनिर्व्वापयोरत्र निवृत्तिमिच्छन्ति। व्रीहिग्रहणं हविरन्तरप्रतिषेधार्थम्। यद्यप्यत्र सकृत्संगृहीतस्य मुष्टिमात्रस्य ग्रहणम् अवगम्यते, तथापि तथा गृह्णीयात् यथा होमस्य पिण्डानाञ्चाभिनिर्वृत्तिः स्यात्। कुतः? ऐदमर्थ्याद्ग्रहणस्य। अतएवाचार्य्यपुत्रेण,—

"चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा"।

इति सामान्यत एवोपदिष्टम्। तदिदं हविर्निर्व्वपणानिकं प्राचीनावीती दक्षिणपूर्व्वाष्टमदिङ्मुखः कुर्य्यात्। कुतः? पितृत्वात्। कस्मात् पुनः कारणात् सत्यपि देवतानां साधारण्ये पितृत्वमेव हविषः कथ्यते? प्राधान्यादित्याह। पितृणां खल्वत्र कर्म्मणि प्राधान्यमवगम्यते। तस्मात् पितृमिदं भवितुमर्हति। प्रधानवशाद्धि नियमो वर्णयितुमुचितः। कुतः पुनरत्र पितृणामेव प्राधान्यमवगम्यते न देवतानामपि? तथामुखैः कृत्यमिति वचनात्—इति ब्रूमः। अपि च। हविषः सकृद्ग्रहणात्, सव्योत्तराभ्यां पाणिभ्याम-

वहननात्, सक्तत् फलीकरणात्, यथा मांसाभिघाराः पिण्डा-
भवन्ति तथा मांसच्छेदनात्, प्रसव्यमुदायवनात्, दक्षिणस्यामु-
द्वासनात्,—इत्येवमादिभिरुपदेशशतैः पितॄणामेवात्र प्राधान्यम-
वगम्यते। मनुरपि स्मरति।

"दैवकार्य्यात् द्विजातीनां पितृकार्य्यं विशिष्यते।
दैवं हि पितृकार्य्याणां पूर्व्वमाप्यायनं स्मृतम्"।

इति। तस्मात् पितॄणामेव प्राधान्यम्। एतच्चोपरिष्टात्तत्र तत्र
स्फुटीभविष्यति।

इदमिदानीं सन्दिह्यते। किमत्र पित्रर्थत्वात् पितृभ्यस्त्वा जुष्टं
निर्व्वपामि,—इति मन्त्रेण निर्व्वपणम्, आहोस्वित् यावदुक्तत्वाद-
मन्त्रकम्, उताहो आचार्य्यपुत्रपरिभाषाबलात् व्याहृतित्रित-
येन? —इति। पितृभ्यस्त्वा जुष्टं निर्व्वपामि,—इति मन्त्रेण,—
इति ब्रूमः। कस्मात्? प्रकृतौ तथा दर्शनात्। लिङ्गाच्च। अग्नौ-
करणहोम-विचारश्लोके खल्वेतस्यार्थस्य लिङ्गमुपलभ्यते। तथाच
कर्म्मप्रदीपः।

"अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन तु।
निरुप्य हविरन्यस्मा अन्यस्मै न हि हूयते"।

इति। एतस्मात् लिङ्गात् मन्त्रवद्ग्रहणमवगम्यते। पित्रर्थं
निर्व्वापः खल्वस्य हविषः हेतुतयोपन्यस्यते। तच्चैवं सति आम्न-
स्योमोपपद्यते। तथाच पुराणस्मरणम्।

"अग्निमान् निर्व्वपेत् पित्र्यं चरुं वा शस्यमुष्टिभिः।
पितृभ्यो निर्व्वपामीति सव्यं दक्षिणतोन्यसेत्"।

इति॥०॥८॥०॥

यदा वितुषाः स्युः ॥ १० ॥

यदा यस्मिन् काले वितुषाः विगततुषाः स्युर्भवेयुः ॥ ० ॥ १० ॥ ० ॥

तदा,—

सकृदेव सुफलीकृतान् कुर्व्वीत ॥ ११ ॥

सकृदेकवारमेव, सुफलीकृतान्—सुशब्दः शोभनवचनः, शोभनं यथा भवति तथा फलीकृतान् निष्पन्नीकृतान् तण्डुलान् कुर्व्वीत पूर्व्वमेव खल्ववघातेन तण्डुला निष्पन्नाः। इदानीन्तु शोभनं निष्पन्नीकरणमुपदिश्यते। तेन प्रच्छट्टनमिदानीं कुर्व्वीत। कंबूकापनयनं वा फलीकरणमुच्यते। सूफलीकृतानपनीतसमस्तकंबूकानित्यर्थः ॥ ० ॥ ११ ॥ ० ॥

अथामुष्माच्च सक्थ्नो माꣳसपेशीमवकृत्य नवायाꣳ सूनायामणुशश्छेदयेत् ॥ १२ ॥

अथशब्द आनन्तर्य्यार्थः। अथ, तण्डुलप्रक्षालनानन्तरम्। प्रक्षालनञ्च सकृदेव स्यात्। हविषः पित्र्यत्वात्। व्यवहितस्यापि बुद्धा सन्निकृष्य अमुष्मादित्यनेन परामर्शः। अथशब्दः पूर्व्वप्रकृतार्थोवा। अमुष्मात् पूर्व्वप्रकृतात् मांसाष्टकायां निहितात् सक्थ्नः, अग्रस्थात् क्रोडाच्च, मांसपेशीं,—मांसपेशी प्रसिद्धा, तां अवकृत्य अवच्छिद्य, नवायां सूनायां,—सूना नाम काष्ठमयः पात्रविशेषः, तस्यां सूनायां अणुशः सूक्ष्मं सूक्ष्मं कृत्वा छेदयेत् ॥०॥ १२ ॥०॥

र्थं छेदयेत्? उच्यते,—

यथा माꣳसाभिघाराः पिण्डा भविष्यन्तीति ॥ १३ ॥

यथा येन प्रकारेण मांसाभिघाराः मांसव्यञ्जनाः पिण्डा भवि-ष्यन्ति, इति तथा छेदयेत् ॥ ० ॥ १३ ॥ ० ॥

तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च माꣳसचरुञ्च पृथङ्मेक्षणाभ्यां प्रसव्यमुदायुवन् ॥ १४ ॥

प्रसव्यं अप्रदक्षिणम्। कृतभाष्यमन्यत्। अत्रापि, मांसाभावे पायसः स्यात्। तदिदमुक्तमस्माभिरधस्तादेव, "ओदनव्यञ्जना-र्थम्तु"—इत्यादिना ॥ ० ॥ १४ ॥ ० ॥

शृतावभिघार्य्य दक्षिणोद्वास्य न प्रत्यभिघारयेत् ॥ १५ ॥

दक्षिणा दक्षिणस्याम्। गतमन्यत् ॥ ० ॥ १५ ॥ ० ॥

दक्षिणार्द्धे परिवृतस्य तिस्रः कर्षूः खानयेत् पूर्व्वो-पक्रमाः ॥ १६ ॥

परिवृतस्य स्थानस्य दक्षिणार्द्धे दक्षिणांशे, तिस्रः त्रिसंख्याकाः कर्षूः केनचित् खानयेत्। अन्यस्य पुनरसम्भवे स्वयमपि खनेत्। कर्षूर्नाम अवटो गर्त्त इत्यनर्थान्तरम्। कथम्भूताः? पूर्व्वोप-क्रमाः। पूर्व्वस्यां दिश्युपक्रमो यासां ताः, तथाविधाः,—इत्यर्थः। तथाच, पूर्व्वस्यां दिश्युपक्रम्य पश्चिमायां दिशि खननं समापनी-

यम्। पितृगत्वात् प्रसव्यखननमित्यभिप्रायः। अथवा। उपक्रम्यते,—इत्युपक्रमः। पूर्व्वा आद्यूरुपक्रमो यासां कर्षूणां, ताः तथोक्ताः। तथाभूताः खानयेत्। का पुनः पूर्व्वा ? या खल्वात्मनः पुरतः क्रियते। एतदुक्तं भवति। प्रथमतः पूर्व्वां कर्षूं खानयेत्, ततो मध्यमां, तत उत्तमाम्,—इति। तथा चोक्तम्।

"पुरतो याऽऽत्मनः कर्षूः सा पूर्व्वा परिकीर्त्त्यते।
मध्यमा दक्षिणेनास्यास्तद्दक्षिणत उत्तमा"।

इति। तथाच, इमाः कर्ष्वौ दक्षिणसंस्था भवन्ति। खननञ्चामूषां शङ्कुना करणीयम्। स च,—

"शङ्कुश्च खादिरः प्रोक्तो रजतेन विभूषितः।
शङ्कुस्तैवोपवेशश्च द्वादशाङ्गुल इष्यते"।

इति कर्म्मप्रदीपोक्तलक्षणः॥०॥१६॥०॥
कीदृशीः कर्षूः खानयेत् ? उच्यते,—

प्रादेशायामाश्चतुरङ्गुलपृथ्वीस्तथाऽवखाताः॥ १७॥

प्रादेशायामाः प्रादेशदीर्घाः। पृथुशब्दो धर्म्मवचनः। चतुरङ्गुलं पृथु यासां, ताः चतुरङ्गुलपृथ्वीः। पृथु पृथुत्वं परिणाहः,—इत्येतत्। तथा चतुरङ्गुलं अवखातं यासां, ताः तथाऽवखाताः। विशेषमाह कर्म्मप्रदीपः।

"वाय्वग्निदिङ्मुखान्तास्ताः कार्य्याः सार्द्धाङ्गुलान्तराः।
तीक्ष्णाग्रा यवमध्याश्च मध्ये नावद्यवोत्किरेत्"।

इति॥०॥१७॥०॥

पूर्व्वस्याः कर्ष्वाः पुरस्तात्तथा कृत्वाऽग्निं प्रणयन्ति ॥ १८ ॥

ऋजुरक्षरार्थः। यद्यपि, लक्षणग्रहणस्य पूर्व्वोक्तमेव प्रयोजनं बोद्धव्यम्। बहुवचनात् कर्त्तुरनियमः ॥ ० ॥ १८ ॥ ० ॥

कश्चिदत्र विशेषमाह,—

अपरेण कर्षूः पर्य्याहृत्य लक्षणे निदध्यात् ॥ १९ ॥

अपरया अदूरवर्त्तिन्या दिशा,—इत्यर्थे एणप्प्रत्ययान्तोऽयमपरेणशब्दः तद्योगात् कर्षूरिति द्वितीया। तथाच, अयमर्थः। कर्षूणामदूरवर्त्तिन्या पश्चिमया दिशा, अग्निं पर्य्याहृत्य सर्व्वतोभावेनाहृत्य लक्षणे निदध्यात् ॥ ० ॥ १९ ॥ ० ॥

सकृदाच्छिन्नं दर्भमुष्टिꣳस्तृणोति ॥ २० ॥

आच्छिन्नं आ सम्यक्,—उपमूले च्छिन्नं दर्भमुष्टिं, सकृदेकवारं स्तृणोति,—"पश्चाद्दाऽऽस्तीर्य्य"—इत्युक्तया रीत्या; प्रकृतस्याग्नेश्चतुर्दिक्षु। अत्र, आच्छिन्नमिति वचनस्यार्थवत्त्वार्थमुपमूललूनत्वावगमात् तस्य च पित्र्यर्थत्वात् प्राचीनावीतिनैतत् कर्त्तव्यम्,—इत्यवगम्यते ॥ ० ॥ २० ॥ ० ॥

कर्षूश्च ॥ २१ ॥

स्तृणोति,—इत्यनुवर्त्तते ॥ ० ॥ २१ ॥ ० ॥

किमनियमेन ? न। कथन्तर्हि ?—

पूर्व्वोपक्रमाः ॥ २२ ॥

व्याख्यातोऽक्षरार्थः । अत्र किञ्चिद्वक्तव्यमस्ति । कर्षूणां स्तरणं खल्विदं दक्षिणपूर्व्वोष्टमदिगग्रैः कुशैः दक्षिणान्तादारभ्य करणीयम् । तदाह कर्म्मप्रदीपः ।

"अन्वाग्राग्रैः कुशैः कार्य्यं कर्षूणां स्तरणं घनैः ।
दक्षिणान्तात्तदग्रैस्तु पितृयज्ञे परिस्तरेत्" ।

इति । इदमिदानीं सन्दिह्यते । किमभितः कर्षूणां स्तरणं कर्त्तव्यम् ? आहोस्विन्मध्यतः ?—इति । अग्निवदभितः,—इति ब्रूमः । कुतः ? अग्निस्तरणसमभिव्याहारेणोपदेशात्तथाऽवगतेः । अग्नेः खल्वभित एव स्तरणमिति तावन्निर्व्विवादम् । तत्सामान्यात् कर्षूणामपि तथैव स्तरणमित्ययमर्थोऽस्माकमागच्छति हृदयम् । आगच्छति चेत्, न युज्यते विना कारणमुत्स्रष्टुम् । लेखाकरणोपपत्तेश्च । कर्षूणां मध्यतः किल लेखाकरणं वक्ष्यामः । तदुपपत्तये च अभितः कर्षूणां स्तरणमिति प्रतिपद्यामहे । न खलु कुशैः स्तृतानां कर्षूणां मध्यतो लेखा कर्त्तुं शक्यते । अपरे पुनरेतदविद्वांसो भाषन्ते,—स्तरणमिदं कर्षूणां मध्यतः करणीयम्,—इति ॥ ० ॥ २२ ॥ ० ॥

पश्चात् कर्षूणाᳬ स्रस्तरमास्तारयेत् ॥ २३ ॥

व्याख्यातप्रायमेतत् ॥ ० ॥ २३ ॥ ० ॥

केन ?—

दक्षिणाग्रैः कुशैः ॥ २४ ॥

अन्वर्थं सूत्रम् ॥ ० ॥ २४ ॥ ० ॥

कीदृशं स्वस्तरमास्तारयेत् ?—

दक्षिणाप्रवणम् ॥ २५ ॥

इदमपि व्याख्यातप्रायमेव ॥ ० ॥ २५ ॥ ० ॥

वृषीञ्चोपदध्यात् ॥ २६ ॥

वृषी नाम काष्ठमयो द्वादशाङ्गुलपरिमित आसनविशेषः, उपवेश-
माख्यायते। ताञ्च उपदध्यात् स्थापयेत्। चशब्दः स्वस्तरेण
सम्बन्धकरणार्थः। तेन, स्वस्तरोपरि वृष्या उपधानम्,—इति
केचित्। चशब्दात् उपशब्दाच्च स्वस्तरस्योप समीपे वृषीं दध्यात्।
अतएव परतः स्वस्तरोपरि द्रव्याणामासादनं सूत्रयिष्यते। अस्या-
अपि स्वस्तरोपर्य्येवासादने इदमपि तत्रैवासूत्रयिष्यत्, अत्रैव वा
स्पष्टार्थं 'तत्र' ग्रहणमकरिष्यदाचार्य्यः। तदकरणादवगच्छामः,—
नास्याः स्वस्तरोपर्य्यासादनम्,—इति। एवमपरे। तदत्र भग-
वन्तोभूमिदेवाः प्रमाणम्। उपदध्यादिति वचनादुपधानमेवास्याः
कर्त्तव्यमदृष्टार्थं, न पुनरुपवेशनार्थं तदासादनमिति नारायणो-
पाध्यायप्रभृतयः ॥ ० ॥ २६ ॥ ० ॥

तत्राच्छा आहरन्त्येकैकशः सव्यं बाहुमनु ॥ २७ ॥

तत्र,—इत्यतिक्रान्तस्य स्वस्तरस्य परामर्शो न वृष्याः। कथं
ज्ञायते? "स्वस्तरे सर्व्वमासाद्य"—इति परिशिष्टकारवचनात्।

तत्र स्वस्तरे वक्ष्यमाणानि द्रव्याण्येकैकशः आहरन्ति। कथमाहरन्ति? अस्मै सव्यं बाहुमनु। अस्मै,—इत्यत्र "षष्ठ्यर्थे चतुर्थी वक्तव्या"—इति वचनात् षष्ठ्यर्थे चतुर्थी। अस्य यजमानस्य सव्यं बाहुं अनु लक्षीकृत्य,—अप्रादक्षिण्येनेत्यर्थः। अथवा। अस्मै,—इति तादर्थ्ये चतुर्थी। अस्मै यजमानाय, अन्ये शिष्यादय आहरन्ति। समानमन्यत्। अन्यस्य पुनरसम्भवे स्वयमेवाहरेत् ॥ ० ॥
॥ २७ ॥ ० ॥

कानि पुनस्तानि द्रव्याणि? उच्यते,—

चरुस्थाल्यौ मेक्षणे कंसं दर्व्वीमुदकमिति ॥ २८ ॥

ओदनचरुमांसचरुसहिते पूर्व्वोक्ते चरुस्थाल्यौ आहरन्ति। एवमुत्तरत्रापि। इतिकार-करणात् अन्येषामप्यञ्जनपिञ्जूलीयवतिलपुष्पप्रभृतीनां येषामुपरिष्टाद्विनियोगः सूत्रयिष्यते, इह चासादनं कण्ठतो नोक्तं, तानि चासादयन्ति ॥ ० ॥ २८ ॥ ० ॥

पत्नी वर्हिषि शिलां निधाय स्थगरं पिनष्टि ॥ २९ ॥

स्थगरं चन्दनादिगन्धद्रव्यम्। तथा चोक्तम्।

"स्थगरं सुरभि ज्ञेयं चन्दनादि विलेपनम्"।

इति। स्पष्टमन्यत् ॥ ० ॥ २९ ॥ ० ॥

तस्याश्चैवाञ्जनं निघृष्य तिस्रो दर्भपिञ्जूलीरञ्जयति सव्यन्तराः ॥ ३० ॥

तस्यामेव शिलायाम्,—एवशब्दाद्दर्विर्षि निश्चितायां, चशब्दात् प्रकृता पत्नी, अञ्जनं निघृष्य विशेषेण घर्षयित्वा । निघर्षणो-पदेशात् अञ्जनपदेन सौवीराञ्जनमभिप्रेतमित्यवगच्छामः । कुतः? इतरस्य घर्षणानुपपत्तेः । तथा चोक्तम् ।

"सौवीराञ्जनमित्युक्तं पिञ्जूलीनां यदञ्जनम्" ।

इति । तेनैवाञ्जनेन तिस्रः त्रिसंख्याकाः, दर्भपिञ्जूलीः पूर्व्वोक्त-लक्षणाः, अञ्जयति म्रक्षयति पत्नी । किं यथेच्छम्? न । कथन्तर्हि? सव्यन्तराः । विशेषेणान्तरमवकाशोव्यन्तरं तत्-सहिताः सव्यन्तराः । ईषाविच्छलाकावदिति यावत् । अथवा । सव्यशब्दो नानावचनः । तेन, नानाऽन्तराः,—इति पूर्व्वोक्त-एवार्थः ॥ ० ॥ ३० ॥ ० ॥

तैलञ्चोपकल्पयेत् ॥ ३१ ॥

चशब्दात् स्वस्तर एव । तदस्यातिक्रान्तेन स्वस्तरेण सम्बन्धो-बोद्धव्यः ॥ ० ॥ ३१ ॥ ० ॥

क्षौमदशाञ्च ॥ ३२ ॥

अतसीसूत्रदशाञ्च स्वस्तर एवोपकल्पयेत् ॥ ० ॥ ३२ ॥ ० ॥

शुचौ देशे ब्राह्मणाननिन्द्यानयुग्मानुदङ्मुखानुपवेश्य ॥ ३३ ॥

शुचौ पवित्रे, देशे—गोमयेनोपलेपिते । कथं ज्ञायते?

"शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्" ।

इति मनुस्मरणात्। ब्राह्मणान्, ब्राह्मणग्रहणात् क्षत्रियादिप्रतिषेधः। अनिन्द्यान्,—निन्द्याः निन्दार्हाः, ते न भवन्तीत्यनिन्द्याः, तान् अनिन्द्यान्। अयुग्मान् विषमसंख्याकान्,—बहुवचनात् त्रिप्रभृतीन्, उदङ्मुखान् उपवेश्य। उपवेशनञ्चामीषां कर्षूणां दक्षिणतः स्यात्। एवं खल्वग्रतो ब्राह्मणानां कर्षूपिण्डा भविष्यन्ति।

इदमिदानीं सन्दिह्यते। किमत्र वैश्वदेवार्थं ब्राह्मणमुपवेशयेत्, उत यावदुक्तत्वान्न ?—इति। तत्र, अविधानादिह वैश्वदेवस्यैवाभावः,—इति केचित्। तदसङ्गतम्। कस्मात्? वैश्वदेवपूर्व्वस्यैव श्राद्धस्य शास्त्रान्तरे विधानात्। तथाच मनुः।

"तेषामारक्षभूतन्तु दैवं पूर्व्वं नियोजयेत्।
रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्ज्जितम्"।

इति। "स्नातान् शुचीनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान् यथाशक्ति पित्र्ये"—इति, "दैवपूर्व्वं श्राद्धं कुर्वीत"—इति चाश्वलायनीये श्राद्धकल्पे। यावदुक्ते क्रियमाणे तु ब्राह्मणानामुपवेशनमात्रं स्यात् न भोजनम्। न चैवमिष्यते। इष्यत एवेति चेत्। न। कुतः? "वृद्धिपूर्त्तेषु युग्मानाशयेत्"—इति विशेषोपदेशादत्रायुग्मानां ब्राह्मणानामाशनावगतेः। "योवा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्"—इति च लिङ्गात्। तस्मात्,—श्राद्धकल्पस्यापेक्षितत्वात्—वैश्वदेवार्थं युग्मान् ब्राह्मणान् प्राङ्मुखानुपवेश्य ततः पितृब्राह्मणानुपवेशयेत्,—इति सिद्धान्तः। तथाच कर्म्मप्रदीपः।

"स्वस्तरे सर्व्वमासाद्य यथावदुपयुज्यते।
दैवपूर्व्वन्ततः श्राद्धमत्वरः शुचिरारभेत्"।

इति। किमर्थं तर्हि वैश्वदेवस्यासूचनम्? उच्यते। प्रधानस्य पित्र्यस्यास्य सूचने तदङ्गं वैश्वदेवमसूचितमपि प्राप्यत एवेति मन्यमानः खल्वाचार्य्यो नात्र वैश्वदेवं सूचयाञ्चकारेति स्मिष्यते। अथवा। अनिन्द्यानित्यनेन ब्राह्मणपरीक्षां सूचयन् दैवस्यात्रासूचयन् दैवे ब्राह्मणपरीक्षा नास्तीति दर्शयति। तथाच मनुः।

"ब्राह्मणं न परीक्षेत दैवे कर्म्मणि धर्म्मवित्।
पित्र्ये तु कर्म्मणि प्राप्ते परीक्षेत प्रयत्नतः"।

इति ॥ ० ॥ ३३ ॥ ० ॥

दर्भान् प्रदाय ॥ ३४ ॥

दर्भानासनेषु दत्त्वा। तथा चास्मदीयं श्राद्धकल्प-सूत्रम्। "आसनेषु दर्भानास्तीर्य्य"—इति। आदिशब्दोऽत्र लुप्तवत् द्रष्टव्यः। तेन दर्भादीनर्घ्यपर्य्यन्तान् प्रदाय—अर्घ्यपर्य्यन्तं कर्म्म कृत्वा,—इत्येतत्। तथाच कर्म्मप्रदीपः।

"आसनाद्यर्घ्यपर्य्यन्तं वशिष्ठेन यथोदितम्।
कृत्वा कर्म्माथ पात्रेषु उक्तं दद्यात्तिलोदकम्"।

इति ॥ ० ॥ ३४ ॥ ० ॥

उदकपूर्व्वन्तिलोदकं ददाति पितुर्नाम गृहीत्वाऽसावेतत्ते तिलोदकं ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधेति ॥ ३५ ॥

उदकं पूर्व्वं यस्य तदुदकपूर्व्वं तिलोदकं तिलमिश्रमुदकं ददाति। एतदुक्तं भवति। प्रथमं केवलमुदकं दत्त्वा ततस्तिलमिश्रमुदकं

ददाति—इति। केन मन्त्रेण ददाति? असावेतत्ते तिलोदक-मित्यनेन मन्त्रेण। किं कृत्वा? असौ—इत्येतस्मिन् मन्त्रस्थाने सम्बोधनविभक्त्या पितुर्नाम गृहीत्वा उच्चार्य्येति प्राञ्चः। नैतत् समीचीनम्। कस्मात्? 'पितुर्नाम गृहीत्वा'—इति नामग्रहणमुपदिश्य 'असावेतत्ते'—इत्यसावित्यस्य पुनरुपदेशस्यार्थवत्त्वोपपत्तेः। न हि 'असौ'—इत्यत्र 'पितुर्नाम गृहीत्वा'—इत्यस्यां वर्णनायां किञ्चित् प्रमाणमस्ति। "असाविति नाम गृह्णाति"—इति कात्यायन-सूत्रं प्रमाणमिति चेत्। न। 'पितुर्नाम गृहीत्वा"—इत्यस्यानर्थ-कत्वापत्तेः। शास्त्रान्तरपरिभाषायाश्च शास्त्रान्तरेऽनुपयोगात्। तस्मात्। 'एतत्ते'—इति 'तस्मै ते'—इति च द्वयं यथा प्रयु-ज्यते, तथा अमुकशर्म्मन्नसावेतत्ते इति द्वयमेव प्रयोक्तव्यं भवत्यदृष्टार्थम्। प्रत्यक्षोपस्थितेनादःपदार्थेन ब्राह्मणेन समं पितुर-भेदबुद्ध्यर्थञ्चेत्यादरणीयम्।

"नामग्रहणवचनमेकदेशोत्कीर्त्तनाभिप्रायम्। तेन गोत्रा-देरप्युल्लेखः"—इति वदन्ति। तथा चास्मदीयं स्नानसूत्रपरि-शिष्टम्।

"गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि।
गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति।
सर्व्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि।
पितुरक्षय्यकाले तु कर्त्ता एवं न मुह्यति।
शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले तु कर्त्ता एवं न मुह्यति"।

इति। इदञ्च तिलोदकदानं पात्रेष्वेव कर्त्तव्यं न ब्राह्मणहस्तेषु।

कस्मात्? "पात्रेषु उक्तं दद्यात्तिलोदकम्"—इति वचनात्। तिलोदकदानपात्रञ्च—

"आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम्।
पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च।
कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृतम्।
तदेव हस्तघटितं स्थाल्यादि दैविकं स्मृतम्"।

इत्युक्तलक्षणं बोद्धव्यम्। आह। किमानन्तर्य्यात् तिलोदकमेव मन्त्रेण ददाति, उत केवलोदकमपि?—इति। तिलोदकमेव,—इति ब्रूमः। कस्मात्? आनन्तर्य्यादेव। तथाच कर्म्मप्रदीपः।

"तूष्णीं पृथगपो दद्यान्मन्त्रेण तु तिलोदकम्"।

इति ॥ ० ॥ ३५ ॥ ० ॥

अप उपस्पृश्यैवमेवेतरयोः ॥ ३६ ॥

अप उदकं, उपस्पृश्य स्पृष्ट्वा, एवमेव तूष्णीमुदकदानपूर्व्वकं मन्त्रेण तिलोदकदानं, इतरयोः पितामहप्रपितामहयोः, नाम गृहीत्वा कर्त्तव्यम्। तिलोदकदानाच्च परतो गन्धोदकमपि मन्त्रेण पात्रेष्वेव दद्यात्। तथा चोक्तम्।

"तूष्णीं पृथगपो दद्यान्मन्त्रेण तु तिलोदकम्।
गन्धोदकञ्च दातव्यं सन्निकर्षक्रमेण तु"।

इति। अत्र च, 'गन्धोदकञ्च'—इति चकारं कुर्व्वन् गन्धोदकस्यापि, तिलोदकवत् मन्त्रेण पात्रेषु दानं बोधयति। "प्रक्षिप्तावसरे तिलगन्धोदकैः पात्राणां पूरणं कर्त्तव्यम्। उपयोगस्त्वन्ते-

अनार्थतया पश्चात् सूत्रयिष्यति"—इति नारायणोपाध्यायाः ॥
॥ ० ॥ ३६ ॥ ० ॥

तथा गन्धान् ॥ ३७ ॥

तथा तेनैव प्रकारेण--नामग्रहणपूर्व्वकं मन्त्रोच्चारणेनेत्यर्थः। गन्धान्--बहुवचनात् गन्धादीन्, ददाति। दानञ्चामीषां ब्राह्मणहस्तेष्वेव न पात्रेषु। कस्मात्।

"गन्धान् ब्राह्मणसात् कृत्वा पुष्पाण्यृतुभवानि च।
धूपञ्चैवानुपूर्व्वेण अग्नौ कुर्य्यादतः परम्"।

इति कर्म्मप्रदीपवचनात् ॥ ० ॥ ३७ ॥ ० ॥

अग्नौ करिष्यामीत्यामन्त्रणᳫं होष्यतः ॥ ३८ ॥

होष्यतः होमं करिष्यतो यजमानस्य 'अग्नौ करिष्यामि'--इत्यामन्त्रणं कर्त्तव्यम्। ननु, आमन्त्रणं करोति,--इति वक्तव्ये किमर्थं होष्यतः,--इति विभक्त्यतिक्रमः क्रियते? उच्यते। आमन्त्रणं करोति,--इत्युक्ते गन्धादिप्रदानादनन्तरमेव आमन्त्रणं स्यात्। होष्यतः,--इति तु कुर्व्वन् होमं करिष्यत एव आमन्त्रणं न गन्धादिप्रदानात् परत एव,--इत्युपदिशति। तेन, मध्ये अन्यदपि किञ्चित् कर्म्म अस्ति,—इत्यवगच्छामः। किं तत्? भूमिशोधनमण्डलकरणादि। तदिदमर्थं होष्यतः,--इति विभक्त्यतिक्रमः क्रियते। एवमेके। 'अग्नौ कुर्य्यादतः परम्"—इति वचनाभावात्तस्मिन्नवसरे भूमिशोधनादि। एवमपरे। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्।

तदिदमामन्त्रणं सर्व्वेषां ब्राह्मणानां सकृदेव स्यात्, प्रधानस्यैकस्यैव वा। कस्मात्? "सर्व्वत्र प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्व्वान् वा"—इति ग्रन्थान्तरात् ॥ ० ॥ ३८ ॥ ० ॥

तैश्च ब्राह्मणैः,—

कुर्व्वित्युक्ते कंसे चरू समवदाय मेक्षणेनोपघातं जुहुयात्—स्वाहा सोमाय . पितृमतइतिपूर्व्वां स्वाहाऽग्नये कव्यवाहनायेत्युत्तराम् ॥ ३९ ॥

ऋजुरक्षरार्थः। अत्र किञ्चिद्वक्तव्यमस्ति। यथानिर्देशमेवैष होमः कर्त्तव्यः, न पुनर्मन्त्रान्ते स्वाहाकारः प्रयोक्तव्यः। परन्तु, स्वाहाकारेण हुत्वा पश्चात् सोमाय पितृमते,—इत्यादि मन्त्रशेषः समापनीयः। ॐकारश्च प्रत्येकं मन्त्रादौ न करणीयः। तथाच कर्म्मप्रदीपः।

"स्वाहां कुर्य्यान्न चात्रान्ते न चैव जुहुयाद्धविः।
स्वाहाकारेण हुत्वाऽग्नौ पश्चान्मन्त्रं समापयेत्"।

इति।

"नोङ्कुर्य्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्।
अन्येषाञ्चाविकृष्टानां कालेनाचमनादिना"।

इति च। अत्राह। निर्देशसामर्थ्यादेव पूर्व्वोत्तरत्वे सिद्धे, पूर्व्वाम्—इति, उत्तराम्—इति च, वचनमनर्थकम्। अथोच्यते, कारणं वक्तव्यम्। उच्यते। "अग्नये च सोमाय च जुहोति"—इत्यध्वर्य्युशाखादिषु देवताविपर्य्यासः श्रूयते; तन्निरासार्थमाचार्य्यः "पूर्व्वाम्" "उत्तराम्"—इत्याह।

इदमिदानीं सन्दिह्यते। किमयमग्नौकरणहोमः प्राचीनावीतिना कर्त्तव्यः, आहोस्विदुपवीतिना, उताहो अनियमेन ?—इति। अनियमेन,—इत्याह। कस्मात् ? इतः परं प्राचीनावीतिना कृत्योपदेशात्। इतः परं खल्वाचार्य्यः प्राचीनावीतिना कृत्यमुपदिशन् अत्राग्नौकरणहोमे प्राचीनावीतित्वोपवीतित्वयोरनियमं दर्शयति। तथाच कर्म्मप्रदीपः।

"अग्नौकरणहोमश्च कर्त्तव्य उपवीतिना।
प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिश्रुतेः।
अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन च।
निरुप्य हविरन्यस्मा अन्यस्मै न हि हूयते"।

इति। तथाच श्रूयते। "अग्नौकरणहोमे प्राचीनावीती भूत्वा"—इत्यादि। "स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः"—इति च माध्यन्दिनीये ब्राह्मणे।

"अग्निमान् निर्व्वपेत् पूर्व्वं चरुं वा शस्यमुष्टिभिः।
पितृभ्यो निर्व्वपामीति सर्व्वं दक्षिणतो न्यसेत्"।

इति च मात्स्ये पुराणे। तस्मादुभयस्वरसादिकल्पः,—इति परिशिष्टकृतः कात्यायनस्याभिप्रायः। तस्मात्,—ऊर्द्ध्वं प्रचीनावीतित्वोपदेशात् अग्नौकरणहोमे प्राचीनावीतित्वोपवीतित्वयोरनियमः,—इति सूत्रकारस्याभिप्रायोऽस्पष्टः परिशिष्टकृता स्पष्टीकृतः,—इति भट्टनारायणशूलपाणिरघुनन्दनादिमतमादरणीयम्।

यच्च वर्णितम्,—"येषान्तिस्र आहुतयो हूयन्ते, येषां चाग्निः पूर्व्वमिज्यते, स्वधाकारान्ताश्च मन्त्राः, तद्विषयं प्राचीनावीतित्वम्। येषान्तु द्वे आहुती, सोमश्च पूर्व्वं हूयते, स्वाहाका-

रान्तास्च मन्त्राः, तेषामुपवीतित्वम्। 'यज्ञोपवीती सोमं पितृ-मन्तमग्निं कव्यवाहनञ्च यजेत, प्राचीनावीती चेत् अग्निं पूर्व्वं, स्वाहास्थाने स्वधापदञ्च दत्त्वा जुहोति'--इति सूत्रान्तरात्"--इति। तदसङ्गतम्। अग्रहृत्रो सोमपूर्व्वाहुतिद्वयस्यैव सूचणात्। अस्मत्परिशिष्टकारणैव द्वयोरेव पक्षयोः स्वरस्तितत्वाच्च। अपिच। अन्याद्याहुतित्रयपक्षएवोपवीतित्वं दृश्यते। तथाच मत्स्य-पुराणे,--

"अग्नेः सोमयमाभ्याञ्च कुर्य्यादाप्यायनं बुधः"।

इत्यभिप्राय,—

"यज्ञोपवीती निर्व्वर्त्य ततः पर्य्युक्षणादिकम्।

प्राचीनावीतिना कार्य्यमतः सर्व्वं विजानता".

इत्युक्तम्। आदिपदाद्धोम उक्तः,—इति वाचस्पतिमिश्राः। तथा तैत्तिरीयशाखायामापस्तम्बसूत्रम्। "अथ पुनरुपवीती दक्षिणजान्वाच्य मेक्षणेनोपस्तीर्य्य तेनावदायाभिघार्य्य सोमाय पितृमते स्वधानम इति दक्षिणाग्नौ जुहोति, यमायाङ्गिरसे स्वधानम इति द्वितीयाम्, अग्नये कव्यवाहनाय स्वधानम-इति तृतीयाम्"--इति। तथा सांख्यायनसूत्रम्। "दक्षिण-जान्वाच्य यज्ञोपवीती प्रागासीनो मेक्षणेन जुहोति अग्नये कव्यवाहनाय"--इत्यादि। तस्मात्, सूत्रान्तराणि तत्तच्छा-खिनामेव प्राचीनावीतित्वादिकमुपदिशन्ति नास्माकम्। यदपि शौनकवचनम्--

"स्वाहाकारेण होमे तु भवेद्यज्ञोपवीतवान्।

तत्र प्रागग्नये हुत्वा पश्चात् सोमाय हूयते" ।

इति। तदपि. बह्वृचविषयम्। तथाचाश्वलायनकल्पसूत्रम्। "प्राचीनावीतीश्रमुपसमाधाय मेक्षणेनावदायावदानसम्पदा जुहुयात् सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय स्वधानम-इति, स्वाहाकारेण वाऽग्निं पूर्व्वं यज्ञोपवीती"--इति।

परिशिष्टीयवचनद्वयस्य व्यवस्थितविषयत्वं गोभिलीयानामग्नौकरणहोमे उपवीतित्वञ्च परिशिष्टप्रकाशकारः प्राह। तदपि न समीचीनम्। न खलु व्यवस्थायां किमपि प्रमाणमुपलभामहे। शाखान्तरविषयत्वाद्वचनान्तराणाम्। न खल्वत्र व्यवस्था परिशिष्टकारेण दर्शिता। कल्प्यते,--इति चेत्, यदृच्छोपनता खल्वियं कल्पना, न तु प्रमाणोपिता। एवं खल्वपहस्तितैव शास्त्रमर्य्यादा स्यात्। अस्मत्परिशिष्टं खल्वेतत् कात्यायनकृतं कर्म्मप्रदीपाख्यम्। कथं ज्ञायते? अध्येतृसम्प्रदायप्रसिद्धेः। अतएव छन्दोगपरिशिष्टमित्याख्यायते। भवानपि नात्र विप्रतिपद्यते। एवञ्च, अस्माकमेवैष विकल्पः कात्यायनेनोपदिष्टः--इत्यकामेनापि वक्तव्यम्। न खल्वस्मत्परिशिष्टे शाखान्तरेषां विधिरुचितोवर्णयितुम्।

अस्मद्गृह्यकारेण परतः प्राचीनावीतित्वोपदेशात् व्यक्तमग्नौकरणहोमे उपवीतित्वं दर्शितम्,--इति ब्रुवाणो वाचस्पतिरपि अनादेयवागेव। कुतः? परतः प्राचीनावीतित्वोपदेशस्य पुरतोनित्यवदुपवीतित्वाभिप्रायकत्वे प्रमाणाभावात्। तस्यानियममात्रपरताया एव परिशिष्टकृता स्पष्टीकृतत्वाच्च। परिशिष्टवचने सव्यापसव्ययोर्व्विकल्पः,--इति सएवावाह।

"परिशिष्टीयं पूर्व्ववचनं पूर्व्वपक्षाभिप्रायं, उत्तरवचनन्तु सिद्धान्ताभिप्रायम्, अतएव तत्र सिद्धान्तद्योतनार्थो वाशब्दः"—इति महाशयाः। तदप्यसङ्गतम्। कस्मात्? वाशब्दस्य विकल्पार्थत्वात्। श्रुति-द्वैविध्येन विकल्पस्योपपन्नतरत्वाच्च। अपिच। एवं खल्वग्नौकरणहोमेऽपि नियमतः प्राचीनावीतित्वे, 'अत ऊर्द्धं प्राचीनावीतिना'—इति सूत्रणमाचार्य्यस्यासङ्गतं स्यात्। तस्मादाचार्य्यविरुद्धोऽयं पक्षः। अलमतिप्रसङ्गेन।

प्रकृतमधुनोच्यते। अनग्निमता खल्वत्र पितृब्राह्मणपाणौ अग्नौकरणहोमः करणीयः। तथा चात्रैव कर्म्मणि कर्म्मप्रदीपः।

"पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निमान्।
हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निःक्षिपेत्"।

इति। यच्च,—'अग्निमतामेवात्राधिकारः। "अन्वष्टकास्वष्टकावदग्नौ हुत्वा मासे पितामह्यै प्रपितामह्यै च पूर्व्ववद्ब्राह्मणान् भोजयित्वा"—इति विष्णुसूत्रे, "वह्नौ हुत्वा दद्यात्"—इति कात्यायनसूत्रे च, अग्निवचनात् विप्रपाण्यादेर्व्यवच्छेदात्। शरमयवर्हिषा कुशमयवर्हिर्बाधवत्। पितृयज्ञीयहोमस्य लौकिकाग्नौ निषेधाच्च'—इति तत्त्वकारेणोक्तम्। तन्न समीचीनम्। कस्मात्? अस्मत्परिशिष्टकारेण अस्मिन्नेव कर्म्मणि अनग्निमतो विप्रपाणौ होमोपदेशात्। आचार्य्येणापि 'जुहुयात्'—इति सूत्रितं, न पुनर् 'अग्नौ जुहुयात्'—इति। अग्नौ होमोपदेशस्तु काठादिशाखिविशेषाणामेव नास्माकम्। कथं ज्ञायते? विष्णुप्रभृतीनां तत्सूत्रकारत्वात्। 'अन्वष्टकासु'—इति बहुवचनोपन्यासाच्च। मध्यमायां खल्वस्माकमन्वष्टक्यकर्म्म,—इत्यवोचाम। न खलु

स्वशास्त्रोपरोधेन परशास्त्रादरणं कर्त्तुमुचितम्। तथात्वे वा, तदुक्तमासादिश्राद्धमप्यस्माकं स्यात्। न चैवमिष्यते। तस्मा-दनादरणीयमेतत्।

अस्मिन्नेवावसरे पात्रेषु हुतशेषदानादिकं करणीयम्। कुतः ? "तूष्णीं पात्रेषु निःक्षिपेत्" इत्यादिवचनात्। ब्राह्मणभोज-नादिकमप्यस्मिन्नेवावसरे कर्त्तव्यम्। न च अनुपदेशात् नास्त्येव ब्राह्मणभोजनादिकम्—इति वक्तव्यम्। तस्यास्मत्श्राद्धकल्पादि-सिद्धत्वात्। "यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्— इति च लिङ्गात्। ब्राह्मणोपवेशनस्य पात्रेषु हुतशेषदानादेश्चा-र्थवत्त्वोपपत्तेश्च। प्रमाणान्तराणि विचारान्तराणि चास्माभि-र्ग्रन्थगौरवभयादुपेक्षितानि बुद्धिमद्भिरूहनीयानि ॥ ० ॥ २८ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य द्वितीया खण्डिका समाप्ता ॥ ० ॥

———

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके तृतीया खण्डिका।

अत ऊर्द्धं प्राचीनावीतिना वाग्यतेन कृत्यम् ॥ १ ॥

ऋजुरक्षरार्थः। वाग्यमनोपदेशात् मनसैव मन्त्रोच्चारणम्। "वाग्यतेन,—इति लौकिक्या वाचः प्रतिषेधो न मन्त्राश्रयायाः, मन्त्रोपदेशसामर्थ्यात्"—इति केचित्। तत्तु नातीवसमीचीनम्। कुतः? इतः पूर्व्वमपि तदविशेषात्। न खलु कृत्यमध्ये लौकिक्या वाचः कथनं शिष्टैरनुमन्यते ॥ ० ॥ १ ॥ ० ॥

सव्येन पाणिना दर्भपिञ्जूलीं गृहीत्वा दक्षिणाग्रां लेखामुल्लिखेदपहता असुरा इति ॥ २ ॥

सव्येन वामेन पाणिना दर्भपिञ्जूलीं पूर्व्वोक्तलक्षणां गृहीत्वा दक्षिणाग्रां लेखां—रेखां उल्लिखेत् कुर्य्यादित्यर्थः। प्रत्ययार्थमात्रविवक्षा। अपहता इति मन्त्रेण। कस्मिन् लेखामुल्लिखेत्? कर्षूणां मध्यतः,—इति ब्रूमः। कुतः? प्रक्रान्तत्वात्। पिण्डदानार्थं हि लेखोल्लेखनम्। पिण्डाश्च कर्षूष्वेव दास्यन्ते।

इदमिदानीं सन्दिह्यते। सव्येन पाणिना,—इत्युपादानात्,—किं सव्येनैव पणिना लेखोल्लेखनं कर्त्तव्यम्, पाणोरित् सन्निधाना-

तिशयात् सव्येन दर्भपिञ्जूल्या ग्रहणमात्रं करणीयम् ?—इति । ग्रहणमात्रम्—इत्याह । कुतः ? सन्निधानातिशयादेव । एतदुक्तं भवति । प्रथमं सव्येन पाणिना स्वस्तरात् दर्भपिञ्जूलीमादत्ते, ततः सव्यात् हस्तात् दक्षिणेन हस्तेन दर्भपिञ्जूलीं गृहीत्वा, सव्येन अन्वारभ्य लेखामुल्लिखेत् ,—इति । एवमुत्तरत्रापि वर्णनीयम् । तथाच कर्मप्रदीपः ।

"सव्येन पाणिनेत्येवं यदत्रासकृदीरितम् ।
परिग्रहणमात्रन्तत् सव्यस्यादिशति व्रतम् ।
पिञ्जूल्याद्यभिसंगृह्य दक्षिणेनेतरात् करात् ।
अन्वारभ्य च सव्येन कुर्य्यादुल्लेखनादिकम्" ।

इति । अत्र च, तिसृणामेव कर्षूणां मध्ये लेखोल्लेखनं बोद्धव्यम् । मन्त्रावृत्तिरुक्ता ॥ ० ॥ २ ॥ ० ॥

सव्येनैव पाणिनोल्मुकं गृहीत्वा दक्षिणार्द्धे कर्षूणां निदध्याद्ये रूपाणि प्रतिमुञ्चमाना इति ॥ ३ ॥

व्याख्यातप्रायमेतत् ॥ ० ॥ ३ ॥ ० ॥

अथ पितॄनावाहयत्येत पितरः सोम्यास इति ॥ ४ ॥

अथ ,—इत्यानन्तर्य्यार्थम् । कर्षूषु दर्भस्तरणानन्तरमित्यर्थः । कस्मात् ? उत्तरत्र कर्षूषु दर्भेषु अवनेजनस्य पिण्डदानस्य च सूत्रणात् । "अथ शब्दोऽन्यकर्त्तृकत्वपक्षेऽपि यजमानपितॄणामेव नियमार्थः"—इत्यपरे व्याचक्षते । पितॄन् ,—इति बहुवचनात् पितामहप्रपितामहयोरपि ग्रहणम् । स्पष्टमन्यत् ॥ ० ॥ ४ ॥ ० ॥

अथोदपात्रान् कर्षूषु निदध्यात् ॥ ५ ॥

अथशब्दः पूर्व्वप्रकृतार्थः। उदपात्रान्,—इति पुंस्त्वं छान्दसम्। उदकपात्राणि,—इति केचित् पठन्ति। कर्षूषु,—इति, "अथाग्निषोमीयेन चरन्त्युत्तरवेद्याम्"—इतिवत् सामीप्ये सप्तमी। अयमर्थः। पूर्व्वपूरितान्युदकपात्राणि कर्षूणां सन्निधावानुपूर्व्व्येण स्थापयेत् ॥ ० ॥ ५ ॥ ० ॥

सव्येनैव पाणिनोदपात्रं गृहीत्वाऽवसलवि पूर्व्वस्यां कर्षां दर्भेषु निनयेत् पितुर्नाम गृहीत्वाऽसाववनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ ६ ॥

अवसलविशब्देन पितृतीर्थमुच्यते,—इत्यवोचाम। तेन, पितृतीर्थेन पूर्व्वस्यां कर्षां दर्भेषु उदकं निनयेत्। कृतभाष्यमन्यत् ॥०॥६॥०॥

अथ उपस्पृश्यैवमेवेतरयोः ॥ ७ ॥

अपरकर्षूद्वये,—इति वाक्यशेषः। व्याख्यातमन्यत् ॥०॥ ७ ॥ ० ॥

सव्येनैव पाणिना दर्व्वीं गृहीत्वा सन्नीतात्तृतीयमात्रमवदायावसलवि पूर्व्वस्यां कर्षां दर्भेषु निदध्यात् पितुर्नाम गृहीत्वाऽसावेष ते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ ८ ॥

दर्व्वी पूर्व्वमेव व्याख्याता। तया दर्व्या, सन्नीतात्—एकीकृतात्

चरुहविषः, तृतीयमात्रं तृतीयांशमवदाय यथोक्तेन प्रकारेण निदध्यात् निर्व्वपेत्। 'श्लिष्टमन्यत्। सन्नीतात्,—इति लिङ्गात् सन्नयनं तावदवगम्यते। सन्नयनं नाम एकीकरणम्। न ज्ञायते;—केन सह कस्य सन्नयनम्—इति। तद्वक्तव्यम्। उच्यते। सर्व्वस्मात् हविषः अल्पमल्पमुद्धृत्य तेनां चरुणा सह सन्नयनं कर्त्तव्यम्। तस्माच्च सन्नीतादवदाय पिण्डा दातव्याः,—इति। कुत एतत्?

"यावदर्थमुपादाय हविषोऽर्भकमर्भकम्।
चरुणा सह सन्नीय पिण्डान् दातुमुपक्रमेत्"।

इति कर्म्मप्रदीपवचनात्॥०॥८॥०॥

अप उपस्पृश्यैवमेवेतरयोः॥९॥

व्याख्यातोऽक्षरार्थः। अत्र च, मध्यमायां कर्ष्वां पितामहस्य पिण्डदानं, दक्षिणस्यां प्रपितामहस्य,—इति बोद्धव्यम्। तथा चोक्तम्।

"पितुरुत्तरकर्ष्वन्ते मध्यमे मध्यमस्य तु।
दक्षिणे तत्पितुश्चैव पिण्डान् पर्व्वणि निर्व्वपेत्"।

इति॥०॥९॥०॥

स स्वयं यजमानः, पितृपितामहप्रपितामहानाम्—

यदि नामानि न विद्यात्;—स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं निदध्यात्, स्वधा पितृभ्योऽन्तरिक्षसद्भ्य इति द्वितीयं, स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयम्॥१०॥

मत्तुरवरार्थः। तदनेन सूत्रेण, पित्रादिनामाज्ञाननिमित्तं मन्त्रान्तरमेव पिण्डदाने विधीयते,--इत्यादरणीयम्। तेन, ये चात्र त्वा,--इत्ययं मन्त्रोऽस्मिन् पक्षे निवर्त्तते। स्वधाशब्दस्य प्रदानार्थस्योपादानाच्च। अत्र च, अन्यतरस्यापि नामाज्ञायमाने सर्व्वेषामेव अनेन मन्त्रान्तरेण पिण्डदानं कर्त्तव्यम्—त्रितयसम्बन्धेनैव विधानात्। एवमेके। यस्य नाम ज्ञायते तस्य नामोच्चारणपूर्व्वकं पूर्व्वेणैव मन्त्रेण पिण्डदानम्, यस्य च नाम न ज्ञायते, तस्यैवानेन मन्त्रान्तरेण। कुतः? नामाज्ञाननिमित्तेन मन्त्रान्तरविधानात्। नैमित्तिकं हि मन्त्रान्तरं नित्यं मन्त्रं बाधितुमीष्टे। फलचमसइव सोमम्। नामज्ञाने तु निमित्तमेव नास्ति कुतो नैमित्तिकं मन्त्रान्तरं कुतो वा तेन नित्यस्य बाधः। तदेतद् यथार्थमभिप्रेतम्। एवमपरे।

अत्र पृच्छामः। नामाज्ञाने तिलोदकादिदानं कथं कर्त्तव्यम्?—इति। तुल्यहेतुत्वादनेनैव मन्त्रान्तरेण कर्त्तव्यम्—इति केचित्। तदसङ्गतम्। कस्मात्? अतिक्रम्य विधानात्। तिलोदकादिकं खल्वतिक्रम्य पिण्डदानएवैतन्मन्त्रान्तरमाचार्य्येण विधीयते। कः पुनरत्राभिप्रायः? पिण्डदानमेवानेन मन्त्रान्तरेण कर्त्तव्यम्--इति। पिण्डदानसंबन्धेनैव विधानाच्च। तस्मात्,--पिण्डदानप्रयोगविधिरेवायम्। तस्मात्,--अतीतं तिलोदकादिकमनागतञ्चाञ्जनादिकमनेन मन्त्रेण न देयमेव। अपर आह। मन्त्रान्तराविधानादमन्त्रकमेव तेषां दानम्--इति। तदप्युपेक्षणीयम्। कुतः? तेषामपि समन्त्रकदानोपदेशात्। पिण्डदानवत् तत्रापि समन्त्रकत्वस्योचितत्वाच्च।

आह। एवं भवता द्वावपि पक्षौ प्रतिक्षिप्तौ, कतमस्तर्हि तव पक्षः? उच्यते। अनेन मन्त्रान्तरेण तावन्न कर्त्तव्यमेव, नाप्यमन्त्रकम्। किन्तु, प्राचीनं तिलोदकादि पराचीनञ्चाञ्जनादि यथासूत्रितेनैव मन्त्रेण देयम्। ननु, "नाम गृहीत्वा"—इति तत्र तत्र सूत्रणमस्ति, नाम्न्यज्ञायमाने कथं यथासूत्रितेन मन्त्रेण दानममीषां सम्भवति? उच्यते। नाम्न्यज्ञायमाने नामस्थाने पृथिवीषदादयः शब्दाः प्रयोक्तव्याः। कथं ज्ञायते? शृणु यथाज्ञायते। पितृपितामहप्रपितामहानां नामस्थाने विहितेषु मन्त्रान्तरेषु,—पृथिवीषदिति, अन्तरिक्षसदिति, दिविषदिति च विशेषोपदेशात् तेषामेव पित्राद्यभिधानस्थानपातित्वमवगच्छामः। तेन, पृथिवीषदसावेतत्ते तिलोदकं, अन्तरिक्षसदसावेतत्ते तिलोदकं, दिविषदसावेतत्ते तिलोदकम्—इति प्रयोगे विशेषः। ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा,—इति तु सर्व्वत्रैव प्रयोज्यम्। पिण्डदाने तु स्वधापदवन्मन्त्रान्तरविधानात् पूर्व्वस्य मन्त्रस्य निवृत्तिरेव स्यादित्यवोचाम। तथाच स्मरणम्।

"पृथिवीषत् पिता वाच्यस्तत्पिता चान्तरिक्षसत्।
अभिधानापरिज्ञाने दिविषत् प्रपितामहः"।

इति। तदिदं स्मरणमाचार्य्यसंवादितमर्थं वदतीत्यादरणीयम्। रघुनन्दनस्तु छन्दोगोऽपि एतदजानानः,—"नामान्यविद्वांस्ततपितामहप्रपितामहेति"—इति पिण्डपितृयज्ञीयमाश्वलायनकल्पसूत्रमाकुलीकृत्य,—"नामान्यविद्वांस्त्वितिपितामहप्रपितामहाः"—इति परिकल्प्य लिखित्वा बहुविरुद्धं वर्णयाञ्चकार ॥०॥ १० ॥०॥

निधाय जपत्यत्र पितरो मादयध्वं यथाभाग-
मावृषायध्वमिति ॥ ११ ॥

पिण्डान् निधाय, अत्र पितरः—इतिमन्त्रं जपति। अथ, निधाय—इत्येतदवाच्यमिति चेत्। न। प्रतिनिधानं जपप्रतिषेधार्थत्वात्। कथं नाम? सर्व्वान् पिण्डान् निधाय जपति न प्रतिपिण्डनिधानम्—इति। ननु, सर्व्वेषां पिण्डानां निधानं सूत्रयित्वा परतः सूत्रणादेव प्रतिपिण्डनिधानं जपो न भविष्यति। एवन्तर्हि अन्यथा वर्णयिष्यामः। निधायैव जपति न पुनरन्यदपि किञ्चित् कृत्वा—इति। किमतः?

"अवनेजनवत् पिण्डान् दत्वा विल्वप्रमाणकान्।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्"।

इत्युक्तं पुनरवनेजनमत्र न कर्त्तव्यम्। एतदतः ॥ ० ॥ ११ ॥ ० ॥

अपपर्य्यावृत्य पुरोच्छ्वासादभिपर्य्यावर्त्तमानो जपे-
दमीमदन्त पितरो यथाभागमावृषायिषतेति ॥
॥ १२ ॥

अप,—इत्यपादक्षिण्यार्थम्। अप्रादक्षिण्येन पर्य्यावृत्य परिक्रम्य, वामावर्त्तेनेत्यर्थः। "वामं पर्य्यावृत्य"—इति नारायणोपाध्यायः पठति। तदा व्यक्त एवार्थः। इदञ्च पर्य्यावर्त्तनं केचिदुदगन्तं मन्यन्ते। गौतमादयस्तु दक्षिणापर्य्यन्तमिच्छन्ति। तथा चोक्तम्।

"वामम्मावर्त्तनं केचिदुदगन्तं प्रचक्षते।
सर्व्वं गौतमशाण्डिल्यौ शाण्डिल्यायन एव च"।

इति। तेन उदङ्मुखो दक्षिणामुखो वा भूत्वा। इदानीं प्राणान् संयम्य, 'पुरा' पूर्व्वं, 'उच्छ्वासात्' प्राणविमोकात्, अमीमदन्त,— इति मन्त्रं जपेत्। किं कुर्व्वन्? अभिपर्य्यावर्त्तमानः। येनैव पथा-गतः, तेनैव पथा पर्य्यावर्त्तमानः। आगत्य च प्राणान् विमोचयेत्। तथा चोक्तम्।

"आवृत्य प्राणमायम्य पितॄन् ध्यायन् यथार्हतः।
जपंस्तेनैव चावृत्य ततः प्राणान् विमोचयेत्"।

इति ॥ ० ॥ १२ ॥ ० ॥

सव्येनैव पाणिना दर्भपिञ्जूलीं गृहीत्वाऽवसलवि पूर्व्वस्यां कर्ष्वां पिण्डे निदध्यात् पितुर्नाम गृहीत्वाऽसावेतत्त आञ्जनं ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधेति ॥ १३ ॥

दर्भपिञ्जूलीं,—पूर्व्वमञ्जनेनाञ्जितानां तिसृणामेकाम्। आञ्जनं—आ सम्यक् अञ्जनम्। व्याख्यातमन्यत् ॥ ० ॥ १३ ॥ ० ॥

अथ उपस्पृश्यैवमेवेतरयोः ॥ १४ ॥

स्पष्टमेतत्। अत्रापरयोर्दर्भपिञ्जूल्योर्विनियोगः ॥ ० ॥ १४ ॥ ० ॥

तथा तैलम् ॥ १५ ॥

तथा तेनैव प्रकारेण, तैलं,—पूर्व्वमासादितं, पिण्डेषु निदध्यात्।

एतदुक्तं भवति। पितुर्नाम गृहीत्वा असावेतत्ते तैलं ये चात्र त्वेति पितृपिण्डे दत्त्वा अप उपस्पृश्यैवमेवेतरयोर्दद्यात् ॥ ० ॥ १५ ॥ ० ॥

तथा सुरभि ॥ १६ ॥

पूर्व्वसूत्रव्याख्यानेनैवेदमपि व्याख्यातम्। सोऽयमञ्जनतैलसुरभीणां पूर्व्वमासादितानां विनियोगः ॥ ० ॥ १६ ॥ ० ॥

अथ निह्नुते ॥ १७ ॥

अथ,—इत्यानन्तर्य्यार्थम्। अन्यथा खल्वनुषङ्गेन विधानात् अञ्जनतैलसुरभीणां प्रत्येकम्,—आनन्तर्य्यातिरेकात् सुरभिमात्रस्यैव वा निह्नवमाशङ्कीत कश्चिन्मन्दमतिरिति तन्निरासार्थमथेत्याह। अञ्जनतैलसुरभीणि निधाय अथ अनन्तरं निह्नुते,—प्रकृतान् पिण्डान् आच्छाद्य नमस्करोति ॥ ० ॥ १७ ॥ ० ॥

कथं निह्नुते? उच्यते,—

पूर्व्वस्यां कर्ष्वां दक्षिणोत्तानौ पाणी कृत्वा नमो-
वः पितरो जीवाय नमो वः पितरः शूषायेति ॥
॥ १८ ॥

जपति,—इति वक्ष्यमाणं सिंहावलोकितन्यायेन संबध्यते। दक्षिणः पाणिरुत्तानो ययोः पाण्योस्तौ दक्षिणोत्तानौ। उत्तानवचनात् सव्यस्य पाणेर्न्युब्जता प्रतीयते। एवमुत्तरत्रापि व्याख्येयम्। आज्वन्यत् ॥ ० ॥ १८ ॥ ० ॥

मध्यमायाᳪ सव्योत्तानौ नमो वः पितरो घोराय नमो वः पितरो रसायेति ॥ १९ ॥

जपति। मध्यमायां कर्षूाम्। सव्योत्तानौ पाणी कृत्वा ॥ ० ॥ ॥ १९ ॥ ० ॥

उत्तमायां दक्षिणोत्तानौ नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति ॥ २० ॥

इदमपि पूर्व्ववद्व्याख्येयम् ॥ ० २० ॥ ० ॥

अथाञ्जलिकृतो जपति नमो वः पितरः पितरो-नमो व इति ॥ २१ ॥

अथशब्दः पूर्व्वप्रकृतार्थः। पूर्व्वप्रकृतं कर्षूत्रयं अभिसन्धाय, अञ्जलिकृतः सन्, नमोव इति मन्त्रं जपति। अञ्जलिकृतः,—इति व्यत्यासेन प्रयुक्ते। कृताञ्जलिरित्यर्थः। "अञ्जलिश्चात्र संहतः कर्त्तव्यो-न व्याकोषः। कुतः? निह्नवे संहतस्योपयोगित्वात् व्याकोषस्य चन्द्रदर्शनाद्युपयुक्तत्वात्"—इति भट्टनारायणोपाध्यायाः ॥०॥२१॥

गृहानवेक्षते गृहान् नः पितरो दत्तेति ॥ २२ ॥

"गृहाः पत्नी"—इति वचनात् गृहान् पत्नीम्। एवमेके। गृहप्रार्थनयैव पत्नीप्रार्थनाया अपि चरितार्थत्वात् गृहशब्दस्य पत्न्यामरूढ़त्वाच्च निवेशनमेवार्थः। एवमपरे। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्। बहुवचनान्तपुंलिङ्गगृहपदोपादानात्, पूर्व्वैव व्याख्या ज्यायसी प्रतिभाति ॥ ० ॥ २२ ॥ ० ॥

पिण्डानवेक्षते सद्यो वः पितरो देष्मेति ॥ २३ ॥

ऋज्वर्थं सूत्रम् ॥ ० ॥ २३ ॥ ० ॥

सव्येनैव पाणिना सूत्रतन्तुं गृहीत्वाऽवसलवि पूर्व्वेषां कर्ष्वां पिण्डे निदध्यात् पितुर्नाम गृहीत्वाऽसावेतत्ते वासो ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधेति ॥ २४ ॥

सूत्रतन्तुम्,—प्रकरणसामर्थ्यात् क्षौमदशाम् । व्याख्यातमन्यत् ॥ ० ॥ २४ ॥ ० ॥

अप उपस्पृश्यैवमेवेतरयोः ॥ २५ ॥

क्षतभाष्यमेतत् ॥ ० ॥ २५ ॥ ० ॥

सव्येनैव पाणिनोदपात्रं गृहीत्वाऽवसलवि पिण्डान् परिषिञ्चेदूर्जं वहन्तीरिति ॥ २६ ॥

ऋजुरक्षरार्थः । अत्र पूर्व्ववत् 'एवमेवेतरयोः'—इत्यकरणात् पिण्डान्—इति बहुवचनाच्च सकृदेव मन्त्रमुच्चार्य्य त्रीन् पिण्डान् परिषिञ्चेत्—इति बोद्धव्यम् । इदञ्च परिषेचनम्—

"गन्धादीन् निक्षिपेत्तूष्णीं तत आचामयेत् द्विजान्" ।

इत्यादि,—

"प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ।
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत्" ।

इत्यन्तकर्म्मप्रदीपोक्त-कर्म्मक्रमेण कारणीयम्। एवमेके। यावदुक्तत्वादत्र कर्म्मप्रदीपोक्तः कर्म्मक्रमो न कर्त्तव्यः। एवमपरे। एतस्मिन्नेव क्रमे,—

"युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा।
कृत्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः"।

इति कर्म्मप्रदीपाद्युक्तम्—"विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा पिण्डपात्राणि चालयित्वा यथाशक्ति दक्षिणां दद्यात्"—इति श्राद्धकल्पाद्युक्तञ्च कर्म्म कुर्य्यात्॥ ० ॥ २६ ॥ ० ॥

मध्यमं पिण्डं पत्नी पुत्रकामा प्राश्नीयादाधत्त पितरो गर्भमिति ॥ २७ ॥

ऋजुरक्षरार्थः। सा तु भोजनकाले प्राश्नीयात् न पुनरेतस्मिन्नेव-क्रमे,—इति द्रष्टव्यम्। मन्त्रञ्च पतिः पठति। कस्मात्? 'यथेह पुरुषः स्यात्'—इति मन्त्रलिङ्गात्॥ ० ॥ २७ ॥ ० ॥

यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात् ॥ २८ ॥

उच्छिष्टशब्दोऽत्र भुक्तावशिष्टपाकवचनो न तु भोजनपात्रावशिष्टवचनः। यः तेषां ब्राह्मणानां उच्छिष्टभाक्—उच्छिष्टं भजते,—इत्युच्छिष्टभाक्—उच्छिष्टभजनार्हः, स्यात्, स 'प्राश्नीयात्—इत्यनुषज्यते। किं प्राश्नीयात्? तेषामुच्छिष्टम्। कुतः? उपस्थितत्वात्। वाशब्दः समुच्चये। अयमपि स्वभोजनकाल एव प्राश्नीयात्। कः पुनस्तेषामुच्छिष्टभाक्? यजमानादिः,—इत्याह। कस्मात्?

"शेषमिष्टेभ्योदत्त्वा स्वयञ्च भुञ्जीत"—इति वचनात्। तथा स्मृत्यन्तरम्।

"प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम्।

इति। तथा देवलः।

"निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना।
आचम्य पाणी प्रक्षाल्य ज्ञातीन् शेषेण भोजयेत्।
ततो ज्ञातिषु भुक्तेषु स्वान् भृत्यानपि भोजयेत्।
पश्चात् स्वयञ्च पत्नी च श्राद्धशेषमुदाहरेत्"।

इति। तैत्तिरीयशाखायामापस्तम्बसूत्रम्। "सर्व्वतः समवदाय या-सावरार्द्धमश्नीयाद् यथोक्तम्"—इति। अत्र भूरिद्रव्य-कात्स्न्यवाचि-सर्व्वशब्दान्नियमोऽयमदृष्टार्थः,—इत्याचक्षते। श्लोकमपि उदाहरन्ति।

"श्राद्धं कृत्वा तु यः शेषं नावमश्नाति मन्दधीः।
लोभान्मोहाद्भयाद्वाऽपि तस्य तन्निष्फलं भवेत्"।

इति। "पित्र्यमाग्नेयं तत्रैव प्राशितं नैवाप्राशितञ्च भवति"-इति,

"उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्।
उपवासं तदा कुर्य्यादाघ्राय पितृसेवितम्"।

इति च श्रुतिस्मृती नियममवगमयतः। आचार्य्योऽपि "प्राश्नीयात्" --इति प्रशब्देनैतदेव दर्शयति। सेयमुच्छिष्टस्य प्रतिपत्तिः। अतो-यत्नोच्छिष्टं न शिष्यते, तत्र नैष नियमः। प्रतिपत्तेः प्रतिपाद्या-प्रयोजकत्वात्। यत् पुनर्यमवचनम्—

"भक्ष्यं भोज्यं तथा पेयं यत् किञ्चित् पच्यते गृहे।
न भोक्तव्यं पितॄणान्तदनिवेद्य कथञ्चन"।

इति। यच्च शङ्खवचनम्—

"यत्किञ्चित् पच्यते गेहे भक्ष्यं भोज्यमथापि वा।
अनिवेद्य न भुञ्जीत पिण्डमूले कथञ्चन"।

इति। तत् श्राद्धार्थपाकादन्यदपि यत्किञ्चिद् भक्षणार्थं गृहे पच्यते, तदपि पितृणां निवेद्यैव भोक्तव्यम्—इत्युपदिशति। न पुनः श्राद्धशेषातिरिक्तस्य भोजनं निषेधति। कथं ज्ञायते? अनयोरेव श्राद्धशेषव्यतिरिक्तस्यापि पितृणां निवेद्य भोजनोपदेशात्। यत्किञ्चित्—इति, गृहे—इति च कारणाद्वेवमवगच्छामः। अतएव पिण्डमूले—पिण्डान्तिके निवेदनमुपदिश्यते, न तु तेनैव पिण्डदानं ब्राह्मणभोजनं वा।

आह। कुतः पुनरियमवधारणा;—पिण्डमूले निवेदनं न ब्राह्मणभोजनार्थम्—इति। ननु, येषां पिण्डदानात् परतो ब्राह्मणभोजनं, तेषां ब्राह्मणभोजनार्थमपि पिण्डमूले निवेदनं सम्भवति। उच्यते। सत्यं सम्भवति। न तु तेषामयमुपदेशः। केषां तर्हि? येषां ब्राह्मणभोजनात् परतः पिण्डदानं, तेषाम्—इति ब्रूमः। कस्मात् कारणात्?

"उच्छिष्टसन्निधौ कार्य्यं पिण्डनिर्व्वपणं बुधैः"।

इति तेनैव ब्राह्मणभोजनात् परतः पिण्डदानोपदेशात्। शङ्खवचनस्य तु पूर्व्वार्द्धं शङ्खसंहितायामेवं पश्यामः,—

"पङ्क्तिविदात्मनो गेहे भक्ष्यं वाऽभक्ष्यमेव वा"।

इति। तदा व्यक्त एवायमर्थो—यः खल्वस्माभिर्व्वर्णितः। कुतः? अभक्ष्यमपि भुञ्जतः पिण्डमूले निवेदनोपदेशात्। "शङ्खवचनं न

श्राद्धेतरभोजनव्यावर्त्तकं, किन्तु यत्किञ्चित्—इति श्राद्धार्थत्वेन विशेषणीयम्। अन्यथा श्राद्धप्रतिषिद्धद्रव्याणां भक्ष्यत्वं न स्यात्। तेन श्राद्धार्थपक्वं यत्, तददत्त्वा न भोक्तव्यम्—इति तस्यार्थः।" —इति वचनतात्पर्य्यमपर्य्यालोचयतो रघुनन्दनस्य कल्पनान्तु नाभिनन्दामहे। प्रमाणाभावात्। युक्तेश्चाकिञ्चित्करत्वात्। भिन्नौ खल्वेतौ पदार्थौ—यत् पिण्डमूले निवेदनं, यच्च श्राद्धावशिष्टम्, —इति। अलमसदावेशेन। प्रकृतमनुसरामः।

कश्चित् पुनरन्यथेमं ग्रन्थं वर्णयाञ्चकार,—"यो वा तेषां ब्राह्मणानाम्"—इत्यादिम्। "यः तेषां ब्राह्मणानामुच्छिष्टं भजते, तस्योच्छिष्टभाजो यजमानज्येष्ठस्य पुत्रपौत्रादेः पत्नी मध्यमं पिण्डं प्राश्नीयात्"—इति। तन्मते, ज्ञातिप्रभृतीनामपि तदुच्छिष्टभाक्त्वात् तेषामपि पत्न्यः प्राश्नन्तु। न चैवमिष्यते। तस्मान्न किञ्चिदेतत् ॥ ० ॥ २८ ॥ ० ॥

अभून्नो दूतो हविषो जातवेदा इत्युल्मुकमद्भिरभ्युक्ष्य ॥ २९ ॥

उल्मुकं दक्षिणार्द्धे कर्षूणां स्थितम्। श्लिष्टमन्यत् ॥ ० ॥ २९ ॥ ० ॥

द्वन्द्वं पात्राणि प्रक्षाल्य प्रत्यतिहारयेत् ॥ ३० ॥

पात्राणि चरुस्थाल्यादीनि प्रक्षाल्य निर्णिज्य, प्रत्यतिहारयेत्—केनचित् शिष्यादिना आनयेत्। असम्भवे स्वयमपि हरेत्। प्रतिशब्द-

कारणात् येन यज्ञीतमासीत्, तेनैव तत् हारयेत्। अतिशब्दोऽसम्प्रतिक्षेपार्थः। तेन कालविलम्बमकुर्व्वन् हारयेत्—इत्यर्थः। "अभिहारयेत्"—इति केचित् पठन्ति। पात्राणि कथं प्रत्यतिहारयेत्? 'द्वन्द्वं' यथा भवति, तथा प्रत्यतिहारयेत्। द्वन्द्वशः प्रत्याख्य,—इति वा वर्णनीयम् ॥०॥ ३० ॥ ० ॥

अप्सु पिण्डान् सादयेत् ॥ ३१ ॥

उदके पिण्डान् निक्षिपेत्। पिण्डान्—इति बहुवचनं व्यत्ययेन, द्वयोरेवावशिष्टत्वात्। पत्न्याः प्राशनस्यानियतत्वात्तदभावपक्षाभिप्रायं वा वर्णनीयम्। अपरे पुनरेतदविद्वांसो भाषन्ते,—"पिण्डान्—इति बहुवचनं षट्पिण्डश्राद्धविषयम्"—इति ॥ ० ॥ ३१ ॥०॥

प्रणीते वाऽग्नौ ॥ ३२ ॥

'पिण्डान् सादयेत्'—इत्यनुवर्त्तते ॥ ० ॥ ३२ ॥ ० ॥

ब्राह्मणं वा भोजयेत् ॥ ३३ ॥

पिण्डान्—इत्येव ॥ ० ॥ ३३ ॥ ० ॥

गवे वा दद्यात् ॥ ३४ ॥

पिण्डानेव। इदमिदानीं विचार्य्यते। किमत्र मात्रादिश्राद्धं मातामहादिश्राद्धमस्ति, उत यावदुक्तत्वान्न?—इति। न,—इति ब्रूमः। कुतः? यावदुक्तत्वादेव। योषित्श्राद्धं खल्वस्माकमवसानदिनव्यतिरेकेण पृथक् नास्ति। तथाच कर्म्मप्रदीपः।

"न योषिद्भ्यः पृथग् दद्यादवसानदिनादृते।
स्वभर्त्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता"।

इति। वचनबलात्तु क्वचित् क्रियते। तदप्याह, स एव।

"मातुः प्रथमतः पिण्डं निर्व्वपेत् पुत्रिकासुतः।
द्वितीयन्तु पितुस्तस्यास्तृतीयञ्च पितुः पितुः"।

इति।

"मातुः सपिण्डीकरणं पितामह्या सहोदितम्"।

इति च। न च परशास्त्रमप्यादर्त्तुं शक्यते। स्वशास्त्रोपरोधप्रसङ्गात्। तस्मात्, मात्रादिश्राद्धं तावदत्र न कर्त्तव्यमेव। मातामहादि-श्राद्धमप्यत्र न करणीयम्। तथाच कर्म्मप्रदीप आह।

"कर्षूसमन्वितं त्यक्त्वा तथाऽऽद्यं श्राद्धषोडशम्।
प्रत्याब्दिकञ्च, शेषेषु पिण्डाः स्युः षडिति स्थितिः"।

इति। तस्मात् पित्रादित्रयाणामेवात्र श्राद्धम्—इति सिद्धम् ॥०॥ ॥ ३४ ॥ ० ॥

अथेदानीमनेनैव श्राद्धविधिना श्राद्धान्तराण्यपि व्याख्यातानि,—इति मनसि कृत्वा, वृद्ध्यादिषु तावत् कञ्चिद्विशेषमुपदिदिक्षुराह,—

वृद्धिपूर्त्तेषु युग्मानाशयेत् ॥ ३५ ॥

"वृद्धिः पुरुषसंस्कारः",—इति भट्टभाष्यम्। पूर्त्तम्—

"वापीकूपतड़ागादि देवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते"।

इत्याद्युक्तलक्षणम्। तेषु, पित्रर्थमपि युग्मान् ब्राह्मणान् भोजयेत्। अस्मादपि लिङ्गात् अन्वष्टक्ये ब्राह्मणभोजनमवगम्यते ॥०॥ ३५ ॥०॥

प्रदक्षिणमुपचारः ॥ ३६ ॥

प्रदक्षिणं यथा भवति, तथा दर्भासनादिक उपचारः, कर्त्तव्यः-- इति सूत्रशेषः। "वृद्धिपूर्त्तेषु"--इत्यनुवर्त्तते ॥ ० ॥ ३६ ॥ ० ॥

यवैस्तिलार्थः ॥ ३७ ॥

तिलैर्योऽर्थः प्रयोजनं क्रियते, स यवैः कर्त्तव्यः। वृद्धिपूर्त्तेषु,-- इत्येव। सोऽयं संक्षेपतः श्राद्धविधिः। विस्तरतस्तु, कर्म्मप्रदीपे वाशिष्ठे च कल्पे द्रष्टव्यः। श्राद्धमन्त्राश्च परिसंख्यानादुपलब्धव्याः। अतएव कर्म्मप्रदीपे कात्यायनेनोक्तम्।

एष श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया।
ये विदन्ति न मुह्यन्ति श्राद्धकर्म्मसु ते क्वचित्।
इदं शास्त्रञ्च गृह्यञ्च परिसंख्यानमेवच।
वशिष्ठोक्तञ्च यो वेद स श्राद्धं वेद नेतरः"।

इति। इदमिदानीं सन्दिह्यते। किं ब्राह्मणभोजनमत्र प्रधानम्, आहोस्वित् पिण्डदानम्, उताहो उभयम्?—इति। आह। शेषेण पिण्डदानविधानात् पिण्डदानं प्रतिपत्तिरेव; कस्मादियं विचारणा? उच्यते। सत्यमत्र शेषः प्रतिपाद्यते, तथापि नासौ प्रतिपत्तिः। बलिहरणे शेषस्य प्रतिपादनेऽपि न तत् प्रतिपत्तिः,—इति यथा। किं कारणम्? अर्थकर्म्मणि तस्य प्रतिपादनात्। कथं ज्ञायते? फलार्थवादोपपत्तेः। तच्च तत्र तत्र उदाहरिष्यामः। विनाऽपि

शेषं पिण्डदानदर्शनाच्च। क्व ? पिण्डपितृयज्ञादौ। ब्राह्मणभोजनस्य खल्वभावे कस्य शेषः प्रतिपादयिष्यते। ब्राह्मणभोजनस्य पुरस्तादपि केषाञ्चित् पिण्डदानविधानाच्चैवमवगच्छामः। तस्मात्,—अर्थ-कर्म्मैवासौ, न प्रतिपत्तिः। तत्रैव च शेषः प्रतिपाद्यते। अथवा। प्रतिपत्त्यर्थकर्म्म पिण्डदानं स्यात्, न प्रतिपत्तिरेव। तस्मात्,— भवति विचारणैषा।

तत्र, उभयं प्रधानम्—इति भट्टनारायणप्रभृतयो मन्यन्ते। श्लोकानपि उदाहरन्ति।

"प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः।
गयादौ पिण्डमात्रस्य दीयमानस्य दर्शनात्।
श्रुतौ च पिण्डदानस्य केवलस्य विधानतः।
भीष्मस्य ददतः पिण्डान् हस्तोत्थानस्मृतेरपि।
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः।
ब्राह्मणानां परीक्षायां महायत्नप्रदर्शनात्।
महाफलविधेश्चैव पंक्तिपावनभोजनात्।
अपांक्त भोजनाद्दातुर्महानर्थप्रदर्शनात्॥
आमश्राद्धविधानस्य विना पिण्डं क्रियाविधेः।
तदालभ्याप्यनध्यायविधानश्रवणादपि।
मतद्वैधमुपादाय मम त्वेतत् हृदि स्थितम्।
प्राधान्यमुभयोर्यस्मात् तस्मादेष समुच्चयः"।

इति। तद्इमे श्लोकाः कर्म्मप्रदीपस्य तृतीयप्रपाठकस्यान्तिमे खण्डे पठ्यन्ते। क्वचित् द्वितीयचतुर्थौ विहाय। तस्मादस्माकं समुच्चयपक्ष आदरणीयः। अत्र च, निमित्ततो ब्राह्मणभोजनस्य

पिण्डदानस्य चाननुष्ठानेऽपि। उभयोः प्राधान्यं नानुपपन्नम्। असोमयाजिपक्षे, दधिपयोयागवत्। फलश्रुतिश्चोभयत्राप्यस्ति। ब्राह्मणभोजनं प्रधानं पिण्डदानमङ्गम्—इति शूलपाणिप्रभृतयः। अन्नोत्सर्गः प्रधानम्—इति वाचस्पतिमिश्रादयः। स्मरन्ति च।

"श्राद्धं कृत्वा प्रयत्नेन त्वराक्रोधविवर्ज्जितः।
उष्णमन्नं द्विजातिभ्यः श्रद्धया प्रतिपादयेत्"।

इति। अत्र खल्वन्नोत्सर्गे श्राद्धपदं प्रयुक्तम्। तथा स्मृत्यन्तरम्।

"संस्कृतं व्यञ्जनाद्यान्नं पयोदधिघृतान्वितम्।
श्रद्धया दीयते यस्मात्, तेन श्राद्धं निगद्यते"।

इति। अपिच। नित्यश्राद्धादौ तावत् पिण्डनिषेधोऽवगम्यते। स च प्राप्तस्यैव भवति। प्राप्तिश्चातिदेशादेव। स खल्वङ्गानामेव न प्रधानस्य। कस्मात्? उपकारकत्वेनैवातिदेशस्य सप्तमाध्याये सिद्धान्तितत्वात्। तस्मात् पिण्डदानमङ्गमेव। अङ्गेषु फलश्रुतिरर्थवाद एव। केवलपिण्डदानविधिस्तु अङ्गभूतपिण्डदानात् कर्म्मान्तरमेव। प्रकरणाधिकरणन्यायात्,—इति श्राद्धविवेकः।

इदन्त्विह वक्तव्यम्। "मासमग्निहोत्रं जुहोति"—इति कुण्डपायिनामयने यथा अग्निहोत्रवत् जुहोति,—इति वचनव्यक्त्या नैयमिकस्याग्निहोत्रस्य धर्म्मा अतिदिश्यन्ते; प्रधानञ्च होमो—योऽग्नये च प्रजापतये च,—इति, यथा वा "उद्भिदा यजेत"—इत्येवमादौ अव्यक्तयजतौ, सौमिकधर्म्मा इव प्रधाना अपि यजतयः प्रदिश्यन्ते, तयोः रूपान्तराभावात्। तद्वदत्रापि स्यात्। आनर्थक्यात् हि प्रधानस्यानतिदेश उक्तः। न चैवमानर्थक्यं शक्यते वक्तुम्।

अथ मन्यसे,—नासौ प्रधानस्यातिदेशः। कस्य तर्हि? अङ्गस्यैव। प्रधानं खल्वत्र जुहोतिना यजतिना च विहितं, द्रव्यदेवते पुनरङ्गे एवातिदिश्येते,—अङ्गान्तरवत्—इति। एवन्तर्हि प्रकृतेऽपि श्राद्धचोदनया प्रधानं विहितम्—इति न प्रधानस्यातिदेशः, अपितु अङ्गमेव—इतिकर्त्तव्यताकलापः प्रदिश्यताम्। कथन्तर्हि पिण्डदानस्य निषेधः क्रियते? इतिकर्त्तव्यतानिषेधाभिप्रायतया,—इति गृहाण। नायं पिण्डदानस्य निषेधः, अपितु तदितिकर्त्तव्यताया एव। तस्याश्च निषेधात् पिण्डोऽपि न दीयते। उत्तरवेदेर्निषेधात् वैश्वदेवे सुनासीरीये च यथा न अग्निः प्रणीयते, तद्वत्।

अपिच। कस्मात् कारणादुभयोः प्राधान्यपक्षे पिण्डदानस्य निषेधो न घटते,—इति तावदसौ प्रष्टव्यः। स यदि ब्रूयात्;—प्राप्तेरभावात्—इति। तं प्रति ब्रूयात्; —विध्यन्तेन प्राप्तेरभावेऽपि विध्यादिनः प्राप्तिरस्त्येव। कुतः? श्राद्धपदस्यैवैवमर्थ्यात्। तत्र, विध्यादितः प्राप्तः पिण्डः प्रतिषिध्यमानस्तदितरकरणमेव प्रयोजयति। सोऽयं पर्य्युदासो न निषेधः। यथा, सर्व्वस्वं दद्यात्,—इत्यत्र, भूम्यादिप्रतिषेधात् तदितरत् सर्व्वस्वमर्थः, तथैवात्रापि पिण्डेतरत् श्राद्धमर्थः,—इति न किञ्चिदनुचितम्।

एतेन "श्राद्धं सपिण्डकं कृत्वा"—इत्यादिवचनान्यपि व्याख्यातानि। गोवृषन्यायात् खल्वेवमुच्यते प्रशंसार्थम्। तदेवमादिवचनवैचित्र्यमृषीणामबुद्धा न बुद्धिमद्भिर्भ्रमितव्यम्। यत् पुनरङ्गभूत पिण्डदानादितरदेव कर्म्मान्तरं प्रधानं पिण्डदानम्—इति वर्णितम्।

तत्र पृच्छामः । तस्य श्राद्धत्वमिष्यते न वा ?--इति । यदि तावत् प्रथमः पक्षः, तदा विफलः प्रयासः । पिण्डदानस्यापि श्राद्धत्वाभ्युपगमात् । कर्म्मान्तरवचनानुपपत्तिश्च स्यात् । सति ब्राह्मणभोजने पिण्डदानमङ्गम् , असति प्रधानम् ,—इति ब्रवीमि,—इति चेत् । नैतत् प्रमाणोपेतं ब्रवीषि । कस्मात् ? रूपभेदाभावात् । यदेव खल्वस्य रूपमङ्गस्य तदेव प्रधानस्यापि,—इति सति ब्राह्मणभोजने 'अङ्गं', विपरीतमन्यथा,—इत्यत्र विशेषहेतुर्नास्ति । फलश्रुतेरुभयत्राप्यविशेषेणैकशेषस्य दुष्करत्वात् ।

अपि च । एतावताऽपि श्राद्धशब्दाभिधेयत्वमस्याभ्युपगच्छत्येव भवान् ,—इति असतीव ब्राह्मणभोजने, सत्यपि तस्मिन् प्राधान्यमेवास्य अभ्युपगम्यताम् , कृतमर्द्धजरतीयेन । कुत्रचिदेकस्य कुत्रचिच्चान्यस्य प्राधान्ये पुनरभ्युपगम्यमाने अनेकार्थत्वमस्य कल्पनीयं स्यात् । तच्चान्याय्यम् ।

उत्तर इति चेन्नाचार्य्यविरोधात् । इति चेत् पश्यसि,—उत्तरः पक्षः तर्हि समाश्रयिष्यते,--इति । एतदपि न पारयसि । कस्मात् ? आचार्य्यविरोधात् । "तत् श्राद्धम्"—इति सूत्रयन्नाचार्य्यः पिण्डपितृयज्ञस्यापि श्राद्धत्वमुपदिशति । विरुध्यते खल्वेतन्मतवताम् । पिण्डप्रधानो हि सः । तस्मात् , पिण्डमन्तरेणैव ब्राह्मणभोजनमन्तरेणापि श्राद्धदर्शनात् नैतदेकतरस्मिन्नेव पक्षे चोदयितव्यं भवति ; द्वयोः समानत्वात्—इति सन्तोष्टव्यम् । समुच्चयपक्षः खल्वेवमुपोद्वलितो भवति । यस्तु, ब्राह्मणभोजनमात्रं प्रधानमाह , स कथं पिण्डदानमात्रस्य श्राद्धत्वं समर्थयितुं शक्ष्यति,—इति न विद्मः ।

यदपि शङ्खवचनमुपन्यस्तं—'अग्निं कृत्वा प्रयत्नेन'—इत्यादि, सोऽयं केवलान्नोत्सर्गे श्राद्धपदप्रयोगः,—इति वर्णितञ्च । तदप्यसङ्गतम् । कस्मात् ?

"भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम्" ।

इति ।

"उच्छिष्टसन्निधौ कार्य्यं पिण्डनिर्व्वपणं बुधैः" ।

इति च ब्राह्मणभोजनं पिण्डनिर्व्वपणञ्चाभिधाय, पश्चात् तद्वचनारम्भात् । तदनेनायमपि समुच्चयपक्षमुपोद्बलयति,—इत्यवगच्छामः । तस्मात् पौर्व्वापर्य्यपरामर्शाभावादन्नोत्सर्गे श्राद्धपदं प्रयुक्तमिति भ्रान्तिरुद्बभूव । तथा चोक्तम् ।

"पौर्व्वापर्य्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्" ।

इति । यच्च पुलस्त्यवचनमुपदर्शितम्—'संस्कृतं व्यञ्जनाढ्यान्नम्'—इत्यादि । तस्यापि,—श्रद्धया यस्माद्दत्तान्नं दीयते—तस्मादिदं कर्म्म श्राद्धमित्युच्यते,—इति वचनव्यक्त्या अन्नदानादतिरिक्तमपि किञ्चिदवगम्यत एव । तदिदम्,—"संज्ञायाम्"—इति वा, "तेन कृतम्"—इति वा, "तस्येदम्"—इति वा भवति । जयादित्यस्तु "चूडादिभ्य उपसङ्ख्यानम्"—इत्यभिधाय, चूडा प्रयोजनमस्य—चौडम्, श्रद्धा प्रयोजनमस्य—श्राद्धम्—इत्युदाजहार । रघुनन्दनस्तु पुलस्त्यवचनमालोचनमात्रेण पश्यन्,—श्रद्धया अन्नादेर्दानं तत् श्राद्धमिति वैदिकप्रयोगाधीनयौगिकम्,—इति वर्णयाञ्चकार । तदसङ्गतम् । कुतः ? तदभिप्रेतस्य योगार्थस्याशब्दत्वात् । न खलु श्रद्धया अन्नादेर्दानम्,—इत्ययमर्थः श्राद्धशब्दा-

त्वगम्यते। न खलु दानार्थे तत्किञ्चिदुपदिशन्त्याचार्य्याः। वस्तुतस्तु पुत्रस्यवचनं खल्वेतत्, दीयते इति कर्म्मणि तिङः प्रयोगात् दीयमानस्यान्नस्य श्राद्धत्वमाह, न त्वन्नदानस्येति कस्य केनाभिसंबन्धः। दर्शितश्चास्माभिः पिण्डपितृयज्ञस्यापि श्राद्धत्वमाचार्य्यस्यानुमतम्। तदपि न प्रसर्त्तव्यम्। यच्च,—

"अद्दैवं भोजयेत् श्राद्धं पिण्डमेकञ्च निर्व्वपेत्"।

इति वचनम्। तत्र खल्वन्ने श्राद्धशब्दः प्रयुक्तः। यदपि,—

"आमश्राद्धं यदा कुर्य्याद् विधिज्ञः श्राद्धदः सुतः।
तेनाग्नौ करणं कुर्य्यात् पिण्डांस्तेनैव निर्व्वपेत्"।

इति वाक्यम्। तत्रापि, तेनाग्नौकरणम्—इति हेतुत्वेनोपादानम्, यतस्तेनाग्नौकरणम्, अतस्तेनैव पिण्डदानम्—इति तस्यार्थः। अग्नौकरणशेषेण पिण्डदानम्—इत्ययमत्र हेतुः। तदिदं वाक्यम्,—

"आमश्राद्धं यदा कुर्य्यात् पिण्डदानं कथं तदा।
गृहादाहृत्य पक्वान्नं पिण्डं दद्यात् तिलैः सह"।

इत्येतत्पक्षानुज्ञानार्थम्। प्रथमोद्दिष्टस्यैव वा श्राद्धस्य 'पिण्डांस्तेनैव निर्वपेत्'—इति पर्य्यायान्तरेण परिकीर्त्तनम्। पिण्डनिर्वपणस्यैव श्राद्धपदार्थत्वादित्यभिप्रायः। तथा मनुः।

"सहपिण्डक्रियायान्तु कृतायामस्य धर्म्मतः।
अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः"।

इति। न च, पिण्डनिर्व्वपणं पित्रे दानम्—इति रघुनन्दनव्याख्यानं युक्तम्—इति वाच्यम्। यथाश्रुतार्थपरित्यागे मानाभावात्।

चक्ष,--इति कारणाच पिण्डदानस्यैवावगतेः। पितृभ्यश्चकदानमात्र-स्यैव तदितिकर्त्तव्यतापत्तेश्च । "न निर्व्वपति यः पिण्डम्"--इति, "पिण्डदोऽंशहरः"--इति, "पिण्डं दद्याद्धनं हरेत्"—इति, "त्रिषु पिण्डः प्रवर्त्तते"--इति, "पिण्डोदकक्रियाहेतोः"--इति, "नरकस्थाश्च तृप्यन्ति पिण्डैर्दत्तैः"--इति चैवमादिषु शतशः पिण्डदानस्य प्राधान्यावगमाच ।

"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्" ।

इति परतस्तेनैव पिण्डनिर्व्वपणस्योपसंहारश्चैवमवगच्छामः । उप-संहारः खल्वयं श्राद्धप्रकरणेऽपि दृश्यते । तस्मात्,--पिण्डप्रदा-नस्यैवायमुपसंहारो न श्राद्धकर्म्मणः,--इत्यपि न शक्यते वक्तुम् । अपिच । पिण्डदान एव पिण्डनिर्व्वपणपदं प्रयुक्त-वान् मनुः,--इत्यवगच्छामः । कथं कृत्वा ? शृणु । पुर-स्तात्तावत्,—

"त्रींस्तु तस्माद्धविःशेषात् पिण्डान् कृत्वा समाहितः ।
औदकेनैव विधिना निर्व्वपेद्दक्षिणामुखः" ।

इति । परस्तादपि,--

"पिण्डनिर्व्वपणं केचित् पुरस्तादेव कुर्व्वते" ।

इति,—पिण्डप्रदान एव पिण्डनिर्व्वपणपदप्रयोगो दृश्यते । अपिच । कस्यचित् पिण्डदानम्, कस्यचिच्च ब्राह्मणभोजनं प्रधानम्--इत्यतो-हि कारणात् समुच्चयपक्षः प्रादुर्भवति । तत् किमत्र करिष्यन्ति अन्यतरप्राधान्यावेदकानि वचनानि । स खल्वयमलङ्कारः समुच्चय-पक्षस्य न दोषः । तस्मात् तत्तद्वाक्यपर्य्यालोचनया क्वचित्

पिण्डः प्रधानम्,--यथा गयापिण्डपितृयज्ञादौ । क्वचित् ब्राह्मणभोजनम्,—यथा नित्यश्राद्धादौ । अन्यत्र त्वविशेषादुभयं प्रधानम् । यथा सपिण्डीकरणादौ । इत्यस्तु किं विस्तरेण ॥ ॥ ० ॥ ३७ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य तृतीया खण्डिका समाप्ता ॥ ० ॥

अथेदानीं प्रसङ्गात् प्रासवाच अन्वष्टक्यविधिं पिण्डपितृयज्ञेऽप्यतिदिशन्नाह,—

अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातः ॥ १ ॥

अन्वष्टक्यकर्म्मणि यः स्थालीपाकः विहितः, तेनैव विधिना पिण्डपितृयज्ञो व्याख्यातः। ननु, अन्वष्टक्येन,—इति वक्तव्ये किमर्थम् अन्वष्टक्यस्थालीपाकेन,—इति स्थालीपाकग्रहणं क्रियते? मांसचरुनिवृत्त्यर्थमित्याह। कथं नाम? अन्वष्टक्येनेत्युक्ते स्थालीपाको मांसचरुश्चेतिद्वयमेव प्राप्यते। तत्र यत् पुनः स्थालीपाकग्रहणं करोति, तद्बोधयति मांसचरुरत्र नास्तीति।

तर्हि पितृयज्ञः,—इति वक्तव्ये पिण्डपितृयज्ञः,—इति कथं पिण्डग्रहणं क्रियते? उच्यते। पितृयज्ञः,—इति उक्ते खल्वन्वाहार्य्यादावपि अयमतिदेशः स्यात्। स चानिष्टः। पिण्डपितृयज्ञधर्म्मस्य तत्रातिदेशात्। एतस्मात् कारणात् पिण्डपितृयज्ञः,—इति सूत्रितम्। अथवा। पिण्डग्रहणं कुर्व्वन्नेतस्य पितृयज्ञस्य पिण्डप्रधानतां दर्शयति। कथं नाम? पिण्डैरेव यत्र पितर इज्यन्ते सोऽयं पिण्डपितृयज्ञः। तथाच निगमः। "आहिताग्नेः

पितृभ्यं पिण्डैरेव, अपि वा ब्राह्मणान् भोजयेत्”—इति पिण्ड-स्यासम्भवे ब्राह्मणभोजनमुपदिशति ॥ ० ॥ १ ॥ ० ॥

अतिदेशवशादवश्यामेव माभूदित्यत: कालान्तरविधानार्थमिद-माह ।

एवं वा ।

क: पुन: पिण्डपितृयज्ञो नाम,—योऽयमन्वष्टक्यस्थालीपाकेन व्या-ख्यात:, को वा तस्य काल: ? उच्यते ।

अमावस्यायां तत् श्राद्धम् ॥ २ ॥

तत् पिण्डपितृयज्ञाख्यं श्राद्धममावस्यायां कर्त्तव्यमिति सूत्रशेष: । अविहिते पिण्डपितृयज्ञे कथं तत्र धर्मप्रदेश:—इति इदमर्थत: सूत्रं पूर्वं द्रष्टव्यम् ॥ ० ॥ २ ॥ ० ॥

अमावस्याप्रसङ्गादाह,—

इतरदन्वाहार्य्यम् ॥ ३ ॥

इतरदपरं द्वितीयमित्यर्थ: । अनु पश्चादाह्रियते,—इत्यन्वाहार्य्यं नाम श्राद्धममावस्यायां कर्त्तव्यमित्यनुवर्त्तते । कस्य पश्चात् ? पिण्डपितृयज्ञपिण्डानां, तस्यैव वा,—इति ब्रूम: । कस्मात् ? उपस्थितत्वात् । अत एव पिण्डान्वाहार्य्यकम्—इत्याख्यायते । तथाच गृह्यान्तरम् ।

“यत् श्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत् ।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते” ॥

इत्यमावस्यायां द्वितीयस्य श्राद्धस्यान्वाहार्य्यत्वं स्मरति । न च,

"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः" ।

इति स्मरणात् पिण्डानां पितृणामन्वाहार्य्यं मासिकं निजनकं यत्तत्रैवेति तत्स्वकारोक्तं युक्तमिति वाच्यम् । केवलान्वाहार्य्यपदे तदर्थस्यासम्भवात् । व्युत्पत्तेरप्रसिद्धत्वाच्च । पूर्व्वोक्तग्रन्थान्तरविरोधाच्च । प्रकरणञ्चैवमुपरुध्येत । तस्मादग्नेरमावस्याश्राद्धं मान्वाहार्य्यमित्यादरणीयम् ।

तदत्र ब्राह्मणभोजनं पिण्डदानञ्च पश्चात् कर्त्तव्यम् । तथाच ग्रन्थान्तरम् । "मध्यमं पिण्डं पत्नै प्रदाय ब्राह्मणान् भोजयित्वा तथैवमेतेभ्यो मातुश्च पितृभ्यस्त्रींस्त्रीन् पिण्डानवनेनिज्य निदध्यात्" —इति । अत्र, मध्यमं पिण्डम्—इति पिण्डपितृयज्ञविषयम् । ब्राह्मणान् भोजयित्वा,—इत्यादिकमन्वाहार्य्यश्राद्धपरम् । एतेभ्यः, —इति पिण्डपितृयज्ञोपात्ताः स्वपितरः परामृश्यन्ते । एवञ्च, पिण्डपितृयज्ञे त्रयाणामेव पिण्डदानं स्यात् । तथाच कर्म्मप्रदीपः ।

"कर्षूसमन्वितं मुक्का तथाऽऽद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकञ्च, शेषेषु पिण्डाः स्युः षडिति स्थितिः" ॥

इति । कर्षूश्च पिण्डपितृयज्ञेऽप्यस्ति ॥ ० ॥ ३ ॥ ० ॥

सकृत् कृतेनैव कृतं मामंस्त,—इत्येतदर्थमाह,—

मासीनम् ॥ ४ ॥

मासि मासि क्रियते,—इति मासीनम् । अधिकारात् श्राद्धयमपि, न पुनरानन्तर्य्यातिरेकात् अन्वाहार्य्यमेव ॥ ० ॥ ४ ॥ ० ॥

समाप्ता प्रासङ्गिकी कथा। प्रकृतमधुनोच्यते,—

दक्षिणाग्नौ हविषः सꣳस्करणम् ॥ ५ ॥

अतिदेशस्वरसादाहिताग्नेरपि शालाग्नावेव माभूदित्येतदर्थमिदमुच्यते। यो गार्हपत्यादानीय प्रणीयते, सोऽयं दक्षिणाग्निः। ऋज्वन्यत् ॥ ० ॥ ५ ॥ ० ॥

ततश्चैवातिप्रणयः ॥ ६ ॥

ततस्तस्माद्दक्षिणाग्नेरेवाग्निमुद्धृत्य अतिप्रणयः पूर्व्वोक्तलक्षणः कर्त्तव्यः। चशब्दात् होमोऽपि तत्रैव स्यात् ॥ ० ॥ ६ ॥ ० ॥

शालाग्नावनाहिताग्नेः ॥ ७ ॥

अनाहिताग्नेः स्मार्त्ताग्नेः शालाग्नौ हविषः संस्करणं होमश्च कर्त्तव्यम्। अतिप्रणयश्च तस्मादेव स्यात्। ननु, एतदवाच्यं शालाग्निः खल्वेतदर्थ एव। उच्यते। दक्षिणाग्नेरुपदेशादनाहिताग्नेः पिण्डपितृयज्ञ एव न स्यादित्यपि कस्यचिदाशङ्का स्यान्मन्दमतेः। अतस्तन्निरासार्थमेतदुच्यते ॥ ० ॥ ७ ॥ ० ॥

एवन्तावत् आहिताग्निशालाग्न्योर्यो विशेषः स सूत्रितः, अथेदानीमुभयसाधारणीं इतिकर्त्तव्यतां वक्तुमुपक्रमते।

एवं वा—

किं समस्त एव अन्वष्टक्यप्रकारः सूत्रितविशेषव्यतिरेकेण पिण्डपितृयज्ञे स्यात्? एवं खलु प्राप्तम्। एवं प्राप्ते इदमारभ्यते—

एका कर्षूः ॥ ८ ॥

कर्त्तव्या,—इति सूत्रशेषः। अतिदेशात् तिसृणां प्राप्तत्वादेकेत्युच्यते। सा खल्वियं दक्षिणाया स्यात्। कस्मात्? अन्वष्टक्यकर्म्मणि आग्नेय्यभिमुखीनां कर्षूणामाग्नेय्यभिमुखैः कुशैः स्तरणदर्शनात्, इह च दक्षिणाग्रैः कुशैः परिस्तरणोपदेशात् कर्ष्वा अपि दक्षिणायत्वावगमात्। तथा चोक्तम्।

"दक्षिणाग्नां तदग्रेसु पितृयज्ञे परिस्तरेत्"।

इति। दक्षिणायामिति पाठे तु व्यक्तं कर्ष्वा दक्षिणायत्वम् ॥०॥८॥०॥

तस्या दक्षिणतोऽग्नेः स्थानम् ॥ ९ ॥

तस्याः कर्ष्वा दक्षिणतो दक्षिणस्यां दिशि अग्नेः स्थानं, न पुनरन्वष्टक्यकर्म्मवत् पूर्व्वतः ॥ ० ॥ ९ ॥ ० ॥

नात्रोल्मुकनिधानम् ॥ १० ॥

दक्षिणार्द्धे कर्षूणां यदुल्मुकनिधानं तत्रोक्तमासीत्, तदत्र न कर्त्तव्यम् ॥ ० ॥ १० ॥ ० ॥

न स्वस्तरः ॥ ११ ॥

तत्र कर्षूणां पश्चात् यदुक्तमासीत्, सोऽयं स्वस्तरोऽत्र न कर्त्तव्यः ॥ ० ॥ ११ ॥ ० ॥

माञ्जनाभ्यञ्जने ॥ १२ ॥

अत्र कर्त्तव्ये। अञ्जनञ्च अभ्यञ्जनञ्च ते अञ्जनाभ्यञ्जने। अञ्जनं

सौवीराञ्जनं व्याख्यातमेव। अभ्यज्यतेऽनेन,—इत्यभ्यञ्जनं तैलम् ॥ ० ॥ १२ ॥ ० ॥

न सुरभि ॥ १३ ॥

चन्दनं कर्त्तव्यम् ॥ ० ॥ १३ ॥ ० ॥

न निह्नवनम् ॥ १४ ॥

निह्नवनं नमस्कारोपलक्षितैर्मन्त्रैः दक्षिणोत्तानौ पाणी कृत्वा,—इत्येवमादिना तत्र यदुक्तमासीत्, तदत्र न कर्त्तव्यम्। ते चत्विमे अतिदेशागता एव प्रतिषिध्यन्ते ॥ ० ॥ १४ ॥ ० ॥

उदपात्रान्तः ॥ १५ ॥

पिण्डपरिषेकार्थमुदपात्रमन्तो यस्य, सोऽयमुदपात्रान्तः पिण्डपितृयज्ञः स्यात्। ननु, एतदवाच्यम्, अतिदेशादेव प्राप्तत्वात्। उच्यते। यावदुक्तकरणार्थमेतदुच्यते। तेन, 'गन्धादीन् निःक्षिपेत्तूष्णीम्'—इत्यादिकं कर्म्म अत्र न भवति। अन्यदपि प्रयोजनमुत्तरत्र वक्ष्यामः ॥ ० ॥ १५ ॥ ० ॥

वासस्तु निदध्यात् ॥ १६ ॥

अक्षरार्थः। ननु, किमर्थमिदमुच्यते, वासः खल्वतिदेशादेव लभ्यते? वासोऽन्तरविधानार्थम्—इत्याह। तुशब्देन पूर्व्वोक्तं वासो व्यवच्छिद्यते। कथं ज्ञायते? पूर्व्वोक्तं खलु वासोऽतिदेशादेव प्राप्यते,—इति तदर्थं पुनः सूत्रवचनमनर्थकमेव स्यात्। तस्माद् वासो-

ऽन्तरमत्र विधीयते,—इत्यवगच्छामः। एककार्य्यार्थत्वात् पूर्व्वस्य वाससो निवृत्तिः स्यात् तन्निवृत्त्या च मन्त्रोऽपि तदीयो ये चात्र त्वामनुइत्यादिः प्रत्येकेन दानस्य निवर्त्तते। तेन, "एतद्वः पितरोवासः"—इति यथाऽऽम्नातेनैव मन्त्रेण वाससो निधानं सिध्यति। अतएव "पूर्व्वोक्तस्य वासोनिधानविधेर्निवृत्त्यर्थमेकवासोनियमार्थञ्च पुनरिदमुच्यते। तेन किम्? 'वाससु निदध्यात्'—इत्येकवचनोपदेशात् 'एतद्वः पितरोवासः'—इत्यनेन यथाऽऽम्नातेन मन्त्रेणैकमेवात्र वासोनिदध्यात्"—इति भट्टनारायणोपाध्यायाः। अपूर्व्वं खल्वत्र वासोविधीयते। अतस्तदेकत्वमपि पश्वेकत्ववद्विवक्षितं भवितुमुचितम्। तदस्मात् वैकृतादिविशेषोपदेशात् प्राकृतं प्रत्येकं वाससोनिधानं निवर्त्तते। न ह्येकं वासः प्रत्येकं शक्यं निधातुम्। तस्मात् "एतद्वः पितरोवासः"—इति मन्त्रे बहुवचनान्तपितृपदोपादानात् सूत्रे मन्त्रे च वासस एकवचनसंयोगाच्च तन्त्रेण त्रीन् पित्रादीनुद्दिश्यैकमेव वासः पितृभ्यो निधातव्यम्। पित्रादित्रिके खल्वस्मिन् प्रदेशे बहुवचनान्तस्य पितृशब्दस्य प्रयोग इति ब्रवीचाम।

अतएव कर्म्मप्रदीपे कात्यायनः।

"अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने।
तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचन एव च"।

इत्यर्घ्यादौ तन्त्रविनिवृत्तिं ब्रुवाणः परिगणितव्यतिरिक्तेषु तन्त्रमभ्यनुजानाति। अन्यथा परिगणनानर्थक्यापत्तेः। अर्घ्यादिवत् वासोनिधानमपि वा परिगणयितव्यं स्यात्। अथैवं कात्यायन-

स्योपजीव्यविरोधः। आचार्य्यो ह्यन्वष्टक्यकर्म्मणि प्रत्येकं वाससः प्रदानं सूत्रयाञ्चकार। नैष दोषः। अन्यत्रैतदभिधानात्। अभविष्यत् कात्यायनस्योपजीव्यविरोधो यद्यसावन्वष्टक्यकर्म्मण्येतदभ्यधास्यत्। न तु तत्रैतदभ्यधात्। किन्तु ततोऽन्यत्रैव तेनेदमभ्यधायि। अन्वष्टक्यादन्यच्च श्राद्धजातं साक्षात् परम्परया वा पिण्डपितृयज्ञेन विक्रियते, स त्वन्वष्टक्यस्थालीपाकेन। पिण्डपितृयज्ञे चैकत्वाद्वाससः प्राकृतं वाससोबहुत्वं निवर्त्तते। तस्मान्नास्त्युपजीव्यविरोधः।

ननु तथापि विरोध एव। कथम्? उच्यते। अन्वष्टक्ये तावत् प्रत्येकं तिलोदकदानमुक्तमाचार्य्येण। न चात्र तन्निषिद्धम्। तस्मादत्र, यच्चानेन विक्रियते तत्र च, तत् करणीयं भवति। तत्र यदि प्रत्येकं क्रियेत, तदा परिगणनानर्थक्यप्रसङ्गः। अथ तदर्थवत्त्वार्थं तन्त्रेण क्रियेत, तर्ह्याचार्य्यसूत्रविरोधः। नैष दोषः। कुतः? विषयभेदोपपत्तेः। आचार्य्येण ह्यन्वष्टक्ये प्रत्येकं तिलोदकदानमुक्तम्। कात्यायनोऽपि।

"तूष्णीं पृथगपोदद्यात्मन्त्रेण तु तिलोदकम्"।

इत्यनेन तत्र तथैवाह। अन्यत्रैव तु तेनार्घ्यादिव्यतिरिक्तेषु तन्त्रमनुज्ञातम्, न प्रकृतौ। तत्र तथाऽभ्यनुज्ञाने विरोधो भवेत्। न त्वेवम्। चोदको हि विकृतावुपकारकाकाङ्क्षिण्यामुपकारकान् प्राकृतान् पदार्थान् प्रापयति। क्रमस्तोपकुर्व्वतां तेषां साहाय्यं कुर्व्वन् गुणभूतः। उत्तरकालं हि प्रयोगप्राशुभावाय क्रमस्यापेक्षा भवति। यथा चातुर्मास्येषु तृतीये पर्व्वणि प्रात-

मध्यन्दिने सायमित्यङ्गः कालेष्विष्टीनामवगमात् सद्यस्कालतायां विधेरनुमानात् प्राकृतधर्मस्य द्व्यहकालत्वस्य लोपः। एवमिहापि परिगणितव्यतिरिक्तेषु तस्यानुमानात् प्राकृतधर्मस्य प्रत्येकं दानस्य लोपः स्यात्। तथाचोक्तम्। "अपिवा' क्रमकालस' युक्ताः सद्यः क्रियेत तत्र विधेरनुमानात् प्रकृतिधर्मलोपः स्यात्"—इति। यथा कृष्णलचरौ प्रकृतौ भक्षाणां विकृतत्वात् चोदकेन विकृतानां प्राप्तत्वेऽपि सह'भक्षाणां समर्पणं, तथा-ऽत्रापि प्रकृतौ तिलोदकस्य प्रत्येकं दानात् चोदकेन तथाभूतस्य प्राप्तावपि तस्येणैव तद्दानम्। ननु कृष्णलचरौ "एकधा ब्रह्मणे परिहरति"—इति वचनात् सह समर्पणम्। तथाचोक्तम्। "एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विकृतत्वात्"—इति। उच्यते। इहापि "अर्घ्येऽक्षय्योदके चैव"—इत्यादिवचनात् परि-गणितव्यतिरिक्तेषु तन्त्राभ्यनुज्ञानात् वचनावगतमेव तन्त्रमनु-ष्ठान मिति समानम्।

इदमिदानीं सन्दिह्यते। किमाहिताग्नेः श्रौतस्य गृह्योक्तस्य च पिण्डपितृयज्ञस्य समुच्चयः, आहोस्वित् विकल्पः, अथवा स्मार्त्तस्य निवृत्तिः, उताहो श्रौतस्यैव?—इति। उच्यते। स्मार्त्तस्य निवृत्ति-स्तावन्न भवति। कस्मात्? उपदेशस्यानर्थकत्वापत्तेः। समु-च्चयोऽपि न युज्यते; एकार्थत्वात्। विकल्पोऽप्यसङ्गतः; अतुल्य-बलत्वात्। पक्षे स्वशाखाश्रयं स्वस्वेवं परित्यज्येत। तच्चानिष्टम्। तस्मात्, श्रौतस्यैव निवृत्तिरित्यवगच्छामः। पिण्डपितृयज्ञः स्वस्वस्वच्छाखायां न पठ्यते। न खलु स्वशास्त्रोक्तमुपेक्ष्य पार-शाखिकं श्रौतमुपादातुमुचितम्। तथाच कर्मप्रदीपः।

"अग्निया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम् ।
अग्निया च परोक्ता च तृतीया चाययाग्निया ।
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः ।
कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य चेष्टितम् ।
यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्" ।

इति । अपिच ! पूर्व्वत्र उदपात्रान्तत्वं पिण्डपितृयज्ञस्य सूत्रयता-चार्य्यः पारशाखिकं श्रौतं नानुमन्यते । श्रौते पिण्डपितृयज्ञे स्वस्व-वधानाजिघ्रणादिकमपि उदकनिषेकात् परतः श्रूयते । अपर आह । गृह्याग्निमतः स्मार्त्त एवाचार्य्यसम्मतः पिण्डपितृयज्ञः, श्रौताग्निमतस्तु पारशाखिकोऽपि श्रौत एव, अग्निहोत्रादिवत्, —इति ॥ ० ॥ १६ ॥ ० ॥

अवसिता प्रासङ्गिकी कथा । अथेदानीमष्टकाकर्म्मशेषमेवानुवर्त्ता-महे,—

माघ्या ऊर्द्ध्वमष्टम्याᳬ स्थालीपाकः ॥ १७ ॥

कर्त्तव्यः,—इति सूत्रशेषः । अष्टकायै त्वा,—इति निर्व्वापः ॥ ० ॥ १७ ॥ ० ॥

तस्य जुहुयात् ॥ १८ ॥

तस्य स्थालीपाकस्यैकदेशं जुहुयात् ॥ ० ॥ १८ ॥ ० ॥

अष्टकायै स्वाहेति जुहोति ॥ १९ ॥

मनुरचरार्थः। पूर्वेणैव जुहोतिना सिद्धे पुनर्जुहोतिवचनं शाक-चरोरपि होमप्रज्ञापनार्थम् ॥ ० ॥ १८ ॥ ० ॥

स्थालीपाकावृताऽन्यत् ॥ २० ॥

गतभाष्यमेतत् ॥ ० ॥ २० ॥ ० ॥

शाकं व्यञ्जनमन्वाहार्य्येम् ॥ २१ ॥

यत्तु पश्चादोदनचरोराक्रियते,—इत्यन्वाहार्य्यं शाकं व्यञ्जनं कुर्य्यात्, —इति सूत्रार्थः। एतदुक्तं भवति। यस्यामष्टकायामोदनचरोः पश्चात् शाकचरुः कर्त्तव्यः। स च शाकचरुरोदनचरोर्व्यञ्जनार्थः मांसादिचरुवत्। तथाच पूर्व्वाष्टकायामुक्तम्।

"ओदनव्यञ्जनार्थन्तु पशुभावेऽपि पायसम्।
सद्रवं श्रपयेदेतदन्वष्टक्येऽपि कर्म्मणि"।

इति। होमोऽपि पूर्व्ववत्स्येव स्यात्। कुतः? शाकस्य व्यञ्जन-तयोपन्यासेन स्वातन्त्र्यानिराकरणात्। तथा चोक्तम्।

"शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत्।
यस्तु शाकादिहोमः स कार्य्योऽपूपाष्टकाऽऽवृता"।

इति। अन्वाहार्य्यः,—इति केचित् पठन्ति। तत्र च, छान्दसत्व-माश्रयणीयम्। अन्वाहार्य्यश्चरुरिति चरुसम्बन्धविवक्षया वा कथ-ञ्चित् सङ्गमनीयम्। अन्वाहार्य्ये,—इति पाठे, अन्वाहार्य्ये; पूर्व्वा-ष्टकायाः प्रकृतत्वादोदनचरोः पश्चादाक्रियमाणे मांसचरौ—

तत्स्थाने,—इत्येतत्। तथाच, तदीयमांसचरुस्थाने अत्र शाकं व्यञ्जनं कुर्य्यात्,—इत्यर्थः। अन्वाहार्य्यश्राद्धे,—इति कथं न वर्ण्यते? 'नाष्टकासु भवेत् श्राद्धम्'—इत्यष्टकाकर्म्मण्यन्वाहार्य्य-श्राद्धनिषेधात्—इत्याह। तस्माद् यथोक्त एवार्थः॥•॥ २१॥

अथ पितृदेवत्येषु पशुषु—वह वपां जातवेदः पितृभ्य इति वपां जुहुयात्॥ २२॥

अथशब्दः पूर्व्वोक्तायाः पश्वितिकर्त्तव्यताया अनुवृत्त्यर्थः। पित्रर्थं ये पशव आलभ्यन्ते त इमे पितृदेवत्याः पशवः। तेषु पितृदेवत्येषु पशुषु,—वह वपामिति मन्त्रेण वपां जुहुयात्। पितृदेवत्याश्च पशवः,—"श्रोत्रियेऽभ्यागते श्राद्धं महोक्षेण महाऽजेन वा दद्यात्"—इत्येवमादयस्तन्त्रान्तरोक्ता आदरणीयाः। कुतः? स्वशास्त्रे विधानाभावात्। ओदनचरोश्चात्र, पितृभ्यस्त्वा,—इति निर्व्वापः स्यात्। कस्मात्? पित्रर्थत्वात्। एवं, सव्योत्तराभ्यां पाणिभ्यां सकृदवहन्यात्। सकृत् फलीकुर्य्यात्। सकृत् प्रक्षालयेत्। प्रसव्यमवघट्टयेत्। दक्षिणत उद्वासयेत्। न च प्रत्यभिघारयेत्। अष्टर्चस्य चात्र निवृत्तिः स्यात्। कुतः? मन्त्रलिङ्गविरोधात्। एवञ्च, अवदानानि सन्नीय त्रिधा विभागमकृत्वैव स्थालीपाकावृता सौविष्टकृदावृता वा अवदाय, पितृभ्यः स्वाहा,—इति सकृदेव जुहुयात्। प्रोक्षणनिर्व्वापप्रधानहोमाश्च प्राचीनावीतिनैव कर्त्तव्याः। कुतः? पित्रर्थत्वात्। तथा चोक्तम्।

"प्राचीनावीतिना कार्य्यं पित्र्येषु प्रोक्षणं पशोः।
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम्।

सन्नयश्चावदानानां प्रधानार्थो म ईतरः।
प्रधानहवनश्चैव शेषं प्रकृतिवद्भवेत्”।

इति ॥ ० ॥ २२ ॥ ० ॥

देवदेवत्येषु—जातवेदो वपया गच्छ देवानिति ॥२३॥

देवार्थं ये पशव आलभ्यन्ते त इमे देवदेवत्याः पशवः। तेषु जातवेद इति मन्त्रेण, वपां जुहुयात्,—इत्यनुवर्त्तते। आह। के पुनर्देवदेवत्याः पशवः? उच्यते। योऽयं वास्तुकर्म्मणि ‘कृष्णया गवा यजेत’—इत्येवमादिना सूत्रयिष्यते; ये च तन्त्रान्तरे,—‘हिरण्यकामो ऽमावस्यायां मणिभद्रं रोहितेनाजेन यजेत, गोऽश्वकामः पौर्णमास्यां श्वेतेन’,—इत्येवमादयः, त इमे देवदेवत्याः पशवः। तत्र, वास्तुकर्म्मणि वास्तोष्पतये त्वा,—इति निर्व्वापः। होमे तु विशेषं वक्ष्यति। मणिभद्रयागादिषु मणिभद्राय त्वा,—इत्यादिनिर्वापः। मणिभद्राय स्वाहा,—इत्यादिको होमः ॥०॥ २३ ॥०॥

कथं पुनर्ज्ञायते; यन्मणिभद्रयागादिषु मणिभद्राय,—इत्यादिना निर्व्वापहोमौ भवतः,—इति? उच्यते।

अनाम्नातेषु तथाऽऽदेशं यथाऽष्टकायै स्वाहेति जुहोति ॥ २४ ॥

आ-सम्यक् म्नातं आम्नातं तन्न भवतीत्यनाम्नातम्। तेषु यथैव श्रूयते, तथैवादेशो यथा भवति तथा कर्त्तव्यम्। एतदुक्तं भवति। येषु समशनीयचरुहोमोपनयनव्रतान्तसावित्रचरुहोमादिषु देवता

निर्दिश्यन्ते न मन्त्राः ; तेषु यदेव श्रूयते तदेवादिश्य निर्व्वपेत् जुहुयाच्च । एवञ्च, समश्ननीयचरौ अग्नये त्वा,—इत्यादिर्निर्वापः, अग्नये स्वाहा,— इत्यादिकश्च होमः । एवं सावित्रचरुहोमादिषु यथायथमूहनीयम् । येषु पुनराग्रहायण्यादिषु देवता नोपदिश्यते होममन्त्रश्चाव्यक्तलिङ्गः ; तेषु यावन्मात्रं वाक्यादवगम्यते, तावत-एवादेशः निर्व्वापे । आदिष्टमन्त्रेण तु होमः । येषु पुनश्चैत्रादिषु मन्त्रो नोपदिश्यते नापि देवता ; तेषु चैत्रै त्वा,—इत्यादिना निर्व्वापः, चैत्रै स्वाहा,—इत्यादिना च होमः स्यात् ।

अत्र दृष्टान्तः । 'यथाऽष्टकायै स्वाहेति जुहोति',—इति । यथा खल्वष्टकायै स्वाहेति यदेव कर्म्मणो नामधेयं तेनैव जुहोति, एवं चैत्रादिष्वपि,—इति बोद्धव्यम् । आह । ननु, विषम उप-न्यासः,—चैत्रादिषु देवता मन्त्रश्च नोपदिश्यते, न चैवमष्टका । तत्र हि देवता उपदिष्टा । उच्यते । सत्यमुपदिष्टा तत्र देवता, तथापि तु अन्तिमाष्टकायां 'अष्टकायै स्वाहा',—इति कर्म्मनाम-धेयेनैव होमः क्रियते, सूत्रप्रामाण्यात् । स खल्वयं कर्म्मनामधेयेन होमोऽत्र दृष्टान्तीकृतः । तस्माददोषः ॥ ० ॥ २४ ॥ ० ॥

स्थालीपाकावृताऽन्यत् ॥ २५ ॥

व्याख्यातार्थं सूत्रम् ॥ ० ॥ २५ ॥ ० ॥

ऋणे प्रज्ञायमाने गोलकानां मध्यमपर्णेन जुहु-यात्—यत् कुसीदमिति ॥ २६ ॥

ऋणं प्रसिद्धम्। तस्मिन् प्रज्ञायमाने प्रकर्षेण ज्ञायमाने गोलकानां पलाशानां मध्यमपर्णेन मध्यमच्छदेन जुहुयात्, यद् कुसीदमिति-मन्त्रेण। अथ, प्रज्ञायमाने,—इत्येतदवाच्यम्? —इति चेत्। न। यत् खलु ऋणं प्रकर्षेण ज्ञायत एव केवलं, न पुनरपाकर्त्तुं शक्यते, तत्रैव होमोऽयं यथा स्यादित्येवमर्थत्वात्। एतदुक्तं भवति। ऋण-मवश्यमपाकरणीयम्। अन्यथा दोषश्रवणात्। तथाच स्मर्य्यते।

"तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि।
अग्निहोत्रं तपश्चैव तत्सर्व्वं धनिनो भवेत्"।

इति। तथा।

"ऋणं ये न प्रयच्छन्ति बुद्धिमोहात् कथञ्चन।
धनदातुस्तदीयं स्यात् पुण्यं ते च पुरोहिताः"।

इति। "ऋणानाख्यानपक्रिया"—इति चोपपातकगणनायां मनु-नोक्तम्। यदि पुनरत्यन्तमेवाधमो न शक्नोति तदपाकर्त्तुम्, तदैवं जुहुयात्,—इति। अन्ये तु वर्णयन्ति,—नष्टे धनिके तद्दक्थभागि-नि च, ऋणापाकरणासम्भवे जुहुयात्,—इति। तदसङ्गतम्। कस्मात्? राज्ञोऽप्यन्ततस्तद्दक्थभाक्त्वात्। नहि कदाचिदपि राज्ञोऽभावोऽस्ति। तमिमं होमं यावत्सङ्ख्यमृणं तावत्सङ्ख्यमिच्छन्ति। चिप्रहोमञ्च मन्यन्ते॥०॥२७॥०॥

अथातो हलाभियोगः॥२७॥

वर्त्तिष्यते,—इति सूत्रशेषः। अथशब्दः पूर्व्वप्रकृतापेक्षः। कथं

नाम ? यथा पूर्व्वोक्तान्यष्टकादीनि अवश्यकर्त्तव्यानि, एवमिदमप्येतस्मिन् निमित्ते सत्यवश्यमेव कर्त्तव्यम्,—इति । अत:शब्दो-ऽत्रार्थ: । यस्मात्;—

"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा" ।

इति क्कष्याऽपि जीवनं मन्वादीनामनुमतम् । अत: एतस्मात् कारणात् । हलं लाङ्गलं तस्य आभिमुख्येन योगो हलाभियोग:,—कृषिप्रारम्भ:;—इत्येतत् ॥ ० ॥ २७ ॥ ० ॥

पुष्ये नक्षत्रे स्थालीपाकं श्रपयित्वैताभ्यो देवताभ्यो-जुहुयात्,–इन्द्राय मरुद्भ्य: पर्ज्जन्यायाशन्यै भगाय ॥ ॥ २८ ॥

ऋजुरक्षरार्थ: । देवतानां विसमासकरणं निर्वापहोमयो: पृथक्-प्रज्ञापनार्थम् ॥ ० ॥ २८ ॥ ० ॥

सीतामाशामरडामनघाञ्च यजेत ॥ २९ ॥

ऋजुरक्षरार्थ: । 'अरडां' इत्यत्र 'अरढां'—इति पाठान्तरम् । विसमासकरणं पूर्व्ववत् । अथ, पूर्व्ववत् चतुर्थ्यन्तनिर्देशेनैव सिद्धे किमर्थं विभक्तिमतिक्रम्य यजेत,—इति पुन: क्रियते ? आज्येनामूषां देवतानां होमप्रज्ञापनार्थमित्याह । कथं नाम ? पूर्व्व-विभक्तिमतिक्रामन् यजेत,—इति च पुन: कुर्व्वन्, पूर्व्वासामेव

देवतानां चरुभागाभिसम्बन्धः नामूषाम्,—इति दर्शयति। आसां पुनर्देवतानामाज्येनैव होमः स्यात्। तथा चोक्तम्।

"आग्रयुण्यां तथा क्रुष्यां वास्तुकर्म्मणि याज्ञिकाः।
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते।
हे पञ्च हे क्रमेणैता हविराहुतयः स्मृताः।
शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत्"।

इति॥०॥२८॥०॥

एता एव देवताः सीतायज्ञखलयज्ञप्रवपणप्रलवनपर्य्ययणेषु॥ ३०॥

यजेत,—इत्यनुवर्त्तते। सीता लाङ्गलपद्धतिः, कृष्टं क्षेत्रमित्येतत्। तत्र यो यज्ञः स सीतायज्ञः। स चायं कृष्टस्य क्षेत्रस्य पूर्व्वोत्तरार्द्धे स्यात्। पक्वव्रीहियवमध्ये क्षेत्रस्य पूर्व्वार्द्धोत्तरार्द्धे,—इति केचित्। स खल्वयं सीतायज्ञः शरदि वसन्ते च स्यात्। कस्मात्? विशेषाभावात्। पक्वं शस्यं छेदनात् परतः क्षेत्रादाकृष्य यत्र परिष्क्रियते देशविशेषे स्थाप्यते, सोऽयं खलः। तत्र खलयज्ञः कर्त्तव्यः। स खल्वयं खलयज्ञोऽप्युभयत्रैव करणीयो भवति;—यवानां खले, व्रीहीणां खले च। प्रवपणं बीजवपनम्। प्रशब्दात् समस्तेषु बीजेषु उप्तेष्वयं यज्ञः स्यात्। प्रलवनं धान्यानां छेदनम्। प्रशब्दः पूर्व्ववत्। पर्य्ययणं—परि सर्व्वतोभावेन धान्यानां खलादृगृहनयनम्। एतेषु सीतायज्ञादिषु एता एव देवताः यजेत।

ननु, प्रवपणक्रमस्य युक्तत्वात् कस्मात् क्रमभेदः क्रियते ? उच्यते। सीतायज्ञखलयज्ञोस्तावदादितो निर्द्देशः व्रीहियवयोर्द्वयोरेव धान्ययोस्तयोः करणप्रज्ञापनार्थः। प्रवपणादीनां क्रममतिक्रम्याभिधानं शारदधान्यमतिक्रम्य तेषां करणप्रज्ञापनार्थम्। तेन, सीतायज्ञखलयज्ञयोरुभयत्र करणात् चत्वारो यज्ञा भवन्ति, प्रवपणादीनां सकृत् करणाच्च त्रयः, मिलित्वा संवत्सरे सीतायज्ञादयः सप्त सम्पद्यन्ते। अष्टमश्च हलाभियोगः,—इति। अत एवोक्तम्। "सप्त सीतामखादयः"—इति।

इदमिदानीं सन्दिह्यते। एता एव,—इति किमनन्तरोक्ताः सीतादयो देवताः परामृश्यन्ते ? आहोस्वित् पूर्व्वा इन्द्रादयः ? उताहो सर्व्वा एव ?—इति। तत्र, पूर्व्वाः पञ्च,—इति केचित् वर्णयन्ति। कुतः ? देवताशब्दसामान्यात्। पूर्व्वत्र तावत् एताभ्यो देवताभ्यः,—इति देवताशब्दः श्रूयते, अत्रापि, एता देवताः,— इति देवताशब्दः कृतः। तस्मात्, पूर्व्वास्वेव देवताशब्दप्रयोगात् पूर्व्वा एव गृह्यन्ते नोत्तराः। तदसङ्गतम्। कस्मात् ? यस्मादुत्तरासामग्रहणे सीतायाः ग्रहणं न स्यात्। न च सीतायज्ञे सीतायाः परित्यागः कर्त्तुमुचितः।

अन्ये तु, सर्व्वासामेव ग्रहणमिच्छन्तः, पूर्व्ववत् पूर्व्वाः पञ्च सर्व्वाहुतयः उत्तरास्वाज्याहुतयः,—इति मन्यन्ते। तदप्यसङ्गतम्। कस्मात् ? एवम्—इत्यकरणात्। एवं खल्वेवमिति कुर्य्यात्। न खलु देवतायाः परामर्शे द्रव्यमपि परामष्टव्यम्,—इति किञ्चिन्नियामकमस्ति। तस्मात्, एताः,—इति सर्व्वनाम्नः प्रकृतपरामर्शकत्वात् एवकारकरणाच्चाविशेषेण सर्व्वासामेव देवतानां

परामर्शः,—इत्येतद्धोमः। पूर्व्वासां चंदया उत्तरासामाज्येन होमः,—इति तु नानुमन्यामहे। प्रमाणाभावात्। तस्मात् सर्व्वासामाज्येनैवात्र होमः स्यात्। तथा चोक्तम्।

"केवलाज्यहविष्काः स्युः सप्त सीतामखादयः"।

इति। अतिक्रान्तपरामर्शश्च नाचार्य्यस्यानुमतः,—इत्यसकृदावेदितम् ॥ ० ॥ ३० ॥ ० ॥

आखुराजस्योत्करेषु यजेत ॥ ३१ ॥

आखुराजो मूषिकानां राजा। तस्य उत्करेषु यजेत। उत्कीर्य्यन्ते,—इत्युत्कराः पांशवो भण्यन्ते। चशब्दात् सर्व्वेषामेव सीतायज्ञादीनामन्ते आज्येनायमाखुराजस्य होमः स्यात्। तथा चोक्तम्।

"केवलाज्यहविष्काः स्युः सप्त सीतामखादयः।

आज्येनाखुं यजेदन्ते तदन्ते, नित्यमेव तत्"।

इति। आखुराजाय स्वाहा,—इति होमः। सीतायज्ञादिषु आखुराजहोमे च चिप्रहोमन्यायमिच्छन्ति। यजेत,—इति पुनः करणं पूर्व्वेणैककर्म्माशङ्कानिरासार्थम् ॥ ० ॥ ३१ ॥ ० ॥

इन्द्राण्याः स्थालीपाकः ॥ ३२ ॥

कर्त्तव्यः,—इति सूत्रशेषः। इन्द्राण्यै त्वा—इति निर्वापः ॥ ३२ ॥ ० ॥

तस्य जुहुयादेकाष्टका तपसा तप्यमानेति ॥ ३३ ॥

अत्यर्थमेतत् ॥ ० ॥ ३३ ॥ ० ॥

स्थालीपाकावृताऽन्यत् स्थालीपाकावृताऽन्यत् ॥ ३४ ॥

गतभाष्यं सूत्रम् । द्विर्व्वचनं प्रकरणसमाप्त्यर्थम् । अत्र किञ्चि-द्वक्तव्यमस्ति । तत्र तावत् पृच्छामः । कः पुनरिन्द्राण्याः स्थाली-पाकस्य कालः ? तत्र केचिदाहुः । चतुरष्टको हेमन्तः,—इति अष्टकाचतुष्टयावगमात् तिसृष्वेव च कर्म्मोपदेशात् चतुर्थ्यष्टकाया-मेतत् कर्त्तव्यम्,—इति । तदसङ्गतम् । कस्मात् ? चतुरष्टक-पक्षस्याचार्य्याभिनुमतत्वात् । तदिदमभिहितमस्माभिः,—"तथा गौतमवार्कखण्डी"—इत्यत्र । अपरे तु,—चैत्राः पाकयज्ञमध्ये पाठात् कर्म्मणश्च तत्रानुपदेशात् तद्विषयताम् एतस्य मन्यन्ते । तदप्यसमीचीनम् । कुतः ? अनाम्नातेषु तथाऽऽदेशम्—इत्यनेनैव तत्र कर्म्मणः सिद्धत्वात् । एकाष्टकेति मन्त्रलिङ्गविरोधाच्च । अन्ये तु, पारिभाषिकमेव अस्य कालम्—इच्छन्ति ।

तत्र वदामः । एकाष्टका,—इति मन्त्रलिङ्गादेकाष्टकायामेतत् कर्त्तव्यम् । तदिदं सामर्थ्यं नाम प्रमाणं वाक्यस्य बाधकम् । आह । का पुनरियमेकाष्टका नाम ? तत्र व्याख्यातारो विवदन्ते । माघ्य-नन्तराऽष्टका एकाष्टका,—इति पूर्व्वमीमांसाभाष्ये आचार्य्येण शबरस्वामिना निर्णीतम् । "माघी वैकाष्टकाश्रुतेः"—इति सूत्र-यतो भगवतो जैमिनेरप्येष एवाशयोऽवधार्य्यते । "अन्याऽपीति-चेन्न भक्तित्वादेषा हि लोके"—इति सूत्रयन् तत्रभावान् जैमिनि-र्माघ्यनन्तराया अष्टम्या एकाष्टकात्वं लोकप्रसिद्धमित्याह । तथा आपस्तम्बोऽपि । "माघ्याः पौर्णमास्या उपरि अष्टका, तस्या-मष्टमी ज्येष्ठा या सम्पद्यते तामेकाष्टकेत्याचक्षते"—इति सूत्रयन्ने-

तदेवाह। महाब्राह्मणभाष्ये तु चैत्र्यनन्तरायामप्यष्टम्यामेकाष्टका-शब्दप्रयोगः समर्थितः। केचित्तु, प्रौष्ठपद्या ऊर्द्ध्वकालभाविन्या-मष्टकायामेतेन भाव्यम्,—इति वदन्ति। तस्यास्त्वेकाष्टकात्वे न किञ्चित् प्रमाणं पश्यामः। माघ्यनन्तरायास्त्वष्टम्यास्तथात्वन्तु लोकवेदसिद्धमित्यवोचाम। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्॥
॥०॥१४॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य चतुर्थी खण्डिका समाप्ता॥०॥

चतुर्थप्रपाठके पञ्चमी खण्डिका।

उक्तो नित्यनैमित्तिकविधिः, अथेदानीं काम्यविधयो वक्तव्याः। तेषु तावत्,—

काम्येष्वत ऊर्द्धम्॥ १॥

अत ऊर्द्धं काम्येषु विधिमुपदेक्ष्याम इति सूत्रशेषः॥ ०॥ १॥ ०॥

पूर्व्वेषु चैके॥ २॥

पूर्व्वेषु नित्यनैमित्तिकेष्वपि वक्ष्यमाणो विधिर्भवति,—इति एके आचार्य्या मन्यन्ते॥ ०॥ २॥ ०॥

कोऽसौ विधिः? उच्यते,—

पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामह इति॥ ३॥

जपेत्,—इति सूत्रशेषः। पश्चादग्नेरित्याद्युक्तार्थम्। न्यञ्चपाणिप्रतिष्ठापनञ्च,—

"दक्षिणं वामतो बाह्यमात्माभिमुखमेव च।
करं करस्य कुर्व्वीत करणे न्यञ्चकर्म्मणः"।

इति कर्म्मप्रदीपोक्तप्रकारेण कर्त्तव्यम्। स खल्वयं—"भूमिजपः" —इत्याख्यायते॥ ०॥ ३॥ ०॥

किं यथाऽऽम्नात एव मन्त्रोजप्यः ? न । कथं तर्हि ?

वसन्त०रात्रौ धनमिति दिवा ॥ ४ ॥

रात्रौ क्रियमाणे कर्म्मणि 'वसु' शब्दान्तं,—दिवाक्रियमाणे कर्म्मणि 'धनम्'—इत्यन्तं कृत्वा, इदं भूमेरिति मन्त्रं जपेत् ॥०॥ ४ ॥०॥

इम०स्तोममिति तृचेन परिसमूहेत् ॥ ५ ॥

इमं स्तोमम्,—इत्यादिना ऋक्त्रयेण परिसमूहेत्—विक्षिप्तानग्न्यवयवानेकीकुर्य्यात् । अन्यत्र क्षिप्रहोमेभ्यः । तथा चोक्तम् ।

"न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्" ।

इति । तिसृणामृचां समाहारः तृचः । "ऋचि त्रेरुत्तरपदादिलोपश्च च्छन्दसि"—इति तत्पदं सिद्धम् । "छन्दोवत् सूत्राणि कवयः कुर्व्वन्ति"—इत्यभ्युपगमात् । तदिदं परिसमूहनं यथा करणीयं, तदाह कर्म्मप्रदीपः ।

"कृत्वाऽग्न्यभिमुखौ हस्तौ स्वस्थानस्थौ सुसंहितौ ।
प्रदक्षिणं तथाऽऽसीनः कुर्य्यात् परिसमूहनम्" ॥

इति । तस्मात्,—दक्षिणहस्तेन कुशान् गृहीत्वा,—इत्यसङ्गतैषा कल्पना भवदेवस्य ॥ ० ॥ ५ ॥ ० ॥

वैरूपाक्षः पुरस्ताद्धोमानाम् ॥ ६ ॥

वैरूपाक्षः,—उपश्च तेजश्च,—इत्यादि जपः,—इति केचित् । विरू

पाद्यशब्दो यस्मिन् विद्यते, सोऽयं वैरूपाक्षः—भूर्भुवः स्वरोम्—इत्यादिकोमन्त्रः,—इति तत्त्वकारः। पठ्यमानमन्त्रकाण्डे तु "भूर्भुवःस्वर् ॐ महान्तमात्मनं प्रपद्ये"—इति प्रतीकं प्रपदस्यैषतयैव पठ्यते। "विरूपाक्षोऽसि दन्ताञ्जिः"—इत्येतदारभ्य वैरूपाक्षः पठ्यते। भट्टभाष्येऽपि, "विरूपाक्षशब्दोऽस्मिन् विद्यते इति वैरूपाक्षो मन्त्रः विरूपाक्षेऽसीत्येवमादिकः"—इत्युक्तम्। स खल्वयं वैरूपाक्षः होमानां पुरस्तादग्रतो जप्तव्यः। अन्यत्र चिप्रहोमेभ्यः। तत्र प्रमाणं वक्ष्यामः।

होमानामिति कुर्व्वन् सहोमकेष्वेव काम्येष्वेतस्य कर्त्तव्यतां दर्शयति। पूर्व्वाणि तर्ह्यहोमकेष्वपि कर्त्तव्यानि? न,—इत्युच्यते। कस्मात्? अग्निसम्बन्धेन विधानात्। न्युक्षकरणं परिसमूहनञ्च खल्वग्निसंबन्धेन विधीयते। न खल्वहोमकेऽग्निरस्ति। अथापि स्यात्,—एतस्मादेव कारणात्तत्राप्यग्निमुत्पादयिष्यामहे,—इति। अत्रोच्यते। नाप्रयोजकत्वात्। नैषा साध्वी कल्पना। कस्मात्? अप्रयोजकत्वात्। सिद्धं खल्वग्निमनूद्य तत्संबन्धेन जपादिकमेव वाक्यानि विदधति, न पुनरग्निमुत्पाददितुमपि प्रयोजयन्ति। कथं ज्ञायते? वाक्यस्य तत्रासामर्थ्यात्। उभयपरत्वे वाक्यभेदापत्तेश्च। कथम्? अग्निसंबन्धेनैतानि कर्त्तव्यानि, अग्निश्चोत्पादनीयः,—इति यदि द्वावप्यर्थौ विधित्सितौ, भिद्येत तर्हि वाक्यम्। अन्यद्धि रूपं विधीयमानस्य अन्यच्चानूद्यमानस्य भवति। तस्मात्,—सहोमकेष्वेव एवमन्तानां करणम्,—इति सिद्धम्। तत्त्वकारस्तु,—होमानां 'वक्ष्यमाणप्रागुक्तनित्यनैमित्तिकानाम्,—इति वर्णयाञ्चकार ॥ ० ॥ ६ ॥ ० ॥

काम्येषु च प्रपदः ॥ ७ ॥

प्रपदः,—तपश्च तेजश्च,—इत्यादिकोमन्त्रः, काम्येषु पुरस्तात् जप्यः। चशब्दात् सहोमकेष्वपि। एतदुक्तं भवति? द्विविधानि तावत् काम्यानि भवन्ति—होमसंयुक्तान्यहोमकानि च। तत्र, वैरूपाक्षो-होमसंयुक्तेष्वेव, प्रपदस्तु सर्व्वत्रैव स्यात्,—इति। तदिदं काम्यपदं होमादन्येषामपि काम्यानां ग्रहणार्थम्। काम्येष्वत.जपम्—इति खल्वाचार्य्यः सहोमकान्येव काम्यान्यभिप्रेत्य सूत्रयाञ्चकार,—इति ज्ञायते। अतएव चशब्दः सहोमकानां समुच्चयार्थः। अथवा। पूर्व्वेषु चैके,—इत्युभयेषामभिकारात् पूर्व्वेष्वप्ययं विधिः स्यात्। अतस्तन्निरासार्थं काम्यग्रहणम्। चशब्दमेवकारार्थं वर्णयतस्तत्त्व-कारस्याप्येषैव वर्णना अनुमतेति गम्यते। एवञ्च, पूर्व्वाणि पूर्व्वे-ष्वपि पञ्चतः प्राप्तानि,—इति बोद्धव्यम् ॥ ० ॥ ७ ॥ ० ॥

अथेदानीं प्रपदवैरूपाक्षयोर्जपप्रकारोऽभिधीयते,—

तपश्च तेजश्चेति जपित्वा प्राणायाममायम्यार्थमना-वैरूपाक्षमारभ्योच्छ्वसेत् ॥ ८ ॥

तपश्च तेजश्च,—इत्यादिमन्त्रं (प्रपदरूपं) जपित्वा, तत्परिसमाप्तौ, प्राणानामायमनं प्राणायामः,—“त्रिरभ्यस्तः पूरककुम्भकरेच-काख्यः प्राणायामः”,—इति सन्ध्यासूत्रोक्तलक्षणः, तमायम्य कृत्वा,—इत्यर्थः। प्रथमं प्राणानायम्य पश्चात्तपश्च तेजश्च,—इत्यादिमन्त्रजपः,—इत्यसङ्गतैवाकल्पना। ‘अर्थमनाः’ अर्थः प्रयो-

जनम्, तस्मिन् मनो यस्य, सोऽयमर्थमनाः,—यः कश्चिदर्थः साधयितुमभिप्रेतः, तं ध्यायन्,—इत्येतत्। 'वैरूपाक्षमारभ्य' 'उच्छ्वसेत्' प्राणान् विमुञ्चेत्, विमुच्य च वैरूपाक्षं मन्त्रं समापयेत् आहृत्य,—इति कश्चित् पठति, वैरूपाक्षं जप्त्वा वायुं रेचयेत्, —इति व्याचष्टे च। प्राणायामोऽप्ययं काम्येष्वेव स्यात् न पूर्व्वेषु। कथं ज्ञायते? अर्थमनाः,—इति करणात्। प्रपद-जपानन्तरविधानाच्च।

अत्र कश्चिदाह। प्राणानां संयमनमेवात्र कर्त्तव्यमुपदिश्यते, न तु प्राणायामो यथोक्तलक्षणः,—इति। तदसङ्गतम्। कस्मात्? प्राणायाममायम्य,—इति सूत्रणात्। अन्यथा, प्राणानायम्य,—इति कुर्य्यात्। एतेन,—प्राणधारणमात्रं वदता रघुनन्दनेनैतदनुपपत्तिभिया, प्राणानायम्य,—इति यत् परिकल्प्य लिखितं, तदप्यनादरणीयम्। प्राणायाममायम्य,—इत्येतस्यैव पाठस्य सर्व्वत्रोपलम्भात्। पूर्व्वव्याख्यातृभिस्तथैव वर्णनाच्च। शिष्टाश्च प्राणायाममेव यथोक्तलक्षणमाचरन्ति, न प्राणधारणमात्रम्। स खल्वयं प्रपदो वैरूपाक्षश्च क्षिप्रहोमेषु न भवति। कुतः?

"न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्ज्जयेत्"।

इति वचनात्॥ ० ॥ ८ ॥ ० ॥

काम्येषु त्रिरात्राभोजनम् ॥ ९ ॥

काम्येषु कर्म्मसु कर्त्तव्येषु त्रिरात्रमभोजनं प्रथमतः करणीयम्। आह। काम्येषु,—इति किमर्थं क्रियते? ननु काम्येष्वत ऊर्द्धम्,

—इत्यधिकृतान्येव काम्यानि। नैष दोषः। पूर्व्वेषु चैके,—त्युभयेषामधिकारात् पूर्व्वेष्वेतत् कदाचिदपि माभूदित्येवमर्थत्वात् काम्यग्रहणस्य॥०॥९॥०॥

त्रीणि वा भक्तानि॥१०॥

त्रिरात्रमत्रापि सम्बध्यते। त्रीणि वा भक्तानि भोजनानि कर्त्तव्यानि। त्रीण्येवेति नियमार्थतया पर्य्यवसानात् भक्तान्तराणां निवृत्तिरवगम्यते। एतदुक्तं भवति। त्रिरात्रमेकभक्तं नक्तं वा कुर्य्यात्,—इति। अभक्तानि,—इति पाठेऽपि त्रीण्येव अभक्तानि,—इति भक्तत्रयमात्रमेव लभ्यते,—इति समान एवार्थः। वाशब्दात् जघन्योऽयं पक्षः। तेनाशक्तस्यैव स्यात्, न तु शक्तस्यापि॥०॥१०॥०॥

नित्यप्रयुक्तानान्तु प्रथमप्रयोगेषु॥११॥

नित्यमहरहर्य्यानि कर्म्माणि प्रयुज्यन्ते, तानि नित्यप्रयुक्तानि,—"भूरित्यनकाममारं नित्यं प्रयुञ्जीत"—इत्येवमादीनि। तेषां प्रथमप्रयोगेषु प्रथमारम्भेषु त्रिरात्राभोजनादिकं न तु प्रतिप्रयोगमित्यर्थः। अशक्यत्वादित्यभिप्रायः। अथवा। यानि नित्यं प्रयुज्यन्ते, तानि नित्यप्रयुक्तानि व्रीहियवहोमहरितगोमयमादीनि, तेषामित्यर्थः। तदनेन, अनित्यप्रयुक्तानां प्रतिप्रयोगं करणं दर्शयति। तुशब्दोऽनर्थकोनिपातो मुखसुखार्थो वा॥०॥११॥०॥

उपोष्य तु यजनीयप्रयोगेषु ॥ १२ ॥

यजनीयेति पक्षादियज्ञमाहुः। तेषां यजनीयानां यः प्रयोगोऽनुष्ठानं तेषु उपोष्य प्रयोगः कर्त्तव्यः, न तत्र त्रिरात्राभोजनादिकमित्यर्थः। तुशब्दः पूर्व्ववत् बोद्धव्यः।

आह। अथ, इदमवाच्यं ननु तत्रोपवासविधानादेव स प्राप्यते, अथोच्यते,—कारणं वक्तव्यम्। उच्यते। नित्ये तावत् पक्षादिचरौ उपवासः सूत्रितः, न स काम्येषु प्राप्नोति, अतः काम्येऽपि तस्य प्राप्त्यर्थमेतत् सूत्रितम्। अथवा। उपवासवत् त्रिरात्राभोजनादिकमपि स्यात्, अतस्तन्निवृत्त्यर्थमेतदुच्यते। कथं नाम ? उपोष्यैव न पुनस्त्रिरात्राभोजनादिकमपि कृत्वा,—इति। एवञ्च, तुशब्दः त्रिरात्राभोजनादिव्यवच्छेदको भवति।
एवं वा—

यजनीयेऽहनि प्रतिपदि प्रयोगोऽनुष्ठानं येषां, तानि यजनीय प्रयोगानि बलहरीनिर्णोदादीनि। तेषु यजनीयप्रयोगेषु उपोष्य प्रयोगः। उपवसथ एव तत्र पुरश्चरणं न तु त्रिरात्राभोजनादीत्यर्थः। यजनीयपदेनात्र प्रतिपदुच्यते। कस्मात् ?

"यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते"।

इत्यादि प्रयोगदर्शनात्। पक्षादियज्ञे तु उपवसथस्य विशेषविधिमहिम्ना त्रिरात्राभोजनादेस्तत्राप्रवृत्तिरनुसन्धेया ॥ ० ॥ ॥ १२ ॥ ० ॥

उपरिष्टाद्देवसांनिपातिकम् ॥ १३ ॥

यत् किल सन्निपतितमेव भायते, तत् सान्निपातिकमनियत-
निमित्तं परिवेषादिकमाचक्ष्महे। तदिदं सान्निपातिकमुपरिष्टा-
द्दैवं भवति। दीक्षा पुरश्चरणं त्रिरात्राभोजनादिकमित्येतत्।
उपरिष्टात् कर्म्मणः पश्चात् दीक्षा यस्य, तदिदमुपरिष्टाद्दैवम्॥
॥०॥१३॥०॥

काम्यपरिभाषामभिधाय, अथेदानीं काम्यानि कर्म्माण्यभिधीयन्ते–

अरण्ये प्रपदं प्रयुञ्जीत दर्भेष्वासीनः॥ १४॥

अरण्ये प्रपदं यथोक्तलक्षणं प्रयुञ्जीत। कथम्? आसीनः उप-
विष्टः। क? दर्भेषु कुशेषु॥०॥१४॥०॥

दर्भेषु,–इत्येतदिदानीं विशिनष्टि,–

प्राक्कूलेषु ब्रह्मवर्च्चसकामः॥ १५॥

ब्रह्मवर्च्चसमध्ययनाश्रयं तेजः। तत् कामयते,–इति ब्रह्मवर्च्चस-
कामः। स खल्वयं ब्रह्मवर्च्चसकामः, प्राक्कूलेषु प्रागग्रेषु, दर्भे-
ष्वासीनः अरण्ये प्रपदं प्रयुञ्जीत,–इति सम्बध्यते। केचित्
पूर्व्वेण सूत्रेण सहास्येकसूत्रतामिच्छन्ति॥०॥१५॥०॥

उदक्कूलेषु पुत्रपशुकामः॥ १६॥

पुत्रान् पशूंश्च यः कामयते,–सोऽयं पुत्रपशुकामः, उदक्कूलेषु
उदगग्रेषु दर्भेष्वासीनः अरण्ये प्रपदं प्रयुञ्जीत,–इत्यनुवर्त्तते॥
॥०॥१६॥०॥

उभयेषूभयकामः ॥ १७ ॥

उभयं कामयते,—इत्युभयकामः; ब्रह्मवर्चसकामः पुत्रपशुकामश्च मिलितोभयकामः—इत्येतत्। अपर आह। "उभयकामः—ब्रह्मवर्चसकामः पुत्रकामश्च। अथवा। ब्रह्मवर्चसकामः पशुकामश्च" —इति। स खल्वयमुभयकामः, उभयेषु प्रागग्रेषु उदगग्रेषु च मिलितेष्वित्यर्थः। दर्भेष्वासीनः,—अरण्ये प्रपदं प्रयुञ्जीत,—इत्यनुवर्त्तत एव। सेयं त्रिसूत्री काम्यकर्म्मविधानार्था। काम्येषु च प्रपदः,—इत्यस्य विशेषार्था,—इति केचित् ॥ ० ॥ १७ ॥ ० ॥

पशुस्वस्त्ययनकामो व्रीहियवहोमं प्रयुञ्जीत सहस्रबाहुर्गौपत्य इति ॥ १८ ॥

पशूनां स्वस्त्ययनं मङ्गलमारोग्यमित्येतत्। तत् कामयते,—इति पशुस्वस्त्ययनकामः। व्रीहियवौ प्रसिद्धौ। ताभ्यां मिश्राभ्यां होमो-व्रीहियवहोमः। तं प्रयुञ्जीत कुर्य्यात्, सहस्रबाहुरिति मन्त्रेण। त्रिप्रहोममत्रेच्छन्ति। पशुशब्देनात्र गावोऽभिप्रेयन्ते,—इत्यवगच्छामः। कस्मात्? गौपत्य इति मन्त्रलिङ्गानुग्रहात्। इहत्-क्षुद्रपशूनामुपरिष्टाद्विशेषोपदेशाच्च ॥ ० ॥ १८ ॥ ० ॥

कौतोमतेन महावृक्षफलानि परिजप्य प्रयच्छेत् ॥ ॥ १९ ॥

महागुणयोगात् महावृक्षोऽभिप्रेतः, न परिमाणमहत्त्वात्। एवमेके। महागुणयोगात् परिमाणमहत्त्वाच्च महावृक्षः। एवमपरे।

कः पुनरसौ ? यः कश्चिद्भोज्यफलः चूतनारिकेलादिः,--इत्याह।
महावृक्षस्य फलानि महावृक्षफलानि। कौतोमतेन कौतोमतशब्द-वता मन्त्रेण ;--"कौतोमतं संवननं"--इत्यादिना मन्त्रेणेत्येतत्।
परिजप्य प्रयच्छेत् दद्यात् ॥ ० ॥ १८ ॥ ० ॥

कस्मै प्रयच्छेत् ?--

यस्यात्मनि प्रसादमिच्छेत्तस्मै ॥ २० ॥

आत्मनि स्वस्मिन् विषये यस्य प्रसन्नतामिच्छेत्, तस्मै प्रयच्छेत् ॥ ॥ ० ॥ २० ॥ ० ॥

किं परिजपितानि सर्व्वाण्येव फलानि तस्मै प्रयच्छेत्? न।
किन्तर्हि ?--

एकभूयांस्यात्मनो युग्मानि कुर्य्यात् ॥ २१ ॥

तेषां फलानां मध्यात् एकभूयांसि-युग्मानि समानि, फलानि आत्मनः आत्मार्थं कुर्य्यात् कल्पयेत्। एकेन भूयांसि एकभूयांसि--एकाधिकानीत्यर्थः। एतदुक्तं भवति। कानिचित् फलानि परि-जप्य तेषां मध्यात् कियन्ति अयुग्मानि फलानि, यस्यात्मनि प्रसादमिच्छेत् तस्मै प्रयच्छेत्, तेभ्यश्च एकेन फलेनाधिकानि अतएव युग्मानि फलानि आत्मनोऽर्थे कुर्य्यात्,--इति। आह।
ननु सन्निसाम्यात् अयुग्मानि,--इत्यपि शक्यते वर्णयितुम ?
उच्यते। सत्यं शक्यते वर्णयितुं, कल्पनागौरवापत्तेस्तु न तथा वर्ण्यते। माङ्गलिकत्वाच्चात्मनो युग्मानामेव वर्णयितुमुचितत्वात्।

युग्मानि किल माङ्गलिकानि भवन्ति। "वृद्धिपूर्त्तेषु युग्मानाशयेत्"--इत्यादिदर्शनात् ॥ ० ॥ २१ ॥ ● ॥

वृषाङ्कुवेति पञ्चर्चः ॥ २२ ॥

पञ्चानामृचां समाहारः पञ्चर्चः। इन्द्र इव,--इत्येवमादिकः पञ्चर्चोऽधिकृतो वेदितव्यः ॥ ० ॥ २२ ॥ ● ॥

तस्मिन् प्रथमं पार्थिवं कर्म्म ॥ २३ ॥

तस्मिन् अधिकृते पञ्चर्चे, तद्विषये,—इत्यर्थः। प्रथममाद्यं कर्म्म पार्थिवम्। पृथिव्यर्थं क्रियते,—इति पार्थिवम्—ग्रामक्षेत्राद्यर्थम् —इत्यर्थः। वक्ष्यते,--इति सूत्रशेषः ॥ ० ॥ २३ ॥ ● ॥

अर्द्धमासमभुक्त्वा ॥ २४ ॥

कुर्य्यात्,--इति सूत्रशेषः। अस्मात् विशेषोपदेशात् अत्र सामान्यस्य पुरश्चरणस्य त्रिरात्राभोजनादेर्निवृत्तिरिति बोद्धव्यम् ॥ ० ॥ २४ ॥ ● ॥

अशक्तौ वा पेयामन्यतरं कालम् ॥ २५ ॥

अर्द्धमासाभोजनस्य त्वशक्तौ प्रकृतमर्द्धमासं व्याप्य पेयां वा पीत्वा पार्थिवं कर्म्म कुर्य्यात्। "पेया श्राणाऽच्छमण्डयोः"--इत्याभिधानिकाः। किं सायम्? न। 'अन्यतरं कालम्'। प्रातर्व्वा सायं वा,--इत्यनियमः ॥ ० ॥ २५ ॥ ● ॥

यत्रात्मानं परिपश्येत् ॥ २६ ॥

यत्र यस्मिन् काले पेयां पिबेत्,—तस्मिन् काले आत्मानमात्मच्छायां परिपश्येत्—दर्पणादाविति वाक्यशेषः।

एवं वा,—

यत्र यस्यां पेयायामात्मानं परिपश्येत्, तां पेयां पीत्वा,—इति पूर्व्वोक्तां पेयामनेन विशिनष्टि ॥ ० ॥ २६ ॥ ० ॥

एतद्व्रतमर्द्धमासव्रतेषु ॥ २७ ॥

यत्र यत्रार्द्धमासव्रतमुपदेक्ष्यते, तत्र तत्र,—"आचितशतकामोऽर्द्धमासव्रतः"—इत्येवमादौ, एतत् अनन्तरोक्तं व्रतं बोद्धव्यम् ॥ ॥ ० ॥ २७ ॥ ० ॥

प्रासङ्गिकमभिधाय अथेदानीं प्रकृतं पार्थिवं कर्म्माह,—

पौर्णमास्याᳲरात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डुलान्गन्तेष्वास्येन जुहुयात्-स्वाहेत्युदके ॥ २८ ॥

पौर्णमास्यां रात्रौ,—इत्यतिरोहितार्थम्। "विदासः शोषः, स यस्य ह्रदस्यास्ति स विदासी। अविदासी शोषोऽप्यशोषजलः,—इत्यर्थः। तस्मिन् अविदासिनि ह्रदे"—इति केचित्। आचार्य्यपुत्रस्तु आह गृह्यासंग्रहे।

> "मध्ये स्थण्डिलमन्ते च वारिणा परिसंवृतम्।
> अविदासिनं ह्रदं विद्यात्साद्यं कर्म्मणो विदुः"।

इति। तदेतस्मिन् अविदासिनि ह्रदे, नाभिमात्रं नाभिपरिमितम् उदकम् अवगाह्य अवतीर्य्य, अक्षततण्डुलान्—अक्षता यवाश्च तण्डुलाश्च तान्—यवमिश्रान् व्रीहितण्डुलान्,—इत्यर्थः। अक्षतानां यवानां तण्डुलान्,—इत्यन्ये। अपरे पुनर् अक्षतशब्देन अखण्डतानेव विशेषयन्ति;—अक्षतानखण्डितान् तण्डुलान्,—इति। तदेतदुभयमप्यसङ्गतम्। कस्मात्?

"गोवाहनक्षुद्रपशुस्वस्तिकर्मस्वपि त्रिषु।
जलहोमे च मिश्राभ्यां द्रव्याभ्यां होम इष्यते।

इति वचनात्। तस्मात् यथोक्त एवार्थः। तानिमानक्षततण्डुलान् ऋगन्तेषु प्रकृतानां पञ्चानामृचामवसानेषु आस्येन मुखेन जुहुयात् स्वाहेत्युच्चार्य्य। कुत्र जुहुयात्? उदके जले। अनग्निकत्वादस्मिन् होमे स्वाहाकारविलोपं कश्चिदाशङ्कीत मन्दमतिरिति खल्वाचार्य्यः स्वाहेति सूत्रयाञ्चकार। तस्मात्, स्वाहाकारावसान एव होमोऽयं स्यात्। ऋगन्तेषु,—इति तर्हि किमर्थम्? प्रत्येकं ऋगवसानेषु होमप्रज्ञापनार्थमित्याह। अन्यथा खल्वेकैवाहुतिः पञ्चर्चेन स्यादित्यपि कश्चिदाशङ्कीत। अत्र च, अनग्निकत्वात् यावदुक्तमेव कर्त्तव्यमिति द्रष्टव्यम्॥ ०॥ २८॥०॥

अथापरम्॥ २९॥

अथशब्दः पूर्व्वोक्तत्रिरात्राभोजनाद्यानन्तर्य्यार्थः। पूर्व्वप्रकृतपञ्चर्चानुसन्धानार्थः वा। अथ एतस्मिन्नेव पञ्चर्चे अपरं अन्यत् कर्म्म, वर्णिष्यते,—इति सूत्रशेषः॥ ०॥ २९॥ ०॥

तदपरं कर्म्म अभिधीयते, आ खण्डिकापरिसमाप्तेः,—

प्रथमयाऽऽदित्यमुपतिष्ठेत भोगकामोऽर्थपति-
चक्षुर्व्विषये सिद्ध्यत्यर्थः॥ ३० ॥

प्रकृतस्य पञ्चर्चस्य प्रथमया ऋचा,—हंस इव पक्षस्तिष्ठति,—इत्यादिकयेत्येतत्। आदित्यमुपतिष्ठेत आराधयेत्। उपस्थानञ्चेदम्,—

"तदसंसक्तपार्ष्णिर्व्वा एकपादर्द्धपादपि।
कुर्य्यात् कृताञ्जलिर्व्वाऽपि ऊर्द्ध्वबाहुरथापिवा"।

इति कर्म्मप्रदीपोक्तप्रकारेण करणीयम्। कः उपतिष्ठेत? 'भोगकामः'। भोगं कामयते,—इति भोगकामः। कस्मिन् प्रदेशे उपतिष्ठेत? अर्थपतिचक्षुर्व्विषये। यस्मादर्थपतेः सकाशात् भोगं कामयते, तस्यार्थपतेः चक्षुर्व्विषये चक्षुर्गोचरे प्रदेशे। एवं कृते खल्वस्य, 'सिद्ध्यति' 'अर्थः' प्रयोजनम्॥ ०॥ ३०॥ ०॥

द्वितीययाऽऽदित्ये परिविष्यमाणेऽक्षततण्डुलान्
जुहुयात् बृहत्पत्रस्वस्त्ययनकामः॥ ३१ ॥

पदं आयते,—इति पत्रं वाहनमाचक्ष्महे। बृहत्शब्दो महद्वचनः। बृहत् च तत् पत्रञ्चेति बृहत्पत्रं हस्त्यश्वादिकमुच्यते। तेषां स्वस्त्ययनमारोग्यं कामयते,—इति बृहत्पत्रस्वस्त्ययनकामः;—प्रकृतस्य पञ्चर्चस्य द्वितीयया ऋचा,—ऋतं सत्ये प्रतिष्ठितम्,—इत्येवमादिकयेत्येतत्। आदित्ये सवितरि परिविष्यमाणे, अक्षततण्डुलान् जुहुयात्,—इत्युक्तार्थम्। परिवेषः परिधिरित्यनर्थान्-

न्तरम्। यत्र खल्वादित्यस्य किरणाः वातेन मण्डलीभूताः तस्य परितो मालाभाः लच्यन्ते, सोऽयमादित्यस्य परिवेषः,—इत्याचचते। तथा चोक्तम्।

"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः।
मालाभा व्योम्नि तन्वन्तः परिवेषाः प्रकीर्त्तिताः"॥

इति। तदिदमुपरिष्टाद्दैवम्। चिप्रहोममन्ये च्छन्ति ३१

तृतीयया चन्द्रमसि तिलतण्डुलान् चुद्रपशुस्वस्त्ययनकामः॥ ३२॥

प्रकृतस्य पञ्चर्चस्य तृतीयया ऋचा,—अभिभागोऽसि,—इत्यादिकयेत्येतत्। चन्द्रमसि परिविष्यमाणे तिलतण्डुलान् जुहुयादित्यनुवर्त्तते। तिलतण्डुलान्,—इति, अचततण्डुलान्,—इति-च्छन्दोव्याख्येयम्। को जुहुयात्? चुद्रपशुस्वस्त्ययनकामः। चुद्रपशुशब्देनाजाविकाद्युच्यते। सर्व्वमन्यत् पूर्व्ववत्॥०॥३२॥०॥

चतुर्थ्याऽऽदित्यमुपस्थायार्थान् प्रति पद्येत स्वस्त्यर्थवानागच्छति॥ ३३॥

प्रकृतस्य पञ्चर्चस्य चतुर्थ्या ऋचा,—कोश इव पूर्णो वसुना,—इत्यादिकयेत्येतत्। पूर्व्ववत् आदित्यमुपस्थाय, अर्थान् प्रति लच्चीकृत्य, तान् साधयितुमिति यावत्। पद्येत गच्छेत्। अर्थान् प्रपद्येत,—इति पाठेऽपि, अर्थान् साधयितुमिति पूर्व्वोक्त एवार्थः।

एवं गच्छन् खल्वयं गत्वा, स्वस्त्यर्थवीमार्गं गच्छति। यमर्थमभिसन्धाय गच्छति, तद्दान् स्वस्तिमांश्चागच्छति गृहम्॥ ०॥ ३३॥ ०॥

पञ्चम्याऽऽदित्यमुपस्थाय गृहान् प्रपद्येत, स्वस्ति गृहानागच्छति स्वस्ति गृहानागच्छति॥ ३४॥

प्रकृतस्य पञ्चर्चस्य पञ्चम्या ऋचा,—आकाशस्येष आकाशः,—इत्यादिकयेत्येतत्। तदनया ऋचा पूर्व्ववदादित्यमुपस्थाय गृहान् प्रति लक्षीकृत्य प्रपद्येत गच्छेत्,—प्रवासस्थः,—इति वाक्यशेषः। अथवा। गृहान् परित्यज्य प्रपद्येत गच्छेत् प्रवसेदित्यर्थः। गृहात् प्रपद्येत,—इति पाठे, गृहात् सकाशात् प्रतद्येत,—इति स एवार्थः। एवं प्रपद्यमानः खल्वयं स्वस्ति मङ्गलं यथा भवति तथा गृहानागच्छति। द्विर्व्वचनं पञ्चर्चाधिकारसमाप्तिप्रज्ञापनार्थम्॥ ०॥ ३४॥ ०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य पञ्चमी खण्डिका समाप्ता॥ ०॥

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके षष्ठी खण्डिका।

भूरित्यनकाममारं नित्यं प्रयुञ्जीत ॥ १ ॥

भूरित्ययं मन्त्रप्रतीकः। भूरित्यादिकमनकाममारं मन्त्रं नित्यमहरहः प्रयुञ्जीत। अनकाममारशब्देन, "भूर्भुवः स्वरोम् सूर्य्य इव दृशे"—इत्यादिको मन्त्रो भण्यते। कुतः? योगात् प्रसिद्धेश्च। योगस्तावत्। मरणं मारः, काम इच्छा। कामेन मारो यस्मात् सोऽयं काममारः, स न भवतीत्यकाममारः। न अकाममारोऽनकाममारः। इच्छयैव मरणं यस्मादित्यर्थः। प्रसिद्धिश्चाध्येतृसम्प्रदायागता बोद्धव्या ॥ ० ॥ १ ॥

न केवलमिच्छयैव मरणमस्मान्मन्त्रात् सम्पद्यते, अपि तु यः खल्वेतं मन्त्रमहरहः प्रयुङ्क्ते, तस्य,—

न पापरोगान्नाभिचाराद्भयम् ॥ २ ॥

पापरोगः कुष्ठराजयक्ष्मादिः। अभिचारः श्येनसन्दंशादिः। तस्मात् भयं न भवति ॥ ० ॥ २ ॥ ० ॥

अलक्ष्मीनिर्णोदः ॥ ३ ॥

अलक्ष्मीः प्रसिद्धा। तस्या निर्णोदो निर्हारो नाशकः,—इत्येतत्। कः पुनरसौ? वक्ष्यमाणो होमः ॥ ० ॥ ३ ॥ ० ॥

स खल्वयमलक्ष्मीनिर्णोदो होमः ,— :

यजनीयप्रयोगः ॥ ४ ॥

यजनीयेऽहनि प्रयोगोऽनुष्ठानं यस्य,—सोऽयं यजनीयप्रयोगः। यज्ञदिने कर्त्तव्यः ,—इत्यर्थः। यजनीयप्रयोगत्वादुपवसथएवात्र पुरश्चरणं स्यात् । यद्यपि यजनीयप्रयोगोऽयं, तथापि तदीयचरुणा न करणीयः , किन्तु द्रव्यान्तरेणाज्येनैव स्यात् ।

अपर आह। यजनीयस्य प्रयोगोऽनुष्ठानं यस्य सोऽयं यजनीयप्रयोगः। न खल्वस्य यजनीयप्रयोगत्वं विज्ञातं येनाय मनुवादः स्यात् , किन्तु अविज्ञातं विधीयते। तेन, यजनीयवत् प्रयोगः,—इत्यर्थः सिद्धाभवति। तस्मात् धर्म्मप्रदेशोऽयम्। "उपोष्य तु यजनीयप्रयोगेषु"—इति सूत्रित उपवासोऽत्र प्रदिश्यते। कथं पुनरसति वतिप्रत्यये वत्यर्थः शक्योऽवगन्तुम् ? शक्यः ,—इत्याह। कथम् ? यजनीयशब्दोऽयं कर्म्मणा सम्बद्धः तत्सहचरितं उपवासधर्म्मं शक्नोति लक्षणया गमयितुम्। शक्नोति चेद्गमयितुं, प्रदेष्टुमपि शक्नोति। एवं खल्वन्तरेणापि वतिप्रत्ययं वत्यर्थः शक्योऽवगन्तुम् । स खल्वयमर्थः सप्तमाध्याय प्रपञ्चितः , तत्रैवानु-सन्धेयः ॥ ० ॥ ४ ॥ ० ॥

अथेदानीमलक्ष्मीनिर्णोदो होमोऽभिधीयते,—

मूर्द्धोधिम इत्येकैकया ॥ ५ ॥

मूर्द्धोधिमे,—इत्यादिकोऽष्टर्चोऽत्राभिप्रेतो बोद्धव्यः। तासां,:खल्व-

ष्टानामृचामेकैकया ऋचा एकैका आहुतिर्होतव्या। अलक्ष्मी-निर्णोद:,—इत्येकवचनात् सर्व्वाभिरेकैवाहुति: स्यादित्यपि कदाचिदाशङ्का स्यात् कस्यचिन्मन्दमते:, अतस्तन्निरासार्थमाचार्य्य एकैकयेत्याह ॥ ० ॥ ५ ॥ ० ॥

किं मन्त्राणामध्ययनक्रमेणैव अष्टावाहुतयो होतव्या:? न। कथन्तर्हि?

या तिरश्चीति सप्तमी ॥ ६ ॥

या तिरश्चीत्यनया ऋचा सप्तमी आहुतिर्होतव्या। सेयमृक् प्रदेशान्तरपठितेति द्रष्टव्यम्। तदेवमष्टर्चस्य षड्भिर्ऋग्भि: पाठक्रमात् षडाहुतीर्हुत्वा, या तिरश्चीत्यनया ऋचा प्रदेशान्तरपरिपठितया सप्तम्याहुतिर्होतव्या। स्थिता तावदविनियुक्तैवाष्टर्चस्य सप्तमी ऋगष्टमी च ॥ ० ॥ ६ ॥ ० ॥

तदनन्तरम्,—

वामदेव्यर्च: ॥ ७ ॥

वामदेवो नाम ऋषि:, तदीया ऋच: वामदेव्यर्च:। अथ वा। वामदेव्यं नाम साम, तत् यासु ऋक्षु गीयते ता वामदेव्यर्च:। 'कयानश्चित्र आभुवत्'—इतित्यृचो भण्यन्ते। तासामप्येकैकयैव ऋचा होम: स्यात्, न तु त्यृचेनैव। कुत:? एकैकया,—इत्यनुवर्त्तनात्। तदिदमुपरिष्टात् स्पष्टीकरिष्याम: ॥ ० ॥ ७ ॥ ० ॥

एतदनन्तरञ्च,—

महाव्याहृतयश्च ॥ ८ ॥

महाव्याहृतयो भूराद्यास्तिस्रः । तासामप्येकैकया एकैका आहुतिर्होतव्या ॥ ० ॥ ८ ॥ ० ॥

प्रजापत इत्युत्तमा ॥ ९ ॥

प्रजापते न त्वदित्यष्टर्चस्याष्टम्या ऋचा उत्तमा अस्यां आहुतिर्होतव्या । तदेवमष्टर्चस्याष्टम्या ऋचो विनियोगः सूचितः । आह । अथ, उत्तमा,—इत्येतद्वाच्यं पाठक्रमादेवैतस्या उत्तमत्वसिद्धेः, अथोच्यते,—कारणं वक्तव्यम् ? उच्यते । अस्या उत्तमत्ववचनादुपोत्तमाऽपि काचिदाहुतिर्विज्ञायते । का पुनरुपोत्तमा नामाहुतिरभिप्रेता ? शृणु । येयमष्टर्चस्य सप्तमी ऋक्—अपेहि त्वम् ,—इत्यादिका साम्प्रतमप्यविनियुक्तैव स्थिता, सेयमुपोत्तमा इत्यवगच्छामः । कस्मात् कारणात् ? तस्याः विनियोगान्तरानवगतेः, उपस्थितत्वाच्च । तदेवमष्टर्चस्य क्रमपरिपठिताः 'परिबाधं यजामहे'—इत्येवमन्ताः षट् ऋचः, प्रदेशान्तरपठिता या तिरश्चीत्येका, वामदेव्यर्चस्तिस्रः , महाव्याहृतयस्तिस्रः । एवन्तावत् त्रयोदशाहुतयो भवन्ति । अपेहि त्वमिति चतुर्दशी । प्रजापते न त्वदिति पञ्चदशी बोद्धव्या । तथा चोक्तम् ।

"विहारो वामदेव्यर्चां व्याहृतीनां तथैव च ।
अलक्ष्मीनाशके होमे स्यादपेहि चतुर्दशी" ॥

इति ॥ ० ॥ ९ ॥ ० ॥

पर्य्यवसितोऽलक्ष्मीनिर्णोदः। अथेदानीं कर्म्मान्तरं वक्तुमारभते,—

यशोऽहं भवामीति यशस्काम आदित्यमुपतिष्ठेत पूर्व्वाह्णमध्यन्दिनापराह्णेषु ॥ १० ॥

यशोऽहं भवामीति पञ्चर्चोऽत्राभिप्रेतः। तेनादित्यमुपतिष्ठेत। कः? यशस्कामः। यशः कामयते यः, सोऽयं यशस्कामः। कस्मिन् काले? पूर्व्वाह्णमध्यन्दिनापराह्णेषु। तिसृष्वपि सन्ध्यासु,—इत्यर्थः। कुतः? परतः सन्धिवेलयोः पूर्व्वाह्णापराह्णपदप्रयोगदर्शनात्। एवञ्च, नित्योपस्थानादनन्तरमेतदुपस्थानं स्यात्। यथाश्रुतार्थ एव सम्यक् इति केचित् ॥ ० ॥ १० ॥ ० ॥

किं यथापठितेनैव पञ्चर्चेन? न। कथन्तर्हि?

प्रातरह्णस्येति सन्नामयन् ॥ ११ ॥

प्रातरह्णस्य,—इति मन्त्रभागं सन्नामयन्, सम्यक्—यथालिङ्गं, नामयन् परिणमयन्—ऊहं कुर्व्वन्नित्यर्थः। एतदुक्तं भवति। प्रातरह्णस्य तेजसः,—इत्येतस्मिन् मन्त्रस्थाने,—मध्यन्दिनस्य तेजसः,—इति मध्यन्दिने, अपराह्णस्य तेजसः,—इत्यपराह्णे, ऊहं कुर्य्यादिति ॥ ० ॥ ११ ॥ ० ॥

कर्म्मान्तरमाह,—

सन्धिवेलयोरुपस्थानꣳस्वस्त्ययनमादित्यनावमित्युद्यन्तं त्वाऽऽदित्यानूद्यासमिति पूर्व्वाह्णे, प्रतितिष्ठन्तं त्वाऽऽदित्यानुप्रतिष्ठासमित्यपराह्णे ॥ १२ ॥

सन्धिवेलयोः प्रातः सायमित्येतत्। उपस्थानं कर्त्तव्यमिति सूत्र-शेषः। केन? आदित्य नावमित्यनया अनुष्टुभा यजुर्द्वयसहितया। कस्य उपस्थानम्? आदित्यस्य। कथं ज्ञायते? अधिकारात्। मन्त्रलिङ्गाच्च। किमर्थं पुनरिदमुपस्थानम्? स्वस्त्ययनम्। स्वस्ति मङ्गलं अयति गच्छति प्राप्नोत्यनेनेति स्वस्त्ययनम्—मङ्गलफलक-मित्यर्थः। किं द्वयोरपि सन्ध्ययोरविशेषेण यजुर्द्वयस्याभिनिवेशः? न। किन्तर्हि? उद्यन्तं त्वा,—इत्येतद्यजुः पूर्व्वाह्णे विनियोक्त-व्यम्। प्रतितिष्ठन्तं त्वा,—इत्येतद्यजुरपराह्णे प्रयोक्तव्यम्। तथा च, लिङ्गवशादनयोर्व्विनियोगः,—इत्यभिप्रायः॥०॥ १२ ॥०॥

कर्म्मान्तरमाह,—

आचितशतकामोऽर्द्धमासव्रतस्तामिस्रादौ व्रीहि-काण्सौदनं ब्राह्मणान् भोजयित्वा ॥ १३ ॥

आचितशब्देन शकटो भण्यते। कुतः? "आचितं शकटं प्राहुः" —इति वचनात्। शतशब्दो बहुत्ववचनः, कुतः? नैघण्टुके काण्डे 'शतं सहस्रं'—इति बहुनामसु पाठात्। आचितानां शतं कामयते,—इत्याचितशतकामः। यद्यप्याचितशब्देन शकटो-भण्यते, तथाप्यत्र शाकटो भारः;—तावत् परिमितं सुवर्ण-मिहाभिप्रेतमित्यवगन्तव्यम्। कस्मात्? शकटमात्रस्यानति-प्रयोजनत्वात्। तावति सुवर्णेऽप्याचितशब्दस्य सङ्केतितत्वाच्च। तथा चोक्तम्।

"सुवर्णविस्तो हेम्नोऽक्षे कुरुविस्तस्तु तत्पले।

तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला ।

आचितो दश भाराः स्युः शाकटो भार आचितः" ।

इति । अपर आह । "आचितशब्देनात्र बहुपशुधनधान्यमात्मनः प्रार्थ्यते । तथा हि चरितार्थत्वादाचितानाम्"—इति । स खल्वयमाचितशतकामोऽर्द्धमासव्रतः सन् ,—पूर्व्वोक्तेन विधिना अर्द्धमासं व्रतं कृत्वा,—इत्येतत् । तमिस्र एव तामिस्रः । तामिस्रस्य कृष्णपक्षस्य, आदौ प्रतिपदीत्यर्थः । 'व्रीहिकांसौदनं ब्राह्मणान् भोजयित्वा' । व्रीहयः प्रसिद्धाः । कांसशब्देन द्रोणपरिमाणं भण्यते । कस्मात् ? "द्रोणः स्यात् कांसमानकः"—इति वचनात् । व्रीहीणां कांसं व्रीहिकांसं, व्रीहिकांसस्य ओदनो भक्त. व्रीहिकांसौदनः, तं व्रीहिकांसौदनं ब्राह्मणान् भोजयित्वा ।

आह । व्रीहिकांसस्य , व्रीहिकांसयोः , व्रीहिकांसानाम् , —इति त्रेधैव विग्रहस्य सम्भवादेकत्वेन विग्रहे कारणं वक्तव्यम् ? उच्यते । प्रथमोपस्थितत्वादेकवचनसंयोगाच्च एकत्वेनैव विग्रहमाचक्ष्महे । व्रीहिकांसौदनमित्येकवचने श्रूयमाणे खल्वेकत्वमागच्छति हृदयम् , आगच्छति चेत् ,—न युज्यते विना कारणमुत्स्रष्टुम् । उत्तरत्रापि , 'तस्य',—इत्येकवचनसंयोगेन व्रीहिकांसस्य परामर्शाच्चैवमवगच्छामः । अपि च । द्वित्वबहुत्वाभ्यां विग्रहे ब्राह्मणबहुत्वं स्यात् । तच्चानिष्टम् । कस्मात् कारणात् ? श्राद्धे तस्य दोषदर्शनात् । कारणस्य चाविशेषात् । तथा च मनुः ।

"सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसम्पदः ।

पञ्चैतान् विस्तरो हन्ति तस्मान्नेहेत विस्तरम्" ॥

इति। तस्मात्, सत्क्रियाद्यनुरोधाद्दताम्येकवचनेनैव विग्रहः,—इत्यादरणीयम् ॥ ० ॥ १३ ॥ ० ॥

तदेवं ब्राह्मणान् भोजयित्वा,—

तस्य कणानपरासु सन्धिवेलासु प्रत्यग्ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधायादित्यमभिमुखो जुहुयात्-भलाय स्वाहा भल्लाय स्वाहेति ॥ १४ ॥

तस्य प्रक्रान्तस्य व्रीहिकांसस्य, कणान्,—

"कम्बूकाश्च कणाश्चैव फलीकरणकक्कुशाः"।

इत्युक्तलक्षणान्। जुहुयात्,—इति सम्बन्धः। ते खल्विमे कणाः तुषाः,—इत्याचक्षते। अपरासु सन्धिवेलासु अस्तमयसन्ध्यासु,—इत्यर्थः। 'बहुवचनात् तामिस्रपक्षमभिव्याप्य सर्व्वास्वेवास्तमयसन्ध्यासु अयं होमः स्यात्', न पुनः प्रतिपद्येव,—इति द्रष्टव्यम्। प्रत्यक् पश्चिमायां दिशि, चतुष्पथे,—इति सम्बन्धः। ग्रामात् निवासभूतात् निष्क्रम्य निर्गत्य गत्वा वा। चतुष्पथः प्रसिद्धः। तस्मिन् अग्निं उपसमाधाय यथोक्तेन विधिना, आदित्यमभिमुखः, —आभिमुख्येनादित्यमुखः, प्रत्यङ्मुखः,—इत्येतत्। "भलाय स्वाहा" "भल्लाय स्वाहा"—इत्येताभ्यां यजुर्भ्यां पृथक् जुहुयात्। 'अग्निमुपसमाधाय,—इति वचनात् चिप्रहोमोऽयम्। कथं नाम? अग्निमुपसमाधायैव जुहुयात्, न सर्व्वामप्याहृतं कृत्वा,—इति ॥ ० ॥ १४ ॥ ० ॥

एतयैवावृताऽपरौ तामिस्रौ ॥ १५ ॥

एतयैवानन्तरयैवावृता रीत्या अपरावपि तामिस्रौ अथापचावभि-व्याप्य अपरासु सन्धिवेलासु जुहुयात् । इदमिदानीं सन्दिह्यते । एतया,—इति किं ब्राह्मणभोजनादेः परामर्शः, आहोस्विदर्द्धमास-व्रतादेः ?,—इति । ब्राह्मणभोजनादेः ,—इत्याह । कस्मात् ? आवृता,—इति करणात् । न खल्वर्द्धमासव्रतमावृत् । कर्तृधर्म्मः खल्वेतत् । कथं ज्ञायते ? "आचितशतकामोऽर्द्धमासव्रतः"—इति कर्तृविशेषणतयोपन्यासात् । तस्मादर्द्धमासव्रतस्य न परामर्शः । अपि च । तस्यैव कर्म्मण आवृत्तिरिहोपदिश्यते । अभ्यस्ते च कर्म्मणि सकृदेव व्रतमन्यत्रोपदिष्टम् ,—"नित्यप्रयुक्तानान्तु प्रथम-प्रयोगेषु"—इत्यत्र । तद्वदिहापि वर्णयितुमुचितम् ।

अपर आह । तामिस्रान्तरेषु ब्रह्मचारी स्यात् ,—इति व्रतान्तरोपदेशादर्द्धमासव्रतस्य परामर्शः । इतरथा अर्द्धमासव्रता-देव ब्रह्मचर्य्यस्य प्राप्तत्वात् तदवाच्यं स्यात् ,—इति । तदपि न समीचीनम् । कुतः ? अर्द्धमासव्रते ब्रह्मचर्य्यस्य पूर्व्वमाचार्य्येणा-नुपदेशात् । प्रथमतामिस्रे तर्हि न प्राप्नोति ब्रह्मचर्य्यम् ? मा प्रापत् , का नो हानिः । अर्द्धमासव्रतस्य पुरश्चरणरूपतया तत्रापि न तावतैव प्रथमतामिस्रे ब्रह्मचर्य्यस्य प्राप्तिः । यथा तु प्रथमेऽपि तामिस्रे प्राप्नोति ब्रह्मचर्य्यं, तथा परतो वर्णयिष्यामः ॥०॥१५॥०॥

तामिस्रान्तरेषु ब्रह्मचारी स्यादासमापनादासमा-पनात् ॥ १६ ॥

अन्तरशब्दो मध्यवचनः । तामिस्रपक्षयोरन्तरे मध्ये यान्यहानि,

तानि तामिस्रान्तराणि। पूर्व्वापरयोस्तामिस्रयोर्निर्देशात् तन्मध्यपतितानि शुक्लपक्षदिनान्यपि सन्दंशपतितन्यायेन गृह्यन्ते। तेषु अहःसु ब्रह्मचारी मैथुनवर्ज्जी, स्यात् भवेत्। आसमापनात् कर्म्मसमापनपर्य्यन्तम्। कर्म्मसमापनदिनस्य तामिस्रान्तरत्वेऽपि कर्म्मसमापनात् परतो न तत्र ब्रह्मचर्य्यनियमः,—इत्येतदर्थम्;—'आसमापनात्'—इत्याह। यद्यपि, पर्व्वत्वेन तत्रापि मैथुननिषेधोऽस्त्येव, तथापि निमित्तान्तरप्रयुक्तस्य तस्य कर्म्माङ्गत्वं नास्ति,—इत्यभिप्रायः।

एवं वा,—

तामिस्राणामन्तरे मध्ये यान्यहानि, तानि तामिस्रान्तराणि, तेषु तामिस्रान्तरेषु अहःसु ब्रह्मचारी स्यात्। बहुवचनात् प्रथमेऽपि तामिस्रे ब्रह्मचर्य्यं प्राप्नोति। तामिस्रान्तरेषु कर्म्मोपदेशात्तदन्तःपातिषु शुक्लपक्षाण्हःसु ब्रह्मचर्य्यं न स्यात्,—इत्याशङ्कायामाह;—आसमापनात्,—इति। कर्म्मसमापनपर्य्यन्तमित्यर्थः। द्विर्व्वचनं प्रकरणखण्डिकयोः समाप्त्यर्थमादरार्थञ्च॥ ०॥ १६॥ ०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य षष्ठी खण्डिका समाप्ता॥ ०॥

————

अथेदानीं प्रकरणान्तरमारभते,—

अवसानं जोषयेत * ॥ १ ॥

अवस्यन्ति निवसन्त्यस्मिन्,—इत्यवसानं गृहार्थं भूस्थानमिहाभिप्रेतम्, न गृहमेव। कथं ज्ञायते? 'समं लोमशम्'—इत्यादिविशेषणानां सामर्थ्यात्। 'तत्रावसानं प्रागद्वारम्'—इत्यादिसूत्रणोपपत्तेश्च। तदिदमवसानं जोषयेत,—'जुषी प्रीतिसेवनयोः'—इति स्मरणात् सेवेत, परिगृह्णीयादित्येतत् ॥ ० ॥ १ ॥ ० ॥

अवसानमिदानीं विशिनष्टि,—त्रयोदशभिः सूत्रैः,—

समं लोमशमविभ्रंशि ॥ २ ॥

समं समानम्,—अनिम्नोन्नतमित्यर्थः। लोमशम्। लोमानीव कोमलानि तृणानि यत्र विद्यन्ते, तदिदं लोमशमित्युच्यते। अथ वा। 'तृणानि भूमेर्लोमानि'—इति वचनात् यथाश्रुत एवार्थः। अविभ्रंशि। यत्र कृतस्य वेश्मनो नदीतीरभेदकूपपातमतङ्गजादिभिर्विभ्रंशो विनाशो न सम्भाव्यते, तदिदमविभ्रंशि। 'अवसानं जोषयेत',—इति सर्व्वत्र सम्बध्यते ॥ ० ॥ २ ॥ ० ॥

---

* जोषयेत्,—इति पाठान्तरम्।

प्राच्य उदीच्यो वा यत्रापः प्रवर्त्तेरन् ॥ ३ ॥

प्राच्यः प्राङ्मुख्यः। उदीच्यः उदङ्मुख्यः। वाशब्दो विकल्पार्थः। यत्र यस्मिन् स्थाने, आपः प्रवर्त्तेरन्,—प्रकर्षेण स्वभावतो वर्त्तेरन् न तु क्रियेरन्। प्रवर्त्तेरन् स्वभावतो गच्छेयुः, न तु प्रयत्नान्तरेण,—इति वा वर्णनीयम्। 'अवसानं जोषयेत'—इत्यनेन सम्बध्यते। यच्छब्दोऽयमुत्तरवाक्यगतः सामर्थ्यात् पूर्व्ववाक्यगतं तच्छब्दं नापेक्षते। एवमुत्तरत्रापि द्रष्टव्यम् ॥ ० ॥ ३ ॥ ० ॥

अक्षीरिण्योऽकण्टका अकटुका यत्रौषधयः स्युः ॥ ॥ ४ ॥

क्षीरमिव क्षीरं शुभ्रो निर्यासो भण्यते। क्षीरं विद्यते यासां ताः क्षीरिण्यः, ता न भवन्तीत्यक्षीरिण्यः,—अर्कादिभ्यो भिन्नाः,—इत्येतत्। अकण्टकाः, कण्टकरहिताः,—मदनादिभ्योऽन्याः। अकटुकाः। कटुकाः कटुगुणयुक्ताः, ता न भवन्तीत्यकटुकाः निम्बादिभ्यो भिन्नाः। कटुस्तिक्तम्। तदेवम्भूता ओषधयो यत्र यस्मिन् स्थाने, स्युः स्वभावतो भवेयुः ॥ ० ॥ ४ ॥ ० ॥

गौरपांसु ब्राह्मणस्य ॥ ५ ॥

गौराः शुक्लवर्णाः पांसवो रेणवो यस्मिन्, तत् गौरपांसु ब्राह्मणस्य, अवसानम्,—इति सम्बध्यते ॥ ० ॥ ५ ॥ ० ॥

लोहितपांसु क्षत्रियस्य ॥ ६ ॥

अवसानम् ॥ ० ॥ ६ ॥ ० ॥

कृष्णापांशु वैश्यस्य ॥ ७ ॥

अवसानम् ,—इत्येव ॥ ० ॥ ७ ॥ ० ॥

त्रैवर्णिकानां विशेषमभिधाय , अथेदानीं सामान्येनावसानं विशिनष्टि,—

स्थिराघातमेकवर्णमशुष्कमनूषरममरुपरिश्रितम-क्लिन्नम् ॥ ८ ॥

योऽङ्घ्रिभिरभिहन्यमानं यन्न विदीर्य्यते, तत् स्थिराघातम् । एकवर्ण-मभिन्नवर्णम् । यत्रोत्पद्यमाना ओषधयो न शुष्यन्ति, तदशुष्कम् । यत्रोप्तं बीजं न प्ररोहति, तदूषरमिरिणमित्यनर्थान्तरम् । तन्न भवतीत्यनूषरम् । यत्र दूरं खनद्भिरल्पमेवोदकमुपलभ्यते, तन्मरु-रित्युच्यते । तथा चोक्तम् ।

"द्वीपमुन्नतमाख्यातं शादा चैवेष्टका स्मृता ।
क्लिन्नं सजलं प्रोक्तं दूरखातोदको मरुः" ।

इति । मरुभूम्या सर्व्वतो वेष्टितं यत् स्थानं तन्मरुपरिश्रितम् । तत् न भवतीत्यमरुपरिश्रितम् । क्लिन्नं, सजलं स्थानम् । तत् न भवतीत्यक्लिन्नम् ॥ ० ॥ ८ ॥ ० ॥

पुनरपि विशेषेणावसानं विशिनष्टि,—त्रिभिः सूत्रैः ,—

दर्भसम्मितं ब्रह्मवर्चसकामस्य ॥ ९ ॥

ब्रह्मवर्चसं व्याख्यातम् । तत्कामस्य, दर्भसम्मितम्—दर्भैः कुशैः सम्यक् मीयते ज्ञायते परिच्छिद्यते वा यत् , तथाविधं,—दर्भयुक्त-

मित्येतत् । तथा च गृह्यान्तरम् । "यस्मिन् कुशवीरणप्रभूतम्"-- इति । वास्तुविद्याविद्भिरप्यभिहितम् ।

"कुशयुक्ता शरबहुला
दूर्व्वाकाशावृता क्रमेण मही" ।

इति । केचित् पुनरेतदविद्वांसो भाषन्ते,--'दर्भसम्मितं कुशनिर्म्मितम्'--इति ॥ ० ॥ ८ ॥ ० ॥

बृहत्तृणैर्बलकामस्य ॥ १० ॥

बृहत्तृणैर्वीरणशरादिभिः सम्मितं युक्तम् ॥ ० ॥ १० ॥ ० ॥

मृदुतृणैः पशुकामस्य ॥ ११ ॥

मृदुतृणैर्दूर्व्वादिभिः । सम्मितमिति वर्त्तते । सेयं त्रिसूत्री, यथाक्रमं ब्राह्मणक्षत्रियवैश्यानामवसानस्य विशेषणार्था । कथं ज्ञायते ? तथैव ब्रह्मवर्च्चस-बल-पशुकामनानामाम्नायेनोपपत्तेः । यथा चोक्तम् ।

"कुशयुक्ता शरबहुला
दूर्व्वाकाशावृता क्रमेण मही ।
अनुवर्णं वृद्धिकरी
मधुरकषायाम्लकटुका च" ।

इति ॥ ० ॥ ११ ॥ ० ॥

शादासम्मितम् ॥ १२ ॥

शादा,--इति, इष्टकामाहुः । कस्मात् ? देशान्तरप्रसिद्धेः । "शादा

चैवेष्टका स्मृता''--इतिवचनाच्च । तया सम्मितं तुल्यं--चतुरस्र-मित्यर्थः । अत्र, सम्मितम्--इति क्रियते, पूर्व्वस्मात् सम्मितशब्दा-देतस्य सम्मितशब्दस्यार्थभेदप्रज्ञापनार्थम् ॥•॥ १२ ॥•॥

मण्डलद्वीपसम्मितं वा ॥ १३ ॥

मण्डलं वर्त्तुलम् । द्वीपशब्देनोन्नतमुच्यते । कुतः ? ''द्वीपमुन्नत-माख्यातम्''--इति वचनात् । मण्डलञ्च तत् द्वीपञ्चेति मण्डल-द्वीपं, तत्सम्मितं तदाकारम् । वाशब्दो विकल्पार्थः । सम्मित-शब्दः पूर्व्ववत् ॥ • ॥ १३ ॥ • ॥

यत्र वा श्वभ्राः स्वयं खाताः सर्व्वतोऽभिमुखाः स्युः ॥ १४ ॥

यत्र यस्मिन् स्थाने वा, श्वभ्रा अवटाः, स्वयं खाताः--न तु कृत्रिमाः, सर्व्वतः सर्व्वासु दिक्षु विदिक्षु च, अभिमुखा इतरेत-राभिमुखाः, स्युः स्वभावतो भवेयुः । एतदनेनोक्तं भवति । सर्व्वत-उच्छ्रितं मध्यतश्च किञ्चिन्निम्नम्,--इति । यत्र किल दिशां विदिशाञ्च विचारणा नाभिप्रेयते, तत्र 'सर्व्वतः'--इति करोत्या-चार्य्यः । तथाच गृह्यासंग्रहः ।

''दिशाञ्च विदिशाञ्चैव यत्र नोक्ता विचारणा ।
सर्व्वतस्तत्र शब्दोऽयं विधियोगी निपात्यते'' ।

इति । एवं वा,--

सर्व्वतोऽभिमुखाः,--आभिमुख्येन सर्व्वदिग्विदिङ्मुखाः । एतदने-

नीतं भवति। मध्यतः किञ्चिदुन्नतम्, अभितश्च सन्नतम्। तथैवावटानां सर्व्वतोऽभिमुखत्वसम्भवात्। इयमपि विभूती यथाक्रमं ब्राह्मणक्षत्रियवैश्यानामवसानस्य विशेषणार्था,—इति केचित्। सामान्येनावसानस्य विशेषणार्था,—इत्यपरे ॥ ० ॥ १४ ॥ ० ॥

तत्रावसानं प्राग्द्वारं यशस्कामो बलकामः कुर्व्वीत ॥ १५ ॥

तत्र तस्मिन् स्थाने। अवस्यन्त्यस्मिन्,—इत्यवसानं गृहं प्राग्द्वारं कुर्व्वीत। कः? यशस्कामो बलकामः। यशस्कामो वा, बलकामो वा,—इत्यर्थः। तदत्र, "खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति",—इतिवद्विकल्पो बोद्धव्यः। कस्मात्? कामशब्दाभ्यासात्। यदि पुनरुभयकामोऽभिप्रेतः स्यात्, तर्हि यशोबलकामः,—इति कुर्य्यात्, अलं कामशब्दाभ्यासेन। तस्मात्, कामशब्दाभ्यासादवगच्छामः—विकल्पोऽयम्,—इति ॥ ० ॥ १५ ॥ ० ॥

उदग्द्वारं पुत्रपशुकामः ॥ १६ ॥

तत्रावसानं कुर्व्वीत,—इत्यनुवर्त्तते ॥ ० ॥ १६ ॥ ० ॥

दक्षिणाद्वारꣳ सर्व्वकामः ॥ १७ ॥

दक्षिणाद्वारं दक्षिणा नाम दिक्, तद्द्वारम्,—अवसानं कुर्व्वीत,—इत्यनुवर्त्तत एव। सर्व्वकामः,—इति, यत् किञ्चित् यशोबलादिकं कामयते, तत् सर्व्वमेतस्माद्भवतीत्यर्थः ॥ ० ॥ १७ ॥ ० ॥

न प्रत्यग्द्वारं कुर्व्वीत ॥ १८ ॥

पश्चिमद्वारमवसानं न कुर्व्वीत ॥ ० ॥ १८ ॥ ० ॥

अनुद्वारञ्च ॥ १९ ॥

अनु पश्चात् द्वारं यस्य, तदनुद्वारमवसानं न कुर्व्वीत। चकारो न कुर्व्वीतेत्यनुषङ्गार्थः। किमनेनोक्तं भवति ? एतदनेनोक्तं भवति। गृहाङ्गनाभिमुखमेव गृहद्वारं करणीयं न तु तद्वैपरीत्येन,—इति। अथवा। अनुद्वारमित्यनेन द्विद्वारं गृहं निषिध्यते। कथं नाम ? संमुखद्वारं पश्चाद्द्वारञ्च गृहं न करणीयम्,—इति ० ॥ १९ ॥ ० ॥

गृहद्वारम् ॥ २० ॥

अनुद्वारमवसानं न कुर्व्वीत,—इत्यनुवर्त्तते। गृहद्वारमनु लक्ष्यीकृत्य द्वारं यस्य, तथाविधमवसानं न कुर्व्वीत। अन्यगृहद्वाराभिमुखं गृहद्वारं न कुर्व्वीत,—इत्येतत्। तथा च वास्तुविद्याविद्भिरुक्तम्।

"द्वारगवाक्षस्तम्भैः कर्दमभित्त्यन्तकोणवेधैश्च।
नेष्टं वास्तुद्वारं विभ्रमनाक्रान्तमन्यैश्च"।

इति ॥ ० ॥ २ ॥ ० ॥

तथा च गृहद्वारं कुर्य्यात्;—

यथा न संलोकी स्यात् ॥ २१ ॥

यथा येन प्रकारेण गृहाभ्यन्तरे सन्ध्योपासन-होम-भोजनादिक्रियां

कुर्व्वाणो गृहपतिर्न पतित-श्व-चण्डालादीनां संलोकी-आलोकी स्यात् भवेत् । 'संलोकि'—इति पाठे, गृहमध्यगतं धनादिकं यथा न वहिःस्थितस्य जनस्य संलोकि, आलोकनगम्यं स्यात्, —इति वर्णनीयम् ॥ ० ॥ २१ ॥ ० ॥

वर्ज्जयेत् पूर्व्वतोऽश्वत्थं प्लचं दक्षिणतस्तथा ।
न्यग्रोधमपराद्देशादुत्तराच्चाप्युदुम्बरम् ॥ २२ ॥

प्लचो जटी पर्कटीत्यनर्थान्तरम् । न्यग्रोधो वटः । अपरः पश्चिमः । स्पष्टमन्यत् ॥ ० ॥ २२ ॥ ० ॥
किं पुनरेतैरेतासु दिक्षुवस्थितैर्भवति ? उच्यते,—

अश्वत्थादग्निभयं विद्यात् प्लचाद्ब्रूयात् प्रमायुकान् ।
न्यग्रोधाच्छस्त्रसंपीड़ामच्यामयमुदुम्बरात् ॥ २३ ॥

अश्वत्थात्—पूर्व्वतः स्थितात् । प्लचात्—दक्षिणतः स्थितात् । प्रमायुकान्,—प्रकर्षेण कृशान्,अल्पायुषः,—इत्येतत् । मायुकः, —इति निघण्टौ कृशनामसु चतुर्थं पदम् । प्रमायुकान् प्रकृष्ट-पित्तान्,--इति केचित् । न्यग्रोधात्--पश्चिमतःस्थितात् । अच्या-मयमचिरोगम् । उदुम्बरादुत्तरतः स्थितात् ॥ ० ॥ २३ ॥ ० ॥

आदित्यदेवतोऽश्वत्थः प्लचो यमदेवतः ।
न्यग्रोधो वारुणो वृचः प्राजापत्य उदुम्बरः ॥ २४ ॥

ऋजुरचरार्थः । प्लचो यमदेवतः,--इत्यत्रैकाचरन्यूनतायामपि न छन्दोभङ्गदोषश्चोदयितव्यो भवति । भवति चात्र माघ-

थम्। "न ह्येकस्मादश्वत्थादिरोधयन्ति"—इति। देवताकीर्त्तन-मुत्तरार्थम् ॥ ० ॥ २४ ॥ ० ॥

यदि पुनः पूर्व्वादिष्वश्वत्थादयः स्युः, तदा किं कुर्य्यात् ?,—इत्य-पेक्षायामाह,—

तानस्वस्थानस्थान् कुर्व्वीत ॥ २५ ॥

तानश्वत्थादीन् पूर्व्वादिष्ववस्थितान् अस्वस्थानस्थान् कुर्व्वीत। स्वेषु पूर्व्वोक्तेषु स्थानेषु तिष्ठन्ति,—इति स्वस्थानस्थाः, न स्वस्थानस्थाः अस्वस्थानस्थाः, तथाविधान् कुर्व्वीत। यथा ते स्वस्थानेषु पूर्व्वादिषु न तिष्ठन्ति, तथा कुर्य्यादिति यावत्। तथाकरणञ्च च्छेदनादुद्धर-णाद्वा बोद्धव्यम्। तत्र चोत्तरसूत्रोक्तो विशेषो द्रष्टव्यः।

"तान् स्वस्थानस्थान् कुर्व्वीत"—इति पाठे, तानश्वत्थादीन् स्वस्थानस्थान् स्वेषु स्थानेषु स्थितान् कुर्य्यादिति व्याख्येयम्। यस्मात् पूर्व्वादिष्ववस्थितेष्वश्वत्थादिषु अग्निभयादिकं, स्वस्थान-स्थितेष्वभ्युदयः, तस्मात्तान् स्वस्थानस्थितान् कुर्व्वीत,—स्वेषु स्थानेषु रोपयेदित्यर्थः। आह। कानि पुनरमीषां स्वस्थानानि ? पूर्व्वविपरीतानि,—इति ब्रूमः। कस्मात् ? वास्तुविद्याविदां वच-नात्। तथा चोक्तम्।

"याम्यादिष्वशुभफला-
जातास्तरवः प्रदक्षिणेनैते।
उदगादिषु प्रशस्ताः
प्लक्षवटोदुम्बराश्वत्थाः"।

इति।

"भवनस्य वटः पूर्व्वे जातः स्यात् सार्व्वकामिकः।
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः।
प्लक्षश्चोत्तरतो धन्यो विपरीतो विपर्य्यये"।

इति चैवमादि ॥ ० ॥ २५ ॥ ० ॥

यदा खल्वेतानश्वत्थादीनुद्धरेत् च्छेदयेद्वा, तदा तद्दोषशान्त्यर्थम्,—

एताश्चैव देवता अभियजेत ॥ २६ ॥

एता अनन्तरोक्ता देवता अभियजेत। एवशब्दात् यं वृक्षमुद्धरेत् च्छेदयेद्वा तस्यैव देवतामभियजेत, न पुनः सर्व्वाः। चशब्दः पूर्व्वोक्तकल्पेन सम्बन्धकरणार्थः। सम्बन्धकरणस्य प्रयोजनम्,—यदा खल्विमे अस्वस्थानस्थाः क्रियन्ते, तदैवायं कल्पो यथा स्यात्,—इति। वृत्ते चैवं सम्बन्धकरणे, एवशब्दः पूर्व्वोक्तप्रकारेण विशेषबोधको द्रष्टव्यः। अथवा। चशब्दः च्छेदनपक्षे मनूक्तप्रायश्चित्तान्तरानुसन्धानार्थः। कथं नाम? एता देवताश्च अभियजेत, ऋचश्च जपेत्,—इति। तथाच मनुः।

"फलदानाञ्च वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम्"।

इति। कल्पान्तरसमुच्चयार्थमपि चशब्दं वर्णयन्ति। कथं नाम? यदि तानस्वस्थानस्थान् न कुर्य्यात्, तदा,—

"छिन्द्याद् यदि न तरूंस्तान्
तदन्तरे पूजितान् वपेदन्यान्।
पुन्नागाशोकारिष्ट-
वकुलपनसान् शमीशालौ"।

इति वास्तुविद्याविदुक्तं कुर्य्यात्,—इति। तदिदं कल्पान्तरं चशब्देन समुच्चीयते,—इति मन्यन्ते ॥ ० ॥ २६ ॥ ० ॥

मध्येऽग्निमुपसमाधाय कृष्णया गवा यजेत ॥ २७ ॥

मध्ये प्रकृतस्य गृहस्याभ्यन्तरे, न तदर्थपरिगृहीताया भूमेः। कथं ज्ञायते ? सन्निहितपरित्यागे व्यवहितपरिग्रहे च कारणविशेषस्याभावात्। "पूर्व्वैः प्रोष्ठपदैर्गृहेऽग्निं प्रतिष्ठाप्य"—इति च सामविधाने ब्राह्मणे दर्शनात्। अग्निम् उपसमाधाय,—इत्युक्तार्थम्। कृष्णया कृष्णवर्णया गवा यजेत। सेयं स्त्रीगवी अभिप्रेता,—इत्यवगच्छामः। कस्मात् कारणात् ? कृष्णया,—इति स्त्रीलिङ्गनिर्देशात् ॥ ० ॥ २७ ॥ ० ॥

अजेन वा श्वेतेन ॥ २८ ॥

यजेत,—इत्यनुवर्त्तते। ऋजुरक्षरार्थः। वाशब्दाद् गोरभावे सत्ययं कल्पो बोद्धव्यः ॥ ० ॥ २८ ॥ ० ॥

किं केवलया गवा ? केवलेन वा अजेन ? न। कथन्तर्हि ?,—

सपायसाभ्याम् ॥ २९ ॥

पयसि भवश्चरुः पायसः। तत्सहिताभ्यां गोऽजाभ्यां यथालाभमन्यतरेण यजेत। लाघवं चिकीर्षुः खल्वाचार्य्यः, सपायसाभ्याम्,—इति सूत्रयाञ्चकार, न पुनर्गोऽजयोः साहित्यप्रतिपिपादयिषया। कथं ज्ञायते ? अजेन वा,—इति वाशब्देन तयोर्विकल्पप्रतिपादनात् ॥ ० ॥ २९ ॥ ० ॥

गोरजस्य चालाभे,—

पायसेन वा ॥ ३० ॥

केवलेन यजेत। तदत्र, पशुप्रोक्षणे निर्वापे च, वास्तोष्पतये त्वा,—इति देवतानिर्देशः स्यात्। कुतः ? समाख्यानात्। देवदेवत्यत्वात् 'जातवेदोवपया गच्छ देवान्'—इति वपाहोममन्त्रः स्यात्। केवलपायसपक्षे तु, वपाया अभावात् वपाहोमस्य लोप एव स्यात्। अवदानानि तत्र चतुर्दशैवावदेयानि। कुतः ? वाममसक्थिक्लो-मोरस्त्रापवादाभावात् ॥ ० ॥ ३१ ॥ ० ॥

ततश्च प्रकृतिवत् पायसमांसचरू श्रपयित्वा,—

वसामाज्यं माꣳसं पायसमिति संयूय ॥ ३१ ॥

वसाम्,—इति शृतावदानमांसयूषमाहुः। तद्धि वसासम्पृक्तं भवति। शृते खलु मांसे निर्गच्छन्ती वसा यूषेणैव मिश्रीभवति न पृथगुपलभ्यते। आह। एतस्मात् लिङ्गात् पूर्व्वमेव वसां पृथ-गुद्धरिष्यामः ? न,—इत्युच्यते। कुतः ? कल्पनागौरवापत्तेः। प्रमाणविशेषस्य चाभावात्। तस्मात्, चरुद्वयस्यैव श्रवणमात्रादव-गतेरन्यथोपपन्नं लिङ्गं न चर्व्वन्तरमनुमापयति,—इत्याख्येयम्। दृश्यते खल्वन्यत्रापि तत्सम्बन्धात्ताच्छब्द्यम्;—दण्डयोगाद्दण्डः पुरुषः,—इत्येवमादौ बहुलम्।

सूत्रशेषमिदानीं वर्ण्यते। आज्यं व्याख्यातम्। मांसं पश्ववदा-नमांसम्। पायसं पूर्व्वोक्तम्। 'इति' एतानि चत्वारि, संयूय,—"यु मिश्रणे,"—इति स्मरणात् सम्यक् मिश्रयित्वा।

कर्म्मक्रमस्तु,—अवदानानि पायसञ्च श्रपयित्वा, कंसेऽवदान-

रसमवासिच्य, स्वस्तरेऽवदानानि कृत्वा, नवायां सूनायामण्ड-मच्छेदयित्वा, कंसपात्रे चासन्य, वसादिभिः सह संमिश्रयेत्, —इति ॥ ० ॥ ३१ ॥ ० ॥

ततश्च,—

अष्टगृहीतं गृहीत्वा जुहुयात् ॥ ३२ ॥

अष्टगृहीतं गृहीत्वा अष्टकृत्वो गृहीतं कृत्वा,—इत्येतत्। कस्मात् अष्टगृहीतं गृहीत्वा? संमिश्रितात्,—इत्याह। कुतः? मिश्रणस्य तदर्थत्वात्। पूर्व्वं च तथैव दृष्टत्वात्। अत च, मध्यात् पूर्व्वार्द्धादिति प्राकृतो धर्म्मो निवर्त्तते। कस्मात्? वैकृतस्य विशेषोपदेशस्यार्थवत्त्वात्। भृगूणामपि नात्र कश्चिद्विशेषः। एवमेके। अन्ये त्वाहुः,—"सन्नीतस्य मध्यपूर्व्वार्द्धाभ्यां त्रिः ग्रहणात् षड़वदानानि भवन्ति, भृगूणान्तु मध्यपूर्व्वार्द्धपश्चार्द्धेभ्यो द्विः ग्रहणम्—तेन षडेव भवन्ति, पुरस्ताच्चोपरिष्टाच्चाज्यस्य, एवमष्टगृहीतं भवति"—इति। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्। अवदानस्थानमत्रापि प्रत्यक्षयेत्। कुतः? "प्रत्यनक्त्यवदानस्थानानि"—इत्यविशेषेणोपदेशात्। तद्बाधे च कारणविशेषस्याभावात् ॥ ॥ ० ॥ ३२ ॥ ० ॥

जुहुयात्,—इति सामान्यत उक्तम्, अथेदानीं तत्रैव विशेषोऽभिधीयते,—

वास्तोष्पत इति प्रथमा ॥ ३३ ॥

वास्त्रोष्पते,--इति मन्त्रेण प्रथमा आहुतिर्होतव्या । अत्र किञ्चि-
द्वक्तव्यमस्ति । परस्तात् तद्वक्ष्यामः ॥ ० ॥ ३३ ॥ ० ॥

वामदेव्यर्चः ॥ ३४ ॥

तिस्रः । ताभिः तिस्र आहुतयो होतव्याः ॥ ० ॥ ३४ ॥ ० ॥

महाव्याहृतयः ॥ ३५ ॥

तिस्र एव । ताभिरपि तिस्र एवाहुतयो होतव्याः ॥०॥ ३५ ॥०॥

प्रजापतय इत्युत्तमा ॥ ३६ ॥

प्रजापतये स्वाहा,--इत्यनेन मन्त्रेण उत्तमा अन्त्या आहुतिर्होतव्या । आह । निर्देशबलादेव प्रथमोत्तमत्वे सिद्धे, प्रथमा,—इति उत्तमा, —इति चावाच्यमिति चेत् । न । अर्थवत्त्वात् । कः पुनरर्थः ? उच्यते । अनयोः प्रथमोत्तमत्वमभिदधानः खल्वनयोरेवाहुत्योश्चरु-भागाभिसम्बन्धं ज्ञापयत्याचार्य्यः, न सर्व्वासामाहुतीनाम् । तस्मात्, 'वामदेव्यर्चः' 'महाव्याहृतयः'—इत्यन्तरालसूचिताः षडाहुतय आज्येनैव स्युः, न चरुणा । तथा चोक्तम् ।

> 'आज्ययुज्यां तथा कुर्य्यां यज्ञकर्म्मणि याज्ञिकाः ।
> यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते ।
> द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः ।
> शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत्" ।

इति । सोऽयमर्थः । रघुनन्दनादयस्त्वेतदजानन्तः सर्व्वा एव चर्व्वाहुतीरिच्छन्ति । तदशास्त्रम् । तत्र द्वे एव चर्व्वाहुती अष्ट-

गृहीतेन भवतः। अन्तरालवर्त्तिन्यः षडाज्याहुतयस्तु सकृद्-गृहीतेनैवेति ॥ ० ॥ ३६ ॥ ० ॥

हुत्वा दश बलीन् हरेत् ॥ ३७ ॥

ऋजुरक्षरार्थः। अभिधानादेव प्राप्तत्वात् हुत्वा,—इत्येतदवाच्य-मिति चेत्। न। सम्बन्धकरणार्थत्वात्। हुत्वा,—इति पुनर्व्वचनं खलु होमबलिहरणयोः सम्बन्धकरणार्थम्। सम्बन्धकरणस्य च प्रयोजनम्,—होमशेषेणैव बलिहरणं यथा स्यात्,—इति। अथ वा। हुत्वा,—इत्येतदवचने, 'प्राक् स्विष्टकृत आवापः'—इति सूत्र-णात् उपन्यासक्रमाच्च स्विष्टकृद्धोमादर्व्वागेव बलिहरणम्,—इत्यपि कदाचिदाशङ्का स्यात् कस्यचिदिति, हुत्वा,—इत्याह। कथं नाम? स्विष्टकृदादिकमपि हुत्वा बलीन् हरेत,—इति। अन्ये त्वाहुः। "कर्म्मापवर्गविहितं वामदेव्यगानमिदानीं माभूदित्यतः, हुत्वा,—इति वचनम्। कथं नाम? हुत्वा बलीन् हरेत् ततो-वामदेव्यं गायेत्"—इति।

ननु, दश,—इत्यपि अनर्थकम्, दशानामेवोपरिष्टादुपदेशात् अन्तरेणाप्येतद्वचनं, बलीनां दशत्वं लभ्यत एव। उच्यते। "प्रा-च्यूर्द्ध्वावाचीभ्योऽहरहर्नित्यप्रयोगः"—इति सूत्रयिष्यमाणत्वादस्मिन् कर्म्मणि अनित्यत्वमपि तेषां कश्चिदाशङ्कीत। अतस्तन्निरासार्थं दश, —इति सूत्रयाञ्चकार। अथ वा। "प्रजापतये स्वाहेति मध्य उप-हरेत्"—इति सामविधानब्राह्मणे एकादशानां बलीनां हरण-दर्शनात् अत्रापि मध्यतोऽप्यधिकं बलिहरणं स्यादितीमामधिका-

शङ्कामपनेतुं दश,—इत्याह। दशैवात्र बलयो भवन्ति न पुनः सामविधानवदेकादश। प्रजापतये स्वाहा,—इति होम एवात्र स्यात् न बलिः,—इत्यभिप्रायः। न चैवं ब्राह्मणविरोधः,—इति शङ्कनीयम्। तस्मात् कल्पात् कल्पान्तरत्वादेतस्य। अत एव होमेऽपि तत्र विशेषः श्रूयते। स च तत्रैवानुसन्धेयः। तस्मात्, ब्राह्मणं श्रौताग्निविषयं कल्पान्तराभिप्रायं वा,—इत्याख्येयम् ॥ ० ॥ ३७ ॥ ० ॥

अथेदानीं क्व बलयो हर्त्तव्याः? कथञ्च?—इत्येतद्वक्तव्यम्। तदुच्यते—

प्रदक्षिणं प्रतिदिशम् ॥ ३८ ॥

बलीन् हरेत्,—इत्यनुवर्त्तते। ऋजुरक्षरार्थः। अथ, प्रदक्षिणम्, —इत्येतदवाच्यम्? ननु वक्ष्यमाणदेवतोपदेशसूत्रादेव प्रादक्षिण्यस्य सिद्धेः। नैष दोषः। कस्मात्? यस्मात् प्रक्रतस्याग्नेः प्रादक्षिण्येनात्र बलिहरणमित्येतत्प्रतिपिपादयिषया प्रदक्षिणमित्याह। अन्यथा कर्त्तुरेव प्रादक्षिण्यं स्यात् ॥ ० ॥ ३८ ॥ ० ॥

किं केवलासु दिक्षु? न। क्व तर्हि?—

अवान्तरदेशेषु ॥ ३९ ॥

बलीन् हरेत्,—इत्यनुवर्त्तत एव। चशब्दोऽत्र लुप्तवत् द्रष्टव्यः। अवान्तरदेशेषु च बलीन् हरेदित्यर्थः। दिशोर्दिशोरन्तरालमवान्तरदेशः,—इत्याख्यायते ॥ ० ॥ ३९ ॥ ० ॥

अथेदानीं, कथं बलीन् हरेत्?,—इत्येतत् वक्तुमारभते,—

आनुपूर्व्व्येणाव्यतिहरन् ॥ ४० ॥

पूर्व्वं पूर्व्वमनु,—इत्यनुपूर्व्वम्, तस्य भाव आनुपूर्व्व्यम्, तेन आनुपूर्व्व्येण, बलीन् हरेत्,—इत्यनुवर्त्तत एव। किं कुर्व्वन्? अव्यतिहरन्। व्यतिहारमकुर्व्वन्। व्यतिहारो व्यत्यासः पौर्व्वापर्य्यविपर्य्ययः,—इत्यनर्थान्तरम्।

कस्य पुन र्व्यतिहारो निषिध्यते? आनुपूर्व्व्यस्येत्याह। कुतः? सन्निधानात्। मन्त्राणाम्,—इति च प्रतिपद्यामहे। कस्मात्? तेषामपि बौद्धसन्निधानस्य सम्भवात्। न वक्तव्यं तर्हि? ननु विधानसामर्थ्यादेव व्यतिहारो न भविष्यति, अथोच्यते;—कारणं वक्तव्यम्। आदरार्थम्,—इति ब्रूमः। आह। ननु सूत्रमेवैतदवाच्यं पूर्व्वसूत्राभ्यामुत्तरसूत्रेण चैतस्य गतार्थत्वात्। उच्यते। नैष दोषः। कस्मात्? सामान्यतोऽभिहितस्य विशेषकथनस्यापुनरुक्तत्वात्। लेखशैली खल्वियमाचार्य्याणाम्। ते खल्वादितः सामान्येनाभिधाय पुनस्तदेव विशेषेणाभिदधते। सोऽयमलङ्कारो न दोषः।

एतस्मिन् खल्वनुक्ते पूर्व्वसूत्रद्वयक्रमानुरोधान्मन्त्रान् विहृत्य किमादितः सर्व्वासु दिक्षु बलिहरणं ततोऽवान्तरदेशेषु? उत उत्तरसूत्रानुसारात्तदुक्तेनैव क्रमेण? उताहो उभयत्रापि पाठक्रमस्याविशेषात् विकल्पः?,—इति कदाचित् शिष्या मुह्येयुः, अतः परमकारुणिक आचार्य्यः सूत्रमिदं रचयाञ्चकार।

ननु तथापि न ज्ञायते;—प्राचीनस्य पराचीनस्य वा क्रमस्यानुपूर्व्व्यमत्राभिप्रेतम्,—इति। पराचीनस्य,—इत्याह। कुतः? यतः प्राचीनस्य क्रमस्यानुपूर्व्व्ये खल्वभिप्रेयमाणे मन्त्राणां व्यतिहारः

स्यात्। तच्चानिष्टम्। उत्तरसूत्रतात्पर्य्यपर्य्यालोचनाच्चैवमवगच्छाम:। यदि तावत् प्राचीनस्य क्रमस्यानुपूर्व्यमिहाभिमतमभिविष्यत्, नूनमुत्तरत्र पुरस्तात्,—इति, अवान्तरदेशे,—इति चैवमादि-देशकीर्त्तनं नाकरिष्यत्। अकार्षीच्चाचार्य्य:। तस्मादवगच्छाम:,—न प्राचीनस्य क्रमस्यानुपूर्व्यमिह प्रतिपिपादयिषितम्,—इति।

अथ, तथाप्युत्तरसूत्रे देशकीर्त्तनमनर्थकम्;—ननु मन्त्राणां व्यतिहारनिषेधादेव प्राचीनस्य क्रमस्यानुपूर्व्यमत्र न भविष्यति,—इत्युक्तम्। सत्यमुक्तम्। तत् खल्वेतदुत्तरसूत्रे देशकीर्त्तने सति शक्यते वक्तुम्। न पुनरन्यथा। कथम्? देशकीर्त्तनबलात्तत्तद्देशानामेव बलीनां ते ते मन्त्रा: भवन्ति। तत्रादितो दिक्षु, ततो-विदिक्षु च बलिहरणे मन्त्राणां व्यतिहारोऽवर्ज्जनीय: स्यात्। देशकीर्त्तनस्य खल्वभावे, तत्तद्देशानामेव बलीनां ते ते मन्त्रा:,—इत्यत्र कारणविशेषाभावात् यथापठितैरेव मन्त्रैरादितो दिक्षु ततो विदिक्षु बलिहरणोपपत्तौ व्यतिहारस्य वक्तुमशक्यत्वात्,—इत्यस्तु किं विस्तरेण॥ ०॥ ४०॥ ०॥

यस्यानुपूर्व्यस्य येषाञ्च मन्त्राणां व्यतिहारो निषिद्ध:, त इदानीमभिधीयन्ते; देवताश्च बलीनाम्,—

इन्द्रायेति पुरस्ता द्वायव इत्यवान्तरदेशे यमायेति दक्षिणत: पितृभ्य इत्यवान्तरदेशे वरुणायेति पश्चान्महाराजायेत्यवान्तरदेशे सोमायेत्युत्तरतो महेन्द्राये-त्यवान्तरदेशे वासुकय इत्यधस्ताद्‌ब्रह्मणे नमो ब्रह्मण इति दिवि॥ ४१॥

ऋजुरक्षरार्थः। अधस्तादिति नीचैर्दानमुपदिशति। ऊर्द्ध्वमिति ब्रह्मबलावन्वेति। ऊर्द्ध्वम्,—इति ऊर्द्ध्वमुत्क्षिप्य दानार्थम्। दिवि,—इति दिवं मनसि निधाय निक्षेपार्थम्। बलिहरणमन्त्राणामामीषामन्ते नमस्कारः स्यात्। कुतः?

"अमुष्मै नम इत्येवं बलिदानं विधीयते।
बलिदानप्रदानार्थं नमस्कारः कृतो यतः"।

इति प्रकृतौ तथादर्शनात्। पितृभ्यः,—इत्यत्र चान्ते स्वधाकारः स्यात्। कस्मात्?

"स्वधाकारेण निनयेत् पित्र्यं बलिमतः सदा"।

इति वचनात्। ब्रह्मबलौ तु यावदुक्तत्वादादित एव नमस्कारः स्यात्। विशेषवचनस्य खल्वर्थवत्त्वार्थं सामान्यवचनस्योपरोध इष्यत एव। न च विकल्पः, अतुल्यबलत्वात्। सामान्यविशेषयोर्विकल्पस्य क्वचिदप्यदर्शनात्। उपजीव्यश्च खल्वाचार्यः कात्यायनस्य,—इति नैतदन्यथयितुं शक्यम्। सामविधानब्राह्मणेऽप्येवमेवैतत् समाम्नायते,—इति नात्र विकल्पो युक्तः कल्पयितुम्। अपरे पुनरेतदविद्वांसो भाषन्ते,—"ब्रह्मणे,—इत्यत्रान्ते नमस्कारः स्यात्। कुतः? प्रकृतौ तथा दृष्टत्वात्। यथोपदेशं वा स्यात्। उपदेशसामर्थ्यात्। एवञ्चेत्, विकल्पः, तुल्यबलत्वात्"—इति। सुभूमिकरणमुभयतश्चाद्भिः परिषेकश्च प्रकृतिवदत्रापि कर्त्तव्यः॥०॥ ४१॥

प्राच्युदग्वाचीभ्योऽहरहर्नित्यप्रयोगः॥ ४२॥

प्राच्युदग्वाचीभ्यः,—तत्तद्दिग्देवताभ्यः,—इत्येतत्। अवाची खल्वि-

ह्राधोदिगभिप्रेयते। कथं ज्ञायते ? तद्वलेरवाचीनं दीयमानत्वात्। सन्निहितपठितस्योर्द्ध्वस्य वैपरीत्याच्च। तथाच नित्यबली कर्म्मप्रदीपः। "इन्द्राय वासुकये ब्रह्मणे"--इति। एताभ्यः खलु देवताभ्योऽहरहः प्रत्यहं, नित्यप्रयोगः,--नित्यमवश्यं प्रयोगोऽनुष्ठानं कर्त्तव्यः बलीनाम्। एताभ्यो देवताभ्यः प्रत्यहं बलिहरणमवश्यं कर्त्तव्यमित्यर्थः। तदिदं प्रसङ्गादत्र सूत्रितम्। अहरहरिति प्रत्यहकरणार्थम्। नित्यपदमावश्यकत्वार्थम्। क्रमश्च पूर्व्वसूत्रोक्त एव स्यात्। वैपरीत्ये कारणाभावात्। क्रमभेदः खल्विहोर्द्ध्ववैपरीत्येनावाचीग्रहणार्थः,--इत्यवोचाम। स्वहस्तितः खल्वयमेव क्रमः कर्म्मप्रदीपकृता। अभिहितञ्चैतत् सर्व्वमस्माभिरधस्तात्,--"अथ संस्तूपं स रक्षोजनेभ्यः"--इत्यत्र ॥ ० ॥ ४२ ॥ ० ॥

प्रासङ्गिकमभिधाय प्रकृतमेव पुनरनुवर्त्तामहे,--

संवत्सरे संवत्सरे नवयज्ञयोर्वा ॥ ४३ ॥

वाशब्दस्योभयत्रान्वयः कर्त्तव्यः। नवयज्ञयोः,--इत्येतदपि वीप्सितं द्रष्टव्यम्। तेनायमर्थः। संवत्सरे संवत्सरे वा नवयज्ञयोर्नवयज्ञयोर्वा नित्यप्रयोगः,--इत्यनुवर्त्तते। नवयज्ञयोरिति द्विवचनकरणात् व्रीहियवयज्ञयोरिति बोद्धव्यम्। श्यामाकयज्ञस्य तु वनस्थविषयत्वादिह नोल्लेखः।

आह। कस्य नित्यप्रयोगः ? यथोक्तस्य कर्म्मणः,--इत्याचक्ष्महे। कस्मात् ? "अध्यन्तं प्रधानगामि"--इति वचनात्। तथाच सामविधाने ब्राह्मणे। "अथातो वास्तुशमनम्"--इत्येतस्मिन् प्रक-

रणे, "बहुपशुधनधान्यहिरण्यमायुष्मत्पुरुषं वीरसूः सुभगा अविधवस्त्रीकं शिवं पुण्यं वास्तु भवति, चतुर्षु मासेषु प्रयोगः संवत्सरे वा पुनः प्रयोगः"—इत्याम्नातम्। तस्मात्,—प्रकृतस्य बलित्रयस्य प्रयोगः,—इत्यसङ्गतैषा वर्णना। मामविधाने खल्वहरहर्बलित्रयस्योपदेशविरहात् प्रकृतस्यैव कर्म्मणः पुनः प्रयोगोऽवगम्यते। तस्मादिहापि तथैव वर्णयितुमुचितम् ॥ ० ॥ ४३ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य सप्तमी खण्डिका समाप्ता ॥ ० ॥

चतुर्थप्रपाठके अष्टमी खण्डिका।

अथ श्रावण्याग्रहायणीकर्म्मणोरक्षताञ्छिष्ट्वा ॥ १ ॥

व्याख्याते श्रवणाग्रहायणीकर्म्मणी। तयोः कर्म्मणोः, अक्षतान् यवान् शिष्ट्वा,—अवशिष्टान् कृत्वा उर्व्वरितान् कृत्वा,—इत्येतत्। अक्षतान्,—इति वचनादासादितानां यवानां मध्यात् पूर्व्वमेव भर्ज्जनादवशेषः कर्त्तव्यः, न भर्ज्जनात् परतः। कुतः? अनक्षतत्वात्तेषाम्। तथा चोक्तम्।

"अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते"।

इति। शिष्ट्वा,—इति करणाच्च, एतत्कर्म्मकरणार्थमक्षतानामवशेषः करणीयः, न तु यदि दैवादक्षताः शिष्यन्ते, तदैवैतस्य कर्म्मणः करणम्,—इत्युपदिशति ॥ ० ॥ १ ॥ ० ॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधाय द्वये राक इत्येकैकयाऽञ्जलिना जुहुयात् ॥ २ ॥

प्राङ्मुखो वा उदङ्मुखो वा ग्रामान्निष्क्रम्य निर्गत्य। सन्निधानातिरेकात् निष्क्रमणस्यैव नियमो न चतुष्पथस्य। चतुष्पथः प्रसिद्धः। तस्मिन् 'अग्निमुपसमाधाय'—इत्युक्तार्थम्। द्वये राके,—इति चतस्र ऋचोऽभिप्रेताः। तासामेकैकया ऋचा, अञ्जलिना—व्याको-

णीकृतेन पाणिद्वयेन जुहुयात् ;—प्रकृतानक्षतान्। अथ, अग्नि-मुपसमाधाय,—इत्येतदवाच्यम् ; ननु जुहोतिचोदनया खल्वेतत् प्राप्नोति। न,—इत्याह। कस्मात् ? यस्मादग्निमुपसमाधाय,—इत्येतदवचने चतुष्पथे खल्वसौ होमः स्यात् उदकद्रवाक्षततण्डुलानाम्। तस्मादेतदुच्यते। चिप्रहोमन्यायेन खल्वयं होमः स्यात्। तत्प्रज्ञापनार्थं चाग्निमुपसमाधायेत्युच्यते। कथं नाम ? अग्नि-मुपसमाधायैव जुहुयात्, न तु परिसमूहनादिकमपि कृत्वा,—इति ॥ ० ॥ २ ॥ ० ॥

प्राङुत्क्रम्य वसुवन एधीत्यूर्द्ध्वमुदीक्षमाणो देव-जनेभ्यः ॥ ३ ॥

प्राङ् प्राङ्मुखः, उत्क्रम्य अग्नेः सकाशात् कतिचित् पदानि गत्वा। वसुवन एधि,—इति यजुषा त्रिरभ्यस्तेन,—इत्यर्थः। कुतः ? पठ्यमानमन्त्रकाण्डे तथैवैतस्य यजुषः पाठात्। ऊर्द्ध्वम् उपरिष्टात्। उदीक्षमाणः ऊर्द्ध्वमवलोकयन्, देवजनेभ्यः देवजनानुद्दिश्य। प्रकृतानामक्षतानामञ्जलिमुत्सृजेत्,—इति सूत्रशेषः। "ऊर्द्ध्वम्"-इति पदस्योत्सर्गेण संबन्धो न तु ईक्षणेन। कथं ज्ञायते? उदीक्षमाणः,—इति उदुपसर्गेणैव तदवगतेरनर्थकत्वापत्तेः।

इदमिदानीं सन्दिह्यते। वसुवन एधि,—इत्येतद्यजुः किमुत्क्रमणेन संबध्यते, आहोस्विदुदीक्षणेन, उताहो उत्सर्गेण ?—इति। उत्क्रमणेन,—इति केचित्। तदसङ्गतम्। कस्मात् ? यस्मादेवं सति अक्षताञ्जलिरमन्त्रकः स्यात्। तच्चानिष्टम्। "द्रव्यत्यागो न

निर्देव:"—इति स्मरणात्। अन्यथाऽस्य प्रधानसंबन्धसिद्धान्तोऽप्येवमुपरुध्येत। अतएव, उदीचमेन संबन्धः,—इत्यपि नाद्रियामहे। अपरे तु,—देवजनेभ्यः,—इति चतुर्थीनिर्देशादयमेव नमस्कारान्तो, बलिमन्त्रः,—इति मन्यमानाः,—वसुवन एधीति मन्त्रस्योत्क्रमणेन संबन्धम् इच्छन्ति। तदप्यसुन्दरम्। कस्मात् कारणात्? इतिकरणाभावात्। एवं खल्वभिप्रेयमाणे, "इन्द्रायेति पुरस्तात्"—इत्येवमादिवत्, देवजनेभ्यः,—इत्यत्रापि इतिः क्रियेत। तदकारणादवगच्छामः,—नायं बलिमन्त्रः,—इति। तस्मादुत्सर्गेणैव यजुषः संबन्धः। तथा चोक्तम्।

"ऊर्द्ध्वं वस्विति मन्त्रेण देवेभ्योऽस्येत् यथाञ्जलिम्।

तर्पयेद्देवजनेभ्यश्च प्राञ्चमन्यद् यथाविधि"।

इति। उत्क्रमणमुदीचनञ्च द्वयमपि मन्त्रानुपदेशाद् व्याहृतियोगेन स्यात्। तूष्णीमिति केचित्।

अत्राह। ननु आग्नेयमिदं यजुः 'वसुवन एधि'—इति। तथाचाग्नेयेन यजुषा देवजनेभ्यो बलिर्दीयते इत्यनुपपन्नमिव प्रतिभाति। नायं दोषः। "ऐन्द्र्या गार्हपत्यमुपतिष्ठेत"—इतिवद्वचनादुपपत्तिसम्भवात्। तथा चोक्तम्। "किमिव हि वचनं न कुर्य्यात् नास्ति वचनस्यातिभारः"—इति। अपिच। देवजनार्थमग्नेरध्येषितत्वात् नात्रानुपपत्तिशङ्काऽवसरः। अयं खल्वर्थोमन्त्रस्य। वस्विति धननाम। वन सम्भक्तौ। हे अग्ने, त्वमस्मिन् कर्म्मणि वसुवनः धनसंविभागशीलः एधि भव। योऽयमस्मत्तबलिर्मया दीयते, तं विभज्य यथायोग्य देवजनेभ्यः प्रापय इति। प्रसिद्धं ह्यग्नेर्देवानां हव्यप्रापकत्वम्। तस्मात् सर्व्वमुपपद्यते॥ ०॥ ३॥ ०॥

तिर्य्यङ्ङितरजनेभ्योऽर्व्वाङवेक्षमाणः ॥ ४ ॥

तिर्य्यङ् तिरश्चीनं यथा भवति, तथा,—इति क्रियाविशेषणमेतत्। अथवा। "प्राश्नमन्यद् यथाविधि"—इति वचनात् प्राश्नमेतं बलिं हरेत्। ततश्च एवं व्याख्यायते। तिर्य्यङ् तिरश्चीनः सन्, इतरजनेभ्यः अक्षताञ्जलिमुत्सृजेत्। प्रकृतेन वसुवन एधीत्यनेन मन्त्रेण। किमविशेषेण? न। कथन्तर्हि? अर्व्वाङवेक्षमाणः। अधोऽवलोकयन्। अर्व्वाङ् अधोमुखः, अवेक्षमाणो बलिदेशम्,—इति वा वर्णनीयम् ॥ ० ॥ ४ ॥ ० ॥

अनवेक्षमाणः प्रत्येत्याक्षतान् प्राश्नीयात् ॥ ५ ॥

अनवेक्षमाणोऽनवलोकयन्। अनपेक्षमाणः,—इति पाठेऽपि, अपेत्ययमुपसर्गः,—इति स एवार्थः। किमनवेक्षमाणः? प्रकृतान् बलिदिग्देशान्। प्रत्येत्य पुनरागत्य। किम्? अग्निसमीपदेशम्। कुतः? प्रकृतत्वात्। प्रतिशब्दस्वरसाच्च। अक्षतान्,—प्रकृतान् होमबल्योरवशिष्टान् इत्यर्थः। प्राश्नीयात् भुञ्जीत। एवञ्च न सर्व्वेषा मक्षतानां होमबल्योर्विनियोगः स्यात् ॥ ० ॥ ५ ॥ ० ॥

किमेक एव प्राश्नीयात्? न।

उपेतैरमात्यैः सह ॥ ६ ॥

उपेतैः समीपमागतैरमात्यैः सह मिलित्वा। अमात्यशब्देन पुत्रभ्रातृप्रभृतयो गृह्या उच्यन्ते। एतदुक्तं भवति। यावदयं

गृहाविष्क्रान्तो जुहोति बलिञ्चोत्सृज्याग्निसमीपं प्रत्येति, तावदमात्या ग्रंथ्यस्य समीपमागच्छेयु: ;--येन तै: सार्द्धमन्न-प्राशनमस्योपपद्यते,--इति । स खल्वयमर्थ: उपेतपदस्वरसा-दवगम्यते ॥ ० ॥ ६ ॥ ० ॥

काम्येन खल्वेतेन कर्म्मणा भवितव्यम् । किं पुनरस्मिन् कर्म्मणि क्वते फलं स्यात्? तदुच्यते,—

स्वस्त्ययनम् ॥ ७ ॥

व्याख्यातोऽचरार्थ: । तदिदं कर्म्मण: फलवचनपरं सूत्रं न वामदेव्य-गानविधानार्थम् । अनर्थकत्वापत्ते: । परिभाषाप्राप्तं वामदेव्यगानं खल्वन्तरेणाप्येतद्वचनमिदानीं कर्त्तव्यं भवति । उत्तरत: कर्म्मा-न्तरसूत्रणादिदानीमेतस्य कर्म्मणोऽपवर्गावगमात् । अपर आह । कर्म्मापवर्गविहितं वामदेव्यगानमिह स्वस्त्ययनम्--इति ॥०॥७॥०॥

वशङ्गमौ शङ्गश्चेति पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत ॥ ८ ॥

वशङ्गमौ,--इति मन्त्रेण, शङ्गच,--इति मन्त्रेण च, पृथक् नाना आहुती ययो:, तौ पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत कुर्य्यात् । ननु, पृथगाहुती,—इत्येतदवाच्यं ; मन्त्रयो: पृथगुपन्यासात् व्रीहि-यवहोमौ,—इति द्विवचनाच्च होमयोर्द्वित्वावगते: । न,—इत्याह । कस्मात्? यस्मात् एतदवचने व्रीहियवयोर्द्वन्द्वनत्वादितरेतरयोगाव-गतेर्मिलितयोर्व्रीहियवयोर्होम: स्यात् । तस्मादेकैकमन्त्रेणैकैकस्य

होमार्थं पृथगाहुती,—इति वचनम्। तदत्र द्रव्यपृथक्त्वादाहुत्योः पृथक्त्वमित्यमुमर्थं प्रज्ञापयितुं 'पृथगाहुती'—इत्याह। एवञ्च, वशङ्गमाविति मन्त्रेण व्रीहिहोमः, शङ्ग्चेत्यनेन च यवहोमः स्यात्। तथा चोक्तम्।

"वशङ्गमाविति व्रीहीन् शङ्गचेति यवांस्तथा।
असावित्यत्र नामोक्त्वा जुहुयात् चिप्रहोमवत्" ॥

इति। अस्मादचनात् चिप्रहोमोऽयम्। आह। असौ,—इत्येतस्मिन् सर्वनाम्नि नाम उक्त्वा जुहुयात्,—इत्युक्तम्। न ज्ञायते; कस्य नाम्नो वचनम्?—इति। तदक्तव्यम्। उच्यते ॥ ० ॥ ८ ॥ ० ॥

यस्यात्मनि प्रसादमिच्छेत्तस्मै ॥ ९ ॥

यस्य,—अविशेषात् स्त्रियाः पुरुषस्य वा, आत्मनि स्वस्मिन् विषये, प्रसादं प्रसन्नतामिच्छेत् अभिलषति, तस्मै, तस्य, नाम उक्त्वा, —इति संबन्धः। 'तस्मै खर्व्वः' इतिवत् 'तस्मै'—इति च्छान्दस्या प्रक्रियया षष्ठ्यर्थे चतुर्थी। अपर आह। तस्मै,—इति तादर्थ्ये चतुर्थी। यस्यात्मनि प्रसादमिच्छेत्तदर्थं तमुद्दिश्य व्रीहियवहोमौ प्रयुञ्जीत,—इति गतेन संबन्धः। अनयाऽपि वचनव्यक्त्या तस्यैव नाम्नो वचनम्,—इति मन्यते। तं प्रसादयितुम्—इत्यस्यामपि वर्णनायां गतेनैवास्य संबन्धो द्रष्टव्यः,—इति ॥ ० ॥ ९ ॥ ० ॥
किमस्य व्रीहियवहोमस्य सकृत् प्रयोगः? न,—

नित्यप्रयोगः ॥ १० ॥

नित्यमहरहः प्रयोगः—मर्यादाप्रसादात् प्रत्यहमनुष्ठानम् ॥०॥ १०॥

एकाचर्य्यायामर्द्धमासव्रते द्वे कर्म्मणी ॥ ११ ॥

"आकूतीं देवीं मनसा प्रपद्ये"—इत्यादिकामृचमेकाचर्य्यामाचक्ष्महे। कस्मात्? तस्या इदानीं क्रमप्राप्तत्वात्। प्रसिद्धेश्च। प्रसिद्धिबीजञ्च,—"यस्यास्त एकमक्षरम्"—इति मन्त्रवर्णः। तदस्यामेकाचर्य्यायामृचि चत्वारि कर्म्माणि सूत्रयिष्यति। तेषां मध्यात् द्वे कर्म्मणी अर्द्धमासव्रते स्याताम्। के पुनर्द्वे कर्म्मणी अर्द्धमासव्रते स्याताम्? आयुष्कामग्रामकामकर्म्मणी,—इति ब्रूमः। कथं ज्ञायते? अनयोर्विशिष्टफलकत्वात्। साध्यानुगुणत्वाच्च साधनस्य। तथा चोक्तम्।

"चत्वारि चैकाचर्य्यायां कर्म्माणि फलभेदतः।
तत्रार्द्धमासव्रतता न द्वितीयचतुर्थयोः"।

इति। द्वितीयचतुर्थयोस्तु पारिभाषिकव्रततैव स्यात्,—विशेषस्यानुपदेशात्,—इति द्रष्टव्यम् ॥ ० ॥ ११ ॥ ० ॥

तानि चत्वारि कर्म्माणि सपरिकरमिदानीमभिधीयन्ते,—अष्टभिः सूत्रैः,—

पौर्णमास्याꣳ रात्रौ खदिरशङ्कुशतं जुहुयादायुः-कामः ॥ १२ ॥

पौर्णमास्यां रात्रौ,—इत्युक्तार्थम्। खदिरः प्रसिद्धः। तन्मयाः शङ्कवः कीलकाः—खदिरशङ्कवः। तेषां खदिरशङ्कूनां शतम्,—

(शतशब्दः संख्यावचनः)—जुहुयात्, प्रकृतया एकाचर्य्यया ऋचा, क्षिप्रहोमन्यायेन,—इत्यर्थः। शङ्कवश्च प्रकृतिधर्म्मानुरोधात् समित्-प्रमाणाः समिल्लक्षणयुक्ताश्च कर्त्तव्याः। तथा चोक्तम्।

"सत्वचः शङ्कवः कार्य्यास्तीक्ष्णाग्रा वीतकण्टकाः।
समिल्लक्षणसंयुक्ताः सूचीतुल्यास्तथाऽऽयसाः"।

इति। को जुहुयात्? आयुःकामः। आयुर्जीवितं कामयते यः, सोऽयमायुःकामः। कस्य आयुःकामः? अविशेषादात्मनः पुत्रादीनां वा। कथं पुनः "शास्त्रदेशितं फलमनुष्ठातरि"—इति स्थिते सिद्धान्ते पुत्रादीनामप्यायुःकामयमानोऽधिकरोति,—इति वर्ण्यते? गृह्याकर्म्मत्वादित्याह। गृह्याकर्म्म खल्विदं गृह्याणामपि फलजनकं भवितुमर्हति, न केवलं यजमानस्यैव। गृह्याश्च पुत्रादयः। न खल्वसौ यजमानोऽन्तरेणैतान् स्वमेवाभ्युदयं कामयमानो भवति निर्वृतः। तत्सारत्वात्तस्य। तथाच गृह्यासंग्रहः।

"पत्न्यः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः।
गृह्या इति समाख्याताः यजमानस्य दायकाः।
तेषां संस्कारयोगेन शान्तिकर्म्मक्रियासु च।
आचार्य्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः"॥

इति ॥ ० ॥ १२ ॥ ० ॥

आयसान् बधकामः ॥ १३ ॥

अयो लौहम्। तद्वान् आयसान् शङ्कून्,—प्रकृतत्वाच्छतसंख्याकान्, प्रकृतेनैव विधिना जुहुयात्। कः? बधकामः। हननं

बधः,—इत्यनर्थान्तरम्। तं कामयते यः, सोऽयं बधकामः। कस्य बधकामः? शत्रूणामर्थात्। न हि कश्चिदात्मनोबधं कामयते ॥ ० ॥ १३ ॥ ० ॥

अथापरम् ॥ १४ ॥

अथशब्दः,—बधकामकर्म्मणा व्यवहितस्यापि पूर्व्वप्रकृतस्यार्द्धमासव्रतस्यानुसन्धानार्थः। 'अर्द्धमासव्रते द्वे कर्म्मणी',—इत्युक्तम्। तत्रैकमायुःकामस्योक्तम्। अथापरमपि अर्द्धमासव्रतं कर्म्म ग्रामकामस्य वर्त्तिष्यते,—इत्यर्थः ॥ ० ॥ १४ ॥ ० ॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथे पर्व्वते वाऽऽरण्यैर्गोमयैः स्थण्डिलं प्रताप्यापोह्याङ्गारान् मन्त्रं मनसाऽनुद्रुत्य सर्पिरास्येन जुहुयात् ॥ १५ ॥

'प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य',—इत्युक्तार्थम्। 'चतुष्पथे पर्व्वते वा' चतुष्पथपर्व्वतौ प्रसिद्धौ। तयोरन्यतरस्मिन्। 'आरण्यै भवैर्न ग्राम्यैः, 'गोमयैः',—न दारुभिः, 'स्थण्डिलं' लोहपात्रं, 'प्रताप्य' प्रकर्षेणातिशयं तापयित्वा, तस्मात् स्थण्डिलात् 'अङ्गारान्' अग्निमयान्, 'अपोह्य' अपाकृत्य, 'मन्त्रं' प्रकृतमेकाक्षर्य्यामन्त्रं, 'मनसा' हृदयेन, 'अनुद्रुत्य' अनुस्मृत्य, 'सर्पिः' घृतं, 'आस्येन' मुखेन, 'जुहुयात्'। कुत्र जुहुयात्? प्रतप्ते स्थण्डिले,—इत्याह। कुतः? प्रकृतत्वात्। जुहोतिचोदनाबलादपोढ़ेष्वेवाङ्गारेषु होमः?,—इति चेत्। नैतदेवम्। कस्मात्? यस्मादेवंसति

स्थण्डिलप्रतापनोपदेशोऽनर्थकः स्यात्। अपोहनोपदेशेन चाङ्गारानां स्थण्डिल-प्रतापनमात्रार्थतया कर्म्माङ्गत्वावगतेः। एवञ्च, अनग्निकत्वादत्र चिप्रहोमधर्म्मो न स्यात्, किन्तु उदकहोमवत् यावदुक्तमेव स्यात्,—इति द्रष्टव्यम्। अत्र च, स्थण्डिलप्रतापनादौ यद्यपि मन्त्रो नोपदिश्यते, तथापि न व्याहृतिप्रयोगः, किन्तु तूष्णीमेव करणीयम्। तथा च गृह्यासंग्रहः।

"वपाहोमे मुखेनैव होमे स्विष्टकृते तथा।
व्याहृतीर्न प्रयोक्तव्या मुखे नाप्सु च लक्षणम्"।

इति ॥ ० ॥ १५ ॥ ० ॥

तस्याञ्च सर्पिराहुत्याम्—

ज्वलन्त्यां द्वादश ग्रामाः ॥ १६ ॥

अस्य भवन्ति। फलविधिरयं न फलार्थवादः। कथं ज्ञायते? काम्यानां श्रूयमाणफलत्वस्य रात्रिसत्रन्यायेन वर्णयितुमुचितत्वात्। तस्मात् ग्रामकामस्यात्राधिकारः ॥ ० ॥ १६ ॥ ० ॥

धूमे त्र्यवरार्द्ध्याः ॥ १७ ॥

आहुत्यामज्वलन्त्यां केवले धूमे जायमाने त्र्यवरार्द्ध्याः ग्रामाः अस्य भवन्ति। अवरार्द्ध्यशब्दो हीनवचनः। त्रयोऽवरार्द्ध्याः हीना येषां ते तथोक्ताः। अवरार्द्ध्यशब्देनैतत् दर्शयति,—धूमप्रमाणाल्पत्व-बहुत्वाभ्यां फलाल्पत्वबहुत्वं भवति, परन्तु न्यूनकल्पेऽपि त्रयो ग्रामाः सम्पद्यन्ते,—इति। अपरे तु मन्यन्ते,—ज्वालादीप्तितारतम्येनापि फलतारतम्यं भवति,—इति ॥ ० ॥ १७ ॥ ० ॥

अमोघं कर्म्मेत्याचक्षते॥ १८॥

इदं ग्रामकामकर्म्म अमोघं अव्यर्थमिति प्राचक्षते कथयन्ति आचार्य्याः। अमोघवचनेनैतद्दर्शयति,—यदि ज्वाला न भवति, धूमोऽपि न जायते, तथापि नैवेदं कर्म्म मोघं भवति, अपितु कियदपि गृहक्षेत्रादिकं फलमस्य स्यादेव,—इति। कुतः? अमोघवचनस्यैवमर्थत्वात्॥ ०॥ १८॥ ०॥

वृत्त्यविच्छित्तिकामो हरितगोमयान् सायं प्रातर्जुहु-यात्॥ १९॥

वृत्तिर्वर्त्तनमुपजीवनमित्यनर्थान्तरम्। अविच्छित्तिरविच्छेदः—अविच्युतिरित्येतत्। वृत्तेरविच्छित्तिः वृत्त्यविच्छित्तिः। तां काम-यते,—इति वृत्त्यविच्छित्तिकामः। आह। कतमा पुनरिह वृत्ति-रभिप्रेता? शिलोञ्छादिरूपा,—इति ब्रूमः। कुतः? तस्या एव ब्राह्मणादिवृत्तितया प्रसंशनात्। तथाच वृत्तिमुपक्रम्य स्मरति भगवानत्रिः।

"मयैष धर्म्मोऽभिहितः संस्थिता यत्र वर्णिनः।
बहुमानमिह प्राप्य प्रयान्ति परमां गतिम्"।

इति। मनुरपि।

"अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि।
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः।

अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ।
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन" ।

इति ।

"न लोकवृत्तं वर्त्तेत वृत्तिहेतोः कथञ्चन ।
अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम्" ।

इति च । तस्मात्,—युक्ता अभ्युदयहेतोः शुद्धाया वृत्तेरविच्छित्ति-कामना । अपर आह । वृत्तिशब्देन श्रुतिस्मृतिविहितकर्म्मानुष्ठान-मुच्यते । कुतः ?

"यावज्जीवमविच्छिन्नां वृत्तिं यस्त्वनुतिष्ठति ।
यथाऽऽम्नातेन विधिना स परं ब्रह्म विन्दते" ।

इति स्मरणात् । मनुवचनाच्च ।

"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पश्च सत्त्वशुद्धिकरः शुभः" ।

इति । तदसङ्गतम् । कुतः ? वृत्तिशब्दस्यैदमर्थ्याप्रसिद्धेः । स हि जीवनोपायमाह,—इति स्मृतिषु प्रसिद्धम् । यदपि स्मरणम्—"यावज्जीवमविच्छिन्नाम्"—इत्यादि, तदपि अस्मदुक्तामेव वृत्तिं स्तौति । तस्या अपि प्रसंशार्हत्वात् । न भवदुक्ताम् । अप्रसिद्धेरेव । मनुरपि चतुर्थेऽध्याये प्रथममस्मदुपवर्णितां वृत्तिं, परतस्तु स्नातक-व्रतमभिधाय, प्रकरणशेषे "एषोदिता गृहस्थस्य"—इत्यादिना यथाक्रमं तदुभयमेवोपसंहरति,—इत्यवगच्छामः । कथम् ? उप-क्रमोपसंहारयोरेकार्थत्वोपपत्तेः । अन्यथा खल्वसावन्यदुपक्रम्यान्य-दुपसंहरन्ननवधेयवचनः स्यात् । भवत्परिकल्पितायाश्च वृत्तेरा-

असाम्तरसाधारणत्वात् गृहस्थमात्रपरं समुवचनं पौण्येन। न खल्वेकैव वृत्तिरनेकसाधारणा एकस्य प्रशस्यते मापरस्येति किञ्चित् कारणमत्र शक्यमुत्प्रेक्षितुम्। तस्मादस्मदुक्त एवार्थों विद्वद्भिरादरणीयः।

स खल्वयंवृत्त्यविच्छित्तिकामः,—हरितगोमयान् सायं प्रातर्जुहुयात्। प्रकृतेनैकाक्षय्यामन्त्रेण। होमश्चायं चिप्रहोमन्यायेन स्यात्।. हरिताश्च ते गोमयाश्च,—इति हरितगोमयाः, तान्—हरितगोमयान्। यैः खलु गोमयैः सङ्कुले प्रदेशे हरितानि तृणानि प्रशस्तान्युत्पद्यन्ते, तान् किल गोमयान् हरितगोमयान् चाचष्टे। ते खल्वार्द्रा इहाभिप्रेयन्ते। कथं ज्ञायते? तेष्वेव तत्प्रसिद्धेः। हरितगोमयेनोपलिम्पतीतिवत्। अप्सुषोमानाम चमसाश्चात्वालदेशेऽद्भिः पूर्णाः, तेषु हरितानि तृणानि प्रास्तानि भवन्ति—इत्यत्र हरिततृणशब्दः सूत्रकारेणाप्येवमेव व्याख्यातः। अध्वर्य्योऽपि तादृशान्येव तृणानि तत्र प्रक्षिपन्ति। तस्माद्यथोक्त एवार्थः।

हरितगोमयान्,—इति बहुवचनं सायंप्रातराहुत्यपेक्षम्। आहुतेराहुत्यपेक्षमेव कुतो न स्यात्?—इति चेत्। न। एकमन्त्राधिकारात्। अभ्यासस्यानुपदेशाच्च। तस्मात्,—एकैवेयमाहुतिः सायंकाले प्रातःकाले च होतव्या। सा खल्वियमाहुतिः, सायं—सायमाहुतेः पुरस्तात् स्यात्। प्रातश्च प्रातराहुतेः परस्तात्। कस्मात्? सायंप्रातर्होमयोरव्यवायोपपत्तेः। एवं खल्वव्यवायः सायंप्रातर्होमयोरुपपद्यते। इतरथा व्यवायः स्यात्। स चानिष्टः। कुतः?

"नैकस्मिन् कर्म्मणि तते कर्म्मान्यत् तायते यतः" ।

इति वचनात् । अथ, एवमपि प्रादुष्करणहोमयोर्व्यवायः स्यादेव ? स्यादेव । अनन्यगतिकत्वात् । किं पुनरत्र कारणम् ? ;—प्रादुष्करणहोमयोर्व्यवाय आश्रयितव्यो न सायंप्रातर्होमयोः ,—इति । उच्यते । आश्रयिष्यामः प्रादुष्करणहोमयोर्व्यवायम् , अनाश्रयन्तः सायंप्रातर्होमयोर्व्यवायं करिष्यामः । न च गुणस्य अव्यवायं उपपादयितुं प्रधानयोर्व्यवायः युक्त आश्रयितुम् । तस्मात् ,—यथोक्तमेवास्तु । स खल्वयं होमो वर्षासु प्रत्यहं करणीयः । कुतः ? तत्रैव हरितगोमयोपपत्तेः । तथा चोक्तम् ।

"सायं होमस्य पुरतः परस्तात् प्रातराहुतेः ।
आर्द्रं वर्षासु जुहुयात् प्रत्यहं गोमयाहुतिम्" ।

इति । एवन्तावदेकाचर्य्यायां चत्वारि कर्म्माण्यभिहितानि ॥०॥१८॥ मन्त्रान्तरविनियोगं विवक्षुः कर्म्मान्तरमिदानीं वक्तुमारभते,—

त्रिरात्रोपोषितः पशुहोमं जुहुयादिदमहमिमं विश्वकर्म्माणमिति ॥ २० ॥

त्रिरात्रोपोषितः,—इत्युक्तार्थम् । 'काम्येषु त्रिरात्राभोजनम्'—इति सिद्धत्वादेतदवाच्यम् ,—इति चेत् । न । सिद्धमेव पुनरुच्यते । किमर्थम् ? आदरार्थम् । अथवा । नियमार्थमेतद्भविष्यति,—त्रिरात्रोपोषित एव पशुहोमं जुहुयात् ,—इति । किमतः ? एतदतो भवति,—'त्रीणि वा भक्तानि'—इत्येतत् पक्षान्तरमिह न भवति,—इति ।

पण्यं विक्रेयद्रव्यं भण्यते। पण्याय होमः पण्यहोमः। तम्--पण्यहोमम्, 'इदमहम्,'--इति मन्त्रेण चिप्रहोमन्यायेन जुहुयात्। आह। केन द्रव्येण जुहुयात्? द्रव्यानादेशादाज्येन। एवमेके। उत्तरसूत्रदर्शनात् पण्यावयवेन। एवमपरे। येषां पण्यानामवयवहोमाद् विनाशः,--यथा मणिरत्नादीनाम्, तेषामाज्येन, येषां पुनरवयवहोमादपि न विनाशः,--यथा धान्यादीनाम्, तेषामवयवेनैव होमः। एवमन्ये। किं पुनरत्र युक्तम्? अन्तिमः पक्षः इत्याह। कुतः? उत्तरसूत्रात्। अविनाशोपपत्तेश्च। न हि पण्यसम्पदे क्रियमाणो होमः पण्यविनाशाय भवितुं युक्तः। न हि वरघाताय कन्यामुद्वाहयन्ति। आचार्य्यस्तु पण्यावयवेनैव होममुपदेक्ष्यति। पण्यशब्दो द्वावपि प्रयुज्यते,--इति तस्याप्यत्र ग्रहणमिच्छन्ति। एका चेयमाहुतिः। सकृच्च प्रयोगः॥ ० ॥ २० ॥ ० ॥

वाससस्तन्तून् ॥ २१ ॥

वाससः पण्यस्य तन्तून् दशासूत्राणि जुहुयात्, पूर्व्वोक्तेन विधिना ॥ ० ॥ २१ ॥ ० ॥

गोर्वालान् ॥ २२ ॥

गोः पण्यस्य वालान् लाङ्गूललोमानि, जुहुयादित्यनुवर्त्तते॥ ॥ ० ॥ २२ ॥ ० ॥

एवमितरेभ्यः पशुभ्यः ॥ २३ ॥

इतरेभ्यः पशुभ्यः सकाशात्, एवमवयवमुद्धृत्य जुहुयात्। अत्र पशुहोमकर्म्मणः परिसमाप्तिः। फलमप्यस्य कर्म्मणः पशुमेव कल्पयितव्यं भवति। कुतः? उपस्थितत्वात्। पशुहोममिति वचनाच्च ॥ ० ॥ २३ ॥ ० ॥

पूर्णहोमो यजनीयप्रयोगः ॥ २४ ॥

'पूर्णहोमं यशसे जुहोमि'--इति पूर्णशब्दोपलक्षितेन मन्त्रेण होमः पूर्णहोमः। कर्त्तव्यः,—इति सूत्रशेषः। स खल्वयं पूर्णहोमो-यजनीयप्रयोगो भवति। व्याख्यातमेतत्। स चायं होमः पौर्णमास्याः प्रतिपदि प्रातर्होमादूर्द्ध्वं पश्चाद्धिहोमाच्चार्वाक् स्यात्। अमावस्यायाः प्रतिपदि तु पश्चाद्धिहोमादूर्द्ध्वम्--इति द्रष्टव्यम्। होमश्चायमाज्येन करणीयः। द्रव्यानुपदेशात्। एका चेयमाहुतिः क्षिप्रहोमन्यायेन स्यात्। एवमुत्तरत्रापि ॥ ॥ ० ॥ २४ ॥ ० ॥

इन्द्रामवदादिति च ॥ २५ ॥

'इन्द्रामवदात्तमोवः'--इति मन्त्रेण च होमो यजनीयप्रयोगः ॥ ॥ ० ॥ २५ ॥ ० ॥

अनयोः खलु यजनीयप्रयोगाहुत्योर्मध्यात्,--

यशस्कामः पूर्व्वाᳬ सहायकाम उत्तराम् ॥ २६ ॥

यशस्काम: पूर्व्वामाहुतिं जुहुयात्। सहायकाम उत्तरामाहुतिं जुहुयात्॥ ० ॥ २६ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य पञ्चमी खण्डिका समाप्ता ॥ ० ॥

चतुर्थप्रपाठके नवमी खण्डिका।

पुरुषाधिपत्यकामोऽष्टरात्रमभुक्त्वा ॥ १ ॥

पुरुषाणामाधिपत्यं सेनापत्यादिकं कामयते,--इति पुरुषाधिपत्यकामः। अष्टरात्रम्,--अष्टौ अहोरात्राणि, अभुक्त्वा उपोष्य ॥ ॥ ० ॥ १ ॥ ० ॥

औदुम्बरान् स्रुवचमसेध्मानुपकल्पयित्वा ॥ २ ॥

उदुम्बरस्यैतान् औदुम्बरान्। तान् खल्विमान् वार्षानिव न तैजसान्,--इत्यवगच्छामः। कथम्? इध्मेन सहैकयोगनिर्देशात्। स्रुवचमसेध्माः व्याख्याताः। तान् उपकल्पयित्वा,--उपकल्प्य सम्पाद्य,--इत्येतत्। चमसस्योपकल्पनं प्रणीतार्थम्। इध्मानामुपकल्पनम्--आज्यतन्त्रेण होमप्रज्ञापनार्थम्। कथं ज्ञायते? एवं खल्वमीषामुपकल्पनं दृष्टार्थं भवति। अन्यथा अदृष्टार्थत्वमेषां कल्पनीयं स्यात्। न चैतदुचितम्,--सम्भवति दृष्टे अर्थे ॥ ० ॥ २ ॥ ० ॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधाय ॥ ३ ॥

ज्ञातभाष्यं सूत्रम् ॥ ० ॥ ३ ॥ ० ॥

आज्यमादित्यमभिमुखो जुहुयात्;—अन्नं वा एकच्छन्दस्यᳫँश्रीर्व्वा एषेति च ॥ ४ ॥

आदित्यमभिमुखः,—आभिमुख्येनादित्यमुखः, अन्नं वा,—इति मन्त्रेण, श्रीर्व्वा,—इति मन्त्रेण च, आज्यं जुहुयात्। पृथङ्मन्त्रद्वयनिर्द्देशः,—आहुतिद्वयार्थः। आदित्यमभिमुखः,—इति वचनात् प्रातराहुत्यनन्तरमेव होमोऽयं करणीयः,—इत्यवगच्छामः। कथं कृत्वा? एवं खल्वादित्याभिमुखता प्राङ्मुखता च होतुः सम्पत्स्यते। तथाच सति, न कस्यापि शास्त्रस्य उपरोधो भविष्यति। इतरथा प्राङ्मुखशास्त्रं वा उपरोत्स्यते, आदित्याभिमुखशास्त्रं वा। तच्चानिष्टम्।

ननु, आज्यम्—इति किमर्थम्? आज्येन होमार्थम्। ननु, अवचनेऽपि तदेव प्राप्नोति? प्राप्नोति। अनर्थकं तर्हि? न,—इत्युच्यते। कस्मात्? यस्मात् आज्यमित्यवचने अनादेशबलात् तत् प्राप्नोति, वचनेऽपि आदेशबलात् तदेव प्राप्नोति। तत् किमत्र चोद्यम्?—इति न खल्वधिगच्छामि। आदेशे खल्वेतत् वचनमाज्यस्य प्रापकं भवति, अनादेशे चान्यद्वचनम्। अनादेशे प्रापकं तु वचनमवष्टभ्य, आदेशवचनमाक्षिपति भवान्। न चैतदुचितम्। आचार्य्येच्छाधीनत्वादादेशानादेशयोः।

अथ, प्रयोजनान्तरमन्तरेण न ते परितोषः;—शृणु, तदपि। आज्यमित्यवचने मन्त्रलिङ्गादन्नेन होममपि कश्चिदाशङ्कीत कदाचित्,—इति इमामधिकामाशङ्कां निरसितुम्,—आज्यम्,—इत्याचार्य्यः सूत्रयाञ्चकार,—इति लक्ष्यते। अपर आह। 'सपि-

स्रौलं दधि पयो यवागूं वा',—इत्येतस्य व्यावृत्त्यर्थं पुनराज्यग्रहणम्। एवञ्च, अत्र आज्यमेव नियम्यते"—इति ॥ ० ॥ ४ ॥ ० ॥

अन्नस्य घृतमेवेति ग्रामे तृतीयाम् ॥ ५ ॥

अन्नस्य घृतम् ,—इत्यनेन मन्त्रेण तृतीयामाहुतिं ग्रामे जुहुयात्। इयमप्याहुतिराज्येनैव स्यात्। कुतः? द्रव्यान्तरानुपदेशात्। मन्त्रलिङ्गात्। आज्यस्य च प्रकृतत्वात्। ग्रामेऽप्यग्नावेव होमो-न ग्राम एव। 'ग्रामान्निष्क्रम्य',—इत्येतद्वैपरीत्यमभिप्रयन् खल्वा-चार्य्यः,—'ग्रामे',—इत्याह,—इति ज्ञायते। 'अग्निमुपसमाधाय' —इति खल्वनुवर्त्तत एव।

इदमिदानीं सन्दिह्यते। किमियमप्याहुतिरौदुम्बरस्रुवचम-सादिना अन्यतमेन स्यात्, उत क्षिप्रहोमन्यायेन, ?—इति। आज्यतमेन,—इति ब्रूमः। कस्मात्? अधिकारात्। फला-न्तरानुपदेशात्; तृतीयत्ववचनाच्च; ऐककर्म्यावगतेश्च। अन्यथा खल्वभिधानादेव तृतीयत्वप्राप्तेस्तृतीयामिति वचनमनर्थकं स्यात्। तस्मात्,—संख्यावचनादैककर्म्यं प्रतिपादयन् पूर्व्वोक्तधर्म्म-सम्बन्धमत्रापि दर्शयति,—इत्याख्येयम्। तुल्यधर्म्मणां हि संख्ये-यानामेकसंख्याभिसंबन्धोऽसति बाधके वाक्यतात्पर्य्यविद्भिरिष्यते ॥ ॥ ० ॥ ५ ॥ ० ॥

गोष्ठे पशुकामः ॥ ६ ॥

गोष्ठे गवामावासे, अग्निमुपसमाधाय प्रकृतामाहुतिं जुहुयात्। कः? पशुकामः। पशुशब्देन गौरेवाभिप्रेयते। कथं ज्ञायते?

गोष्ठे,—इति तस्यैव हृदयागतत्वात्, अतः परित्यागे च कारण-विशेषाभावात्। पशुशब्देनाविशेषात् गोमेषमहिषादय उच्यन्ते,—इति केचित्।

इदमिदानीं सन्दिह्यते। किं कृत्स्नमेवाहुतित्रयं पशुकामस्य गोष्ठे उपदिश्यते, उताहो अनन्तरा तृतीयैवाहुतिः?,—इति। अनन्तरा तृतीयैव,—इति ब्रूमः। कस्मात्? आनन्तर्य्यातिरेकात्। अभ्यासानुपदेशाच्च। तस्मात्,—तृतीयाम्,—इत्यनुवर्त्तते,—इति बोद्धव्यम्। अपर आह। अविशेषात् उभयत्रापि मन्त्रत्रय-स्यानुवृत्तिदर्शनाच्च कृत्स्नमेवाहुतित्रयमिहोपदिश्यते,—इति।

स खल्वयं होमः पुरुषाधिपत्यकामस्यैव सतः पशुकामस्य गोष्ठे उपदिश्यते। दर्शपौर्णमासयाजिन एव सतः पशुकामस्य गोदोहेन प्रणयनोपदेशः,—इति यथा। कथं ज्ञायते? तस्यैवाधि-कारात्। तृतीयाम्,--इत्यनुवर्त्तनेनैककर्म्यप्रतिपत्तेश्च। 'गोष्ठे पशुकामः'--इत्येतावन्मात्रं खल्विहोच्यते, न तु किञ्चिदपि कर्त्तव्यमुपदिश्यते। भवितव्यन्तु तेन। तस्मात्,--आनन्त-र्य्यातिरेकात् तृतीयामाहुतिं जुहुयात्,--इत्यनुषञ्जनीयम्। तस्मात्,--येयं तृतीया आहुतिः केवलं पुरुषाधिपत्यकामस्य ग्रामे उपदिष्टा, सैव तस्यैव पशुकामस्य सतः गोष्ठे उपदिश्यते,--इति स्थितम्। तस्मादविकृताधिकारोऽयमुपदेशः॥ ०॥ ६॥ ०॥

विदूयमाने चीवरम्॥ ७॥

विदूयमाने,--"टु दु उपतापे"--इति स्मरणात् विशेषेण उपतप्य-

माने। कस्मिन् ? गोष्ठे। कथं ज्ञायते ? अधिकारात्। सप्तमी-निर्देशाच्च। एतदनेनोक्तं भवति। गोष्ठे अग्निमुपसमाधायैव होमो-न कर्त्तव्यः किन्तु अग्निमुपसमाधायापि तावत् प्रतीक्षणीयं;--यावद्गोष्ठमुपतप्यमानं भवति। तत उपतप्यमाने सति गोष्ठे होमः करणीयः,--इति। अपरे पुनर्भाषन्ते--"गोष्ठस्योपतापासम्भवात् गोष्ठसंबन्धाङ्गोषु उपतप्यमानासु--इति द्रष्टव्यम्"--इति।

तदेवं विदूयमाने गोष्ठे चीवरं जुहुयात्, इति वर्त्तते। 'सम्पत्कामो जुहोमि'--इति मन्त्रलिङ्गाच्चैतदेवं प्रतिपत्तव्यम्। चीवरशब्देन लौहचूर्णमुच्यते। कुतः ? "लौहचूर्णञ्च चीवरः"--इति वचनात्। तदत्र चीवरविधानादाज्यस्य निवृत्तिः स्यात्। पूर्व्वोक्तधर्म्मसंबन्धस्तु अत्रापि स्यादेव। तत्सम्बन्धेनैवोपदेशात्। या खल्वियं तृतीयाऽऽहुतिराज्येन ग्रामे स्यात्, सैव पशुकामस्य सतः चीवरेण गोष्ठे भवति,--इति खल्वत्रोचाम। अत्र पुरुषाधिपत्य-कामकर्म्मणोऽपवर्गः।

अन्यः पुनरन्यथेमं ग्रन्थं वर्णयाञ्चकार,—'गोष्ठे पशुकामः'—इत्यादिम्। "पशुकामो गोष्ठे तृतीयामाज्याहुतिं जुहुयात्। पशु-कामः,—इति निरपेक्षश्रवणात् अधिकृताधिकारे च प्रमाणा-भावात् सर्व्वस्यैव पशुकामस्य होमोऽयं, न पुरुषाधिपत्यकामस्यैव सतः पशुकामस्य,—इति। तस्मात्, पुरुषाधिपत्यकामकर्म्मणः कर्म्मान्तरमिदम्। एवञ्च, अत्र अष्टरात्रोपोषणं न स्यात्, न वा उदुम्बरस्रुवादि,--इति। कर्म्मान्तरमाह। 'विदुयमाने चीवरम्'। गोष्ठस्योपतापासम्भवात् गोष्ठसंबन्धाङ्गोषु उपतप्यमानासु चीवरं लौहचूर्णं जुहुयात्। इदमपिकर्म्मान्तरम्। क्षिप्रहोमश्चायम्।

एतेषां त्रयाणामपि कर्म्मणां सकृत् प्रयोगादेव फलं स्यात्। कुतः? अभ्यासानुपदेशात्"--इति ॥ ० ॥ ७ ॥ ० ॥

अथेदानीं कर्म्मान्तरमाह,--

प्रतिभयेऽध्वनि वस्त्रदशाना ग्रन्थीन् बध्नीत ॥ ८ ॥

भयमेव प्रतिभयम्। प्रतिरुपसर्गः। प्रकर्षवाची वा। तेन, प्रकर्षेण भयं प्रतिभयम्,--इत्यर्थः। अथवा। प्रत्यासन्नं भयं प्रतिभयम्। अध्वनि पथि, प्रतिभये,--प्रत्यासन्ने भयहेतौ सति,--इत्येतत्। वस्त्रदशानाम्,--वस्त्रं वासः, अविशेषादधरीयमुत्तरीयञ्च स्वकीयमेव भण्यते। तस्य दशानां ग्रन्थीन्,--बहुवचनात् त्रीनेव, बध्नीत। मन्त्रं वा एकच्छन्दस्यम्,--इत्येतत्प्रभृतिभिस्तिसृभिर्ऋग्भिः। कुतः? एतासामेव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च। आह। आनन्तर्य्यातिरेकात् तृतीययैव स्यात्? उच्यते। "स्वाहाकारान्ताभिः"--इति वक्ष्यमाणसूत्रात् तिसृभिरेव स्यात्, न पुनरानन्तर्य्यातिरेकात् तृतीययैव। अतिक्रान्तसंबन्धस्याप्याचार्य्यस्यानुमतत्वात् ॥ ० ॥ ८ ॥ ० ॥

स्ववाससोदशाऽभावे कथम्? उच्यते,--

उपेत्य वसनवतः ॥ ९ ॥

वसनवतः,-दशायुक्तवसनवतः, 'वस्त्रदशानां ग्रन्थीन् बध्नीत',--इत्यनुवर्त्तते। किं कृत्वा? उपेत्य। उप,-समीपम्, इत्वा-गत्वा, न तु समाहूय।

इयमपरा सूत्रद्वययोजना,--

अध्वनि पथि, प्रतिभये सति, वस्त्रदशानां त्रीन् ग्रन्थीन् बध्नीत, प्रकृताभिर्ऋग्भिः। किमात्मनो वस्त्रदशानाम् ? न। कस्य तर्हि ? 'उपेत्य वसनवतः'। वसनवतः सह गन्तुः कस्यचित्, वस्त्रदशानां ग्रन्थीन् बध्नीत। किं कृत्वा ? उपेत्य।

एवं वा,—'प्रतिभयेऽध्वनि वस्त्रदशानां ग्रन्थीन् बध्नीत'। अर्थादात्मनः। न केवलमात्मन एव। किं तर्हि ? 'उपेत्य वसनवतः'। चशब्दोऽत्र लुप्तवत् द्रष्टव्यः। वसनवतः,—इति च द्वितीयाबहुवचनान्तं पदम्। तदयमर्थः। वसनवतश्चैकसार्थगन्तॄन् सहायानुपेत्य तेषामपि वस्त्रदशानां ग्रन्थीन् बध्नीत ॥ ० ॥ ८ ॥ ० ॥

स्वाहाकारान्ताभिः ॥ १० ॥

प्रकृताभिर्ऋग्भिः। अहोमकत्वात् कर्म्मणः स्वाहाकारविलोपं मा प्रशाङ्क्षीत्,—इति स्वाहाकारान्ताभिः—इत्याह ॥ ० ॥ १० ॥ ० ॥

किं पुनरस्मिन् कर्म्मणि कृते फलं भवति ? उच्यते,—

सहायानाञ्च स्वस्त्ययनम् ॥ ११ ॥

सहायानां आत्मनः सह गन्तॄणां, चशब्दादात्मनश्च, स्वस्ति मङ्गलं तस्यायनं प्राप्तिः,—भयनिवृत्तिरित्येतत्। तस्या एवाभिप्रेतत्वेन मङ्गलरूपत्वात्। भवति,—इति सूत्रशेषः। अभिप्रेतार्थसिद्धिर्वा स्वस्तिशब्देनोच्यते। तस्यायनं प्रापकमेतत् कर्म्म,—इत्ययमर्थस्तदानीं वर्णनीयः। तदिदमुपरिष्टाद्वेदितव्यम्। भयस्यानियतकालत्वात् ॥ ० ॥ ११ ॥ ० ॥

आचितसहस्रकामोऽन्नतसन्नाहुतिसहस्रं जुहु-
याद् ॥ १२ ॥

आचितशतकामः,—इत्येतद्व्याख्यानेनैव, आचितसहस्रकामः,—इत्येतदपि व्याख्यातम्। अन्नतैर्यवैर्निष्पन्नाः सक्तवाऽन्नतसक्तवः, तेषामाहुतिसहस्रं चिप्रहोमन्यायेन जुहुयात्,—अन्नं वा एकच्छन्दस्यम्—इत्येताभिरृग्भिः। कुतः? एतासामेवप्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च।

अत्र किञ्चिद्वक्तव्यमस्ति। आहुतिसहस्रं होतव्यमुपदिश्यते, ऋचश्च तत्र तिस्रः करणतयोच्यन्ते, तत् कथमयं होमः स्यादिति तावत् सन्दिह्यते। किं तिसृणामृचामनुरोधात् आहुतिसहस्रस्य त्रिरभ्यासः कर्त्तव्यः, आहोस्वित् तिसृभिरेव ऋग्भिरेकैका आहुतिर्होतव्या, उताहो आहुतिसहस्रं त्रिधा विभज्य ऋक्त्रयेण होतव्यम्?—इति। तत्र न तावदाद्यः पक्षः। कुतः? गुणानुरोधेन प्रधानाभ्यासस्यायुक्तत्वात्। आहुतिसहस्रमिति संख्यावचनाच्च। नापि द्वितीयः। कस्मात्? एकैकस्या एवर्चो होमनिर्व्वाहसामर्थ्यात्। तथात्वे खल्वन्यापा एव ऋचः व्यवायाभावेन करणत्वापत्त्या आद्ययोः ऋचोः करणत्वाभावप्रसङ्गाच्च। तस्मात्, पारिशेष्यात् तृतीयः पक्षो ज्यायान्। तस्मात्, आहुतिसहस्रं त्रिधा विभज्य प्रथमया ऋचा तस्य प्रथमं भागम्, द्वितीयया ऋचा द्वितीयं भागम्, तृतीयया च ऋचा तृतीयं भागं जुहुयात्,—इति। अथ, एवमपि अन्त्या एका आहुतिः शिष्यते, कतमया

पुनः ऋचा असौ होतव्यां ? आद्यया,—इति ब्रूमः। कस्मात् ? मालान्यायेन पुनरपि तस्या एव उपस्थितत्वात्। तथा चोक्तम्।

"सक्नाहुतिसहस्रञ्च पुरीषाणाञ्च कीर्त्तितम्।
त्रिधाऽभ्यासेन तत् कुर्य्यादाद्यमन्त्राऽऽहुतिर्भवेत्"।

इति॥०॥१२॥०॥

पशुकामो वत्समिथुनयोः पुरीषाहुतिसहस्रं जुहुयात्॥१३॥

पशून् कामयते,—इति पशुकामः। स खल्वयं वृहत्पशुकामः—इत्यवगच्छामः। कुतः ? क्षुद्रपशुकामः इत्युत्तरत्र सूत्रणात्। वत्सश्च वत्सा च वत्समिथुनमुच्यते। कथं ज्ञायते ? मिथुनशब्दस्य द्वन्द्ववाचित्वात्। तयोः वत्समिथुनयोः, पुरीषाणां शकृताम् आहुतयः—पुरीषाहुतयः, तेषां सहस्रं जुहुयात्। अत्रं वा एकच्छन्दस्यम्—इत्येवमादिभिर्ऋग्भिः। कुतः ? एतासामेव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च।

इदमिदानीं सन्दिह्यते। किं यदैव यदैव पुरीषं सम्पद्यते, तदैव जुहुयात्। उत पूर्व्वमेव सर्व्वं पुरीषं संगृह्य एकस्मिन्नेव पूर्व्वाह्णे आहुतिसहस्रं जुहुयात् ?,—इति। एकस्मिन्नेव पूर्व्वाह्णे,—इति ब्रूमः। कस्मात् ? प्रधानस्य होमकर्म्मणो नानादिनकल्पनायां पारिभाषिककालबाधे च कारणविशेषाभावात्। पुनरपि सन्देहः। किं प्रकृतयोरेव वत्समिथुनयोः पुरीषसंग्रहः कार्य्यः, उत प्रकृतयोरन्ययोश्च कयोश्चिदनियमेन ?—इति।

प्रकृतयोरेव,—इति ब्रूमः। कुतः? प्रकृतपरित्यागे हेत्वभावात्। तथा चोक्तम्।

"चतुर्णां वत्सवत्सानां प्रकृतानाञ्च गोमयम्।
एकस्मिन्नेव पूर्व्वाह्णे जुहुयात् सक्तुहोमवत्"।

इति। 'सक्तुहोमवत्'—इति वचनादत्रापि आहुतिसहस्रं त्रिधा विभज्य पूर्व्ववत् जुहुयात्,—इति द्रष्टव्यम्॥ ०॥ १३॥ ०॥

अविमिथुनयोः क्षुद्रपशुकामः॥ १४॥

क्षुद्रपशुकामः, अविमिथुनयोः—मेषमिथुनयोः, पुरीषाहुतिसहस्रं प्रकृताभिर्ऋग्भिः पूर्व्ववदेव जुहुयात्॥ ०॥ १४॥ ०॥

वृत्त्यविच्छित्तिकामः कम्बूकान् सायं प्रातर्जुहुयात् क्षुधे स्वाहा क्षुत्पिपासाभ्याᳬ स्वाहेति॥ १५॥

वृत्त्यविच्छित्तिकामः,—इत्युक्तार्थम्। कम्बूकान् फलीकरणकणान् सायं प्रातर्जुहुयात्,—क्षुधे स्वाहा क्षुत्पिपासाभ्यां स्वाहेत्याभ्यां यजुर्भ्याम्। अत्रापि सायमाहुतेः पुरस्तात् प्रातराहुतेश्च परस्तात् होमः स्यात्। चिप्रहोमश्चायम्॥ ०॥ १५॥ ०॥

मा भैषीर्न मरिष्यसीति विषवता दष्टमद्भिरभ्युक्षन् जपेत्॥ १६॥

विषमस्यास्तीति विषवान् सर्पादिः। तेन दष्टम्,—अविशेषात्

पुरुषं स्त्रियं वा । अग्निरुदकेन अभ्युक्षन् आभिमुख्येन सिञ्चन्, मा भैषीरिति मन्त्रं जपेत्,—आ विषप्रक्षयात् । कथं ज्ञायते ? प्राणिपीडाऽपनयार्थत्वात् कर्म्मणः । अभ्युक्षन् जपेत्,—इति कुर्व्वन् अभ्युक्षणजपयोर्यौगपद्यं दर्शयति ॥ ० ॥ १६ ॥ ० ॥

तुरगोपायेति स्नातकः संवेशनवेलायां वैणवं दण्डमुपनिदधीत ॥ १७ ॥

स्नातको गृहमेधी । संवेशनं शयनं स्वापो निद्रा,-इत्यनर्थान्तरम् । तस्य वेलायां रात्रावित्यर्थः । कुतः ? दिवास्वापस्य निषेधात् । वैणवम्—वेणुर्वंशः तद्भवं, दण्डं यष्टिम्, तुरगोपाय,—इति मन्त्रेण उप समीपे—शयनसन्निधौ,-इत्येतत् । निदधीत धारयेत् । दध धारणे । निशब्दप्रयोगात्तत्रैव सर्व्वां रात्रिं निश्चलं धारयेत्, न तु मन्त्रप्रयोगं कृत्वा अन्यत्रापनयेत् ॥ ० ॥ १७ ॥ ० ॥
किमर्थं धारयेत् ?—

स्वस्त्ययनार्थम् ॥ १८ ॥

मङ्गलप्राप्त्यर्थम्—चौराद्युपद्रववारणार्थमित्येतत् ॥ ० ॥ १८ ॥ ० ॥

हतस्ते अत्रिणा क्रिमिरिति क्रिमिमन्तं देशमद्भिरभ्युक्षन् जपेत् ॥ १९ ॥

क्रिमयः प्रसिद्धाः व्रणेषु जायन्ते । क्रिमयो विद्यन्ते यस्मिन्, तं

क्रिमिमन्त्रम्, देशम्—प्राणिव्रणप्रदेशम्, न तु. गोमयादि। कथं ज्ञायते? प्राणिपीडापनयनकर्म्माधिकारात्।० तत्राप्युत्तर-सूत्रस्य पशुविषयत्वादेतस्य नरविषयतामवगच्छामः। तमिमं क्रिमिमन्त्रं देशं अङ्गिरभ्युक्षन्, हतस्ते,—इत्यादिक्रिमिमन्त्रान् सर्व्वानेव जपेत्। कथं पुनर्ज्ञायते सर्व्वेषां क्रिमिमन्त्राणामत्र विनियोगः?—इति। उच्यते। क्रिमिमतो देशस्याभ्युक्षणे विनि-योगविधानात् सर्व्वेषां क्रिमिमन्त्राणामत्रैव विनियोगमवगच्छामः। अन्येषां क्रिमिमन्त्राणां विनियोगान्तरादर्शनात्। न खल्वविनि-युक्ताएवान्ये क्रिमिमन्त्राः पठ्यन्ते,—इति युक्तम्। तस्मादुत्तरत्राईण-मन्त्राणां विनियोगोपदेशादिह सर्व्वेषामेव क्रिमिमन्त्राणां विनि-योगः,—इत्यादरणीयम्। अत्राप्यभ्युक्षणसमकालमेव मन्त्रजपः। एवं कृते किल क्रिमिपीड़ोपशान्तिर्भवति ॥ ० ॥ १९ ॥ ० ॥

पशूनाञ्चेच्चिकीर्षेदपराह्णे सीतालोष्टमाहृत्य वैहायसं निदध्यात् ॥ २० ॥

पशूनां गवाश्वादीनां, चेत् यदि, चिकीर्षेत् कर्त्तुमिच्छेत्। किम्? क्रिमिपीड़ोपशान्तिम्। कथं ज्ञायते? अधिकारात्। तदा, अपराह्णे—न पूर्व्वाह्णे। सीता लाङ्गलपद्धतिः। तस्या लोष्टम्, लोष्टः प्रसिद्धः, तमाहृत्य आनीय, वैहायसं आकाशस्थं, निदध्यात् धारयेत्,—गृहपटलादिस्थं धारयेदित्येतत्। निशब्दः पूर्व्व-वत् ॥ ० ॥ २० ॥ ० ॥

तस्य पूर्व्वाह्णे पांशुभिः परिकिरन् जपेत् ॥ २१ ॥

तस्य लोष्टस्य। पूर्व्वाह्णे—न अपराह्णे। अथ, सिद्धत्वादेतदवाच्यम् ? अथोच्यते,—कारणं वक्तव्यम्। उच्यते। एतदवचने खल्वपराह्णे,—इत्यनुवर्त्तेत। अतस्तन्निवृत्त्यर्थम्,—पूर्व्वाह्णे,—इत्युच्यते। पांशुभिः रेणुभिः, परिकिरन्,—प्रकृतस्य पशोः क्लिमिमन्तं देशम्। प्रकृतमेव मन्त्रं जपेत्। कुतः ? तस्यैव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च! परिकिरणसमकालं मन्त्रजपो व्याख्यातः ॥ ० ॥ २१ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य नवमी खण्डिका समाप्ता ॥ ० ॥

चतुर्थप्रपाठके दशमी खण्डिका।



क्रमप्राप्तानामर्हणमन्त्राणां विनियोगमिदानीं वक्तुमारभते,—

उत्तरतो गां बद्धोपतिष्ठेरन्नर्हणा पुत्रवाससेति ॥ १ ॥

उत्तरतः उत्तरस्यां दिशि। कस्य ? अर्हणप्रदेशस्य। कथं ज्ञायते ? 'यत्रैनमर्हयिष्यन्तः स्युः'—इति सूत्रयिष्यमाणत्वात्। गां स्त्रीगवीं बद्धा। स्त्रीगवीमिति कुतो वर्ण्यते ? लिङ्गादित्याह। धेनुः,—इति पयस्वती—इति चैवमादिमन्त्रलिङ्गं खल्वेवमनुगृह्यते। न च पुंगव-परिग्रहे कारणं पश्यामः। तस्माद् यथोक्त एवार्थः। तदेवं गां बध्वा तामेवाभिमुखाः सन्तः, अर्हणा पुत्रवाससा,—इति मन्त्रेणो-पतिष्ठेरन् आराधयेयुः। उपस्थितत्वान्मन्त्रलिङ्गाच्च तामेवोपति-ष्ठेरन् न पुनरर्हणीयमिति बोद्धव्यम्। के उपतिष्ठेरन् ? ये अर्हयिष्यन्तः स्युः। कथं ज्ञायते ? उपस्थितत्वात्। बहुवचन-निर्देशाच्च। "यत्रैनमर्हयिष्यन्तः स्युः"—इति ह्यर्हयितार एव बहुवचनेन निर्देक्ष्यते। यदि पुनरर्हणीय एवोपतिष्ठेत,—तदैक-वचनं कुर्यात्। 'यत्रैनम्'—इत्यर्हणीयस्यैकवचनेन निर्देशात्।

आह। अर्हयितुरेकत्वात् अस्यामपि वर्णनायां नैव बहुवचन-स्यार्थवत्तां पश्यामः। एवन्तर्हि बहुवचनं कर्त्तुरनियमार्थं भवि-ष्यति। कथं नाम ? ये केचिद्दृष्ट्वा उपतिष्ठेरन्, न पुनरर्हयिते-

वेत्यस्ति नियमः,—इत्यभिप्रायः। अथवा। बहुवचनं कुर्व्वन्ना-चार्य्यः सर्व्वैरेव गृह्यैरर्हणीयार्हणार्थमप्रमत्तैर्भवितव्यमित्युपदिशति। तथाच वाजसनेयके प्रवचने। "यत्र वा अर्ह्य आगच्छति, सर्व्वं गृह्या इव वै तत्र वेष्टन्ति, तथा ह्यपचितो भवति"—इति। क्व उपतिष्ठेरन्? अर्हणप्रदेशे, तत्सन्निधौ वा। कुतः? अर्हणोपदेशसामर्थ्यात्। उत्तरत इत्यनेन तस्यैवोपस्थितेश्च॥ ॥ ० ॥ १ ॥ ० ॥

एवमर्हयित्रृषूपतिष्ठमानेषु खल्वयमर्हणीयः,—

इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामीति प्रतितिष्ठमानो जपेत् ॥ २ ॥

प्रतितिष्ठमानः ऊर्द्धस्तिष्ठन्, इदमहमिति मन्त्रं जपेत्। अर्थात् जपानन्तरमासने उपविशेत्। कथं ज्ञायते? 'इदम्' आसनम्, अधितिष्ठामि,—इति मन्त्रलिङ्गात्। समस्तमन्त्राम्नानं किमर्थम्? निराकाङ्क्षत्वार्थमहममुक इति नामादेशो नास्तीति प्रज्ञापनार्थम्। समाम्नायप्रज्ञापनार्थञ्च ॥ ० ॥ २ ॥ ० ॥

कुत्र प्रतितिष्ठमानो जपेत्?

यत्रैनमर्हयिष्यन्तः स्युः ॥ ३ ॥

यत्र यस्मिन् प्रदेशे, एनमर्हणीयमर्हयिष्यन्तः—अर्हयितुमिच्छन्तः स्युः भवेयुः गृह्याः। बहुवचनं व्याख्यातम्। तत्र प्रदेशे प्रतितिष्ठमानो जपेत् ॥ ० ॥ ३ ॥ ० ॥

यदा वाऽर्हयेयुः ॥ ४ ॥

यदा यस्मिन् काले, अर्हयेयुरर्हणं कर्त्तुमारभेरन्। बहुवचनं पूर्व्ववत्। तदा वा प्रतितिष्ठमनो जपेत्,—इति गतेन सम्बन्धः। न तु अर्हणकर्त्तृषु कार्य्यान्तरव्यासक्तेषु प्रत्युपस्थानमसमनन्तरमेवेति। एवं वा—

वै।शब्दः तुशब्दार्थः। यदा पुनरेनमर्हयेयुस्तदा विष्टरादीनि वेदयेरन्,—इत्यनागतेनाभिसंबन्धो वर्णनीयः ॥ ० ॥ ४ ॥ ० ॥

अथेदानीमर्हणविधिविवक्षयेदमाह,—

विष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन् ॥ ५ ॥

विष्टरः,—

"ब्रह्मविष्टरयोश्चापि सन्देहे समुपस्थिते।
ऊर्द्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।
कतिभिस्तु भवेद्ब्रह्मा? कतिभिर्विष्टरः स्मृतः।
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः"।

इति आचार्य्यपुत्रेण गृह्यासंग्रहे व्याख्यातः। कात्यायनेन तु कर्म्मप्रदीपे,—

"यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि"।

इति विष्टरे दर्भसंख्या निषिद्धा। तदनयोर्विकल्पः,—पञ्चाशदर्द्धं वा

कुशैर्विष्टरः स्यात्, असंख्यातैर्वा,—इति। कथं ज्ञायते ? द्वयो-रेवास्मदाचार्याभ्यामनुशिष्टत्वात् अनन्यगतेर्वचनात्। सम्भवे पञ्चा-शद्दर्भैरसम्भवे पुनरपरिमितैरपि कुशैर्विष्टरो भवति,—इति नारा-यणोपाध्यायाः। रघुनन्दनस्तु दर्भसंख्यावचनमाचार्यपुत्रस्येत्येतद-जानानः कात्यायनवचनविरोधात् तद्वचनं शाख्यन्तरीयमितिवर्ण-याञ्चकार। अन्यदपि दर्भवटुप्रसङ्गात् पूर्व्वमेव व्याख्यातम्।

स खल्वयं विष्टरः एको वा स्यात् द्वौ वा,—इत्यनियमः। कथं ज्ञायते ? 'द्वौ चेत्'—इति वक्ष्यमाणसूत्रपर्य्यालोचनात्।

पाद्यम्-पादप्रक्षालनार्थमुदकम्। तथाच लाट्यायनसूत्रम्। "तस्मै-तदाहरन्ति,—विष्टरं पादप्रक्षालनम् अर्घ्यम् आचमनीयं मधुपर्क-मिति"—इति। द्राह्यायणसूत्रम्। "अर्हयिष्यन्त आहरन्ति,—विष्टरो पाद्यमर्घ्यम्"—इत्यादि। "विष्टरः पाद्यमर्घ्यमाचमनीयं मधु-पर्कों गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते"—इति च गृह्यान्तरम्।

"पादार्थमुदकं पाद्यं केवलं जलमेव तत्।
तत्तैजसेन पात्रेण शङ्खेनापि निवेदयेत्"।

इति च स्मर्य्यते पुराणेषु। तस्मात्,—'पाद्यम्'—इत्येवमेव प्रयोगो-भट्टनारायणाद्यनुमत आदरणीयः। यत्तु भवदेवभट्टेन 'पाद्याः',—इति लिखितम्, यदपि सरलायाम्—'पाद्याः',—इति प्रयोगमभि-धाय, पाद्याः—इति अप्संबन्धात् क्लीवबहुवचनम्,—इति वर्णि-तम्। तदसङ्गतम्। कुतः ? अस्माच्छास्त्रे पाद्यमिति निर्देशात्। न खलु वीक्षणविधौ मन्त्रे च 'अपः'—इति दर्शनादत्रापि तथा कल्पनायां किञ्चित् प्रमाणमस्ति। तस्माद्यथोक्त एव प्रयोगः।

अर्घ्यम्—

"दध्यक्षतसुमनस आपश्चेति चतुष्टयम् ।
अर्घ्य एष प्रदातव्यो गृह्ये ये अर्घ्यार्हाः स्मृताः ।
दध्यक्षतसुमनसो घृतं सिद्धार्थका यवाः ।
पानीयञ्चैव दर्भाश्च अष्टाङ्गो ह्यर्घ्य उच्यते" ।

इति गृह्यासंग्रहोक्तलक्षणम् । 'स खल्वयमर्घ्यः कांस्यपात्रेणार्ह-णीयस्याञ्जलौ निनेतव्यः । कस्मात् ?

"कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ" ।

इति वचनात् । आचमनीयम्—आचमनार्थमुदकम् । मधुपर्कः,—

"सर्पिषा मधुना दध्ना अर्चयेदर्हयन् सदा ।
ऋषिप्रोक्तेन विधिना मधुपर्केण याज्ञिकः ।
कंसे वितयमासिच्य कंसेन परिसंवृतम् ।
परिश्रितेषु देयः स्यान्मधुपर्क इति श्रुतम्" ।

इति ।

"दधनि पयसि वाऽथवा कृताश्च
मधु दद्यान्मधुपर्कमेतदाहुः ।
दधिमधुसलिलेषु सक्तवः
पृथगेते विहितास्त्रयस्तु मन्थाः" ।

इति च गृह्यासंग्रहोक्तलक्षणः । तदेवं छन्दोगानां स्वशाखापरि-भाषितचतुर्विधो मधुपर्को भवति ;—सर्पिर्मधुदधि, दधनि मधु, पयसि मधु, कृताने मधु च,—इति । तत्र प्रथमो द्वितीयश्च मधुपर्कः कंसस्थः कंसपरिवृतश्च भवति । शिष्टयोः पुनर्नैष नियमः । प्रथमे मधुपर्के तावत् "कंसे त्रितयमासिच्य"—

इत्यादिना तदभिधानात्। यथा खल्वभिक्रमणं प्रयाजमात्रस्यैवाङ्गं नानुयाजादीनाम्, तद्वदत्रापि स्यात्। द्वितीये मधुपर्के त्वाह कर्म्मप्रदीपे कात्यायनः।

"साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्।
अर्घ्यं दधिमधुभ्याञ्च मधुपर्को विधीयते।
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ।
कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत्"।

इति। तदत्र प्रथमश्लोकेनार्घ्यं मधुपर्कञ्च परिभाष्य द्वितीयश्लोकेन यथाक्रमं तयोरर्पणप्रकारमाह। सोऽयं मधुपर्कशब्दः प्रथमश्लोकोक्तमेव मधुपर्कं परामृशति। न त्वन्यम्। कथं ज्ञायते? "प्रकृतप्रत्ययश्च न्याय्यः"—इति शास्त्रतात्पर्य्यविदां सिद्धान्तात्। इतरथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्। न च तत्र प्रमाणं पश्यामः। रघुनन्दनस्तु छन्दोगोऽप्येतदजानानः,—

"साक्षतं सुमनोयुक्तं उदकं दधिमिश्रितम्।
अर्घ्यं, दधिमधुभ्याञ्च मधुपर्को विधीयते"।

इति वचनं लिखित्वा, 'दधिमधुमात्रेण मधुपर्काभिधानं घृतासम्भवपरम्'—इति परिकल्प्य, 'तत्सम्भवे गोभिलः'—इत्यभिधाय "मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन"—इति पारस्करगृह्यसूत्रम्,—"पिहितं कांस्यस्थम्"—इत्याकुलीकृत्य लिखित्वा, पूर्व्ववचने पात्रानुपदेशात् कांस्यपात्रं विनाऽपि मधुपर्को दीयते इति वर्णयाञ्चकार। पृथगमीषां मधुपर्काणामेकविशेषस्यान्यत्राप्रसक्तेः किमर्थमेतावान् प्रयासः,—इति न विद्मः। पूर्व्ववचने

पात्रानुपदेशादिति यदुक्तं, तदपि तत्परवचनानवलोकनेन। अपि च। मध्वसम्भवे घृतेन मधुपर्कं गृह्यान्तरकाराः स्मरन्ति, स तु मन्यते,—घृतासम्भवे दधिमधुमात्रेण मधुपर्कः,—इति किमत्र ब्रूमः। तथाच गृह्यान्तरम्। "दधनि मध्वानीय सर्पिर्वा मध्वलाभे"—इति। विस्तरतश्चैतत् गृह्यासंग्रहभाष्ये वक्ष्यामः। अग्निस्वामिनस्तु कल्पसूत्रवृत्तौ मधुना युक्तं दधि पयः कृतान्नं वा मधुपर्कः—इति द्वितीयादिप्रकारत्रयमेवोक्तवन्तः। 'मधुपर्को दधिमधुयुक्तम्'—इति ब्रुवाणो भट्टनारायणो द्वितीयं मधुपर्कमात्रमेवादर्शितवान्।

सूत्रशेषमिदानीं वर्णयामहे। तानेतान् विष्टरादीन् मधुपर्कान्तान् द्रव्यविशेषान् एकैकशः प्रत्येकं त्रिस्त्रिरुच्चार्य्य, वेदयेरन्—निवेदयेरन्,—इत्यनुपलादर्शयितुः कर्म्म प्रथमं सूचितम्। वेदयेरन् ज्ञापयेयुः—इति केचित्। निवेदनञ्च दक्षहस्तेनादाय कर्त्तव्यम्। कर्त्तुरङ्गस्योपदेशाभावे तस्यैव करस्य कर्म्मपारगत्वात्। तथा चोक्तम्।

"कर्म्मोपदिश्यते यत्र कर्त्तुरङ्गं न चोच्यते।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः"।

इति। तस्मात्,—विष्टरनिवेदने उत्तानहस्ताभ्याम्—इत्यसङ्गता कल्पना भवदेवभट्टस्य। सुखावबोधार्थं प्रयोगः प्रदर्श्यते। विष्टरो विष्टरो विष्टरः, पाद्यं पाद्यं पाद्यम्, अर्घ्यमर्घ्यमर्घ्यम्, आचमनीयमाचमनीयमाचमनीयम्, मधुपर्को मधुपर्को मधुपर्कः। प्रतिगृह्यताम्—इति सर्व्वत्र वाक्यशेषं समापयेत्। कुतः? तथा प्रसिद्धेः।

योग्यत्वाच्च। विष्टरद्वयपक्षे द्विवचनान्तेन प्रयोगः,-इति भट्टनारायणोपाध्यायाः। पृथङ् निवेदनम्,-इति भवदेवभट्टः ॥०॥ ५ ॥०॥

अथेदानीमर्हणीयकर्म्मविधिर्वक्तव्यः। स खल्वर्हयित्रा दत्तं विष्टरादिकं—विष्टरं प्रतिगृह्णामि,--इत्यादिना गृह्णीयात्। कथं ज्ञायते? योग्यत्वात्। प्रसिद्धेश्च। अर्घ्यमधुपर्कयोस्तु विशेषं वक्ष्यामः। स खल्वयमर्हणीयः विष्टरं गृहीत्वा,--

या ओषधीरित्युदञ्चं विष्टरमास्तीर्य्याध्युपविशेत् ॥ ॥ ६ ॥

या ओषधीः,--इत्यनया ऋचा उदञ्चमुत्तराग्रं विष्टरमास्तीर्य्य, विष्टरम् अधि लक्ष्मीकृत्य आसनस्योपरि उपविशेत्। क्व आस्तीर्य्य? आसने। कथं ज्ञायते? "तामस्मिन्नासने"--इति मन्त्रलिङ्गात्। स खल्वयं मन्त्रः विष्टरस्यासनास्तरणे विनियुक्तः। कुतः? उपवेशनस्य पूर्व्वमेव सिद्धत्वात्, इति व्याख्यातारः ॥०॥ ६ ॥०॥

द्वौ चेत् पृथगृग्भ्याम् ॥ ७ ॥

चेत् यदि, द्वौ विष्टरौ अर्हयित्रा दत्तौ स्याताम्, तदा पृथक्--नाना, ऋग्भ्याम्—या ओषधीरित्येताभ्यामित्यर्थः। आस्तीर्य्याध्युपविशेत्,—इत्यनुवर्त्तते। ऋग्द्वयं मन्त्रब्राह्मणादवगन्तव्यम्। अत्र, पृथक्—इति करणात् निवेदनं युगपदवगम्यते। चेत्,—इति करणाच्च नातीव द्वयोरावश्यकत्वम्,—इति ॥ ० ॥ ७ ॥ ० ॥

किं द्वितीयमपि विष्टरमविशेषेणासन एवास्तीर्य्य उपर्य्युपविशेत् ? न । किन्तर्हि ?—

पादयोरन्यम् ॥ ८ ॥

अन्यमपरम्—द्वितीयं विष्टरम्, या ओषधीरितिमन्त्रेण पादयोरधस्तादास्तीर्य्याध्युपविशेदित्यर्थः । पादयोरध आस्तीर्य्य उपरि पादौ तूष्णीं कुर्य्यात्,—इति भट्टभाष्यसङ्कले ॥ ० ॥ ८ ॥ ० ॥

यतोदेवीरित्यपः प्रचेत ॥ ६ ॥

यतो देवीः,—इत्यनेन मन्त्रेण, अपः,—पादप्रक्षालनार्थमुदकम्-पाद्यमित्येतत् । प्रेचेत अर्हणीयः ॥ ० ॥ ८ ॥ ० ॥

तेनोदकेन खल्वयमर्हणीयः,—

सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेत्, दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेत् ॥ १० ॥

सव्यं पादम्,—इति मन्त्रेण सव्यं वामं, पादं प्रक्षालयेत् । अनेनैव सूत्रशेषो व्याख्यातः । प्रक्षालयेत्,—इति क्रियाभ्यासः ; निर्देशक्रमेण पादयोः प्रक्षालनार्थः । अन्यथा उदकसंख्यानुरोधात् दक्षिणं प्रक्षाल्य ततः सव्यस्य प्रक्षालनं स्यात् । तच्चानिष्टम् । पठन्ति च ।

"पादं प्रक्षालयेद्विप्रो दक्षिणं प्रथमं सदा।
शूद्रस्तु वामं प्रथमं सामवेदी तथा वधूः"।

इति।

"सामगः क्षालयेत् सव्यपादावन्यस्तु दक्षिणम्"।

इति चैवमादि ॥ ० ॥ १० ॥ ० ॥

पूर्व्वमन्यमपरमन्यमित्युभौ शेषेण ॥ ११ ॥

पूर्व्वमन्यमिति मन्त्रेण उभौ पादौ शेषेणावशिष्टेनोदकेन प्रक्षालयेत्—अर्हणीयः। सन्निकर्षातिशयाद्दक्षिणस्यैव पादस्य प्रक्षालनं स्यात्,—इति तन्निरासार्थम्—उभौ,—इत्याह। आह। पूर्व्वमन्यमित्युभौ शेषेण,—इति वक्तव्ये, पूर्व्वमन्यमपरमन्यमित्युभौ शेषेण,—इति गुरुकरणं किमर्थम्? क्रमविशेषार्थम्,—इति ब्रूमः। कथं नाम? एकैकपादप्रक्षालने यस्य पूर्व्वं प्रक्षालनं यस्य च पश्चात्, उभयपादप्रक्षालनपक्षेऽपि तस्यैव पूर्व्वं तस्यैव च पश्चात् प्रक्षालनम्—इति। तदेतत् क्रमविशेषसूचनार्थं पूर्व्वापरत्वानुकीर्त्तनमिति बोद्धव्यम्। मन्त्रे च पूर्व्वशब्दोऽग्रिमवाची अपरशब्दः पश्चाद्वचनः। तथाच अग्रिमप्रक्षालितमन्यं सव्यं पश्चात् प्रक्षालितमन्यं दक्षिणश्चोभौ पादाववनेनिजे पूर्व्वेणैव क्रमेण प्रक्षालयामि,—इति मन्त्रलिङ्गादपि स एव क्रमोऽवगम्यते। अतएव उदक्संस्थतानुरोधादिह प्रथमं दक्षिणं प्रक्षाल्य ततः सव्यं प्रक्षालयेदित्ययमपि पक्षो मन्त्रलिङ्गविरोधादेवोपेक्षणीयः। मन्त्रलिङ्गसूचनार्थमेव 'पूर्व्वमन्यमपरमन्यम्'—इति मन्त्रप्रतीकस्योपादानम् ॥ ० ॥ ११ ॥ ० ॥

अन्नस्य राष्ट्रिरसीत्यर्घ्यं प्रतिगृह्णीयात् ॥ १२ ॥

अन्नस्य राष्ट्रिरसि,—इत्यनेन मन्त्रेण अर्घ्यं यथोक्तलक्षणं प्रतिगृह्णीयात् अञ्जलौ गृह्णीयात् अर्हणीयः। अर्घ्यं प्रतिगृह्णामि,—इत्यर्घ्यं प्रतिगृह्णीयादित्यसङ्गतैषा कल्पना भवदेवभट्टस्य। 'प्रतिगृह्णीयात्' —इत्यस्य अञ्जलौ गृहीत्वा शिरसि दद्यात्,—इति रघुनन्दनव्याख्यानेऽपि प्रमाणं न पश्यामः।' मन्त्रानुपदेशात् व्याहृतिभिरेव शिरस्यर्घ्यं दद्यात्,'—इति तु स्यात्'॥ ०॥ १२ ॥ ० ॥

यशोऽसीत्याचमनीयमाचामेत् ॥ १३ ॥

यशोसि,—इति मन्त्रेणाचमनीयमाचमनार्थमुदकम्, आचामेत् सम्यक् भक्षयेत्,—अर्हणीयः। आचामेत्,—इति करणात्,— वारत्रयमुदकं भक्षयेत्, अथ यथोक्तेन विधिना इन्द्रियाण्युपस्पृशेत्, —इत्यवगच्छामः। 'तत्र सकृन्मन्त्रेण भक्षयित्वा द्विस्तूष्णीं भक्षयेत्'—इति भट्टभाष्यम् ॥ ० ॥ १३ ॥ ० ॥

यशसो यशोसीति मधुपर्कं प्रतिगृह्णीयात् ॥ १४ ॥

यशसो यशोसि,—इत्यनेन मन्त्रेण मधुपर्कमर्हणीयः प्रतिगृह्णीयात्। अपरे पुनरेतदविद्वांसो भाषन्ते,-मधुपर्कं प्रतिगृह्णामीति मधुपर्कं प्रतिगृह्णीयात्,—इति ॥ ० ॥ १४ ॥ ० ॥

तस्य लक्षणञ्च मधुपर्कस्य,—

यशसो भक्षोसि महसो भक्षोसि श्रीर्भक्षोसि श्रियं मयि धेहीति त्रिः पिबेत् ॥ १५ ॥

यशसो भक्षोसि,—इत्येवमादिना मन्त्रेण, त्रिः—वारत्रयं पिबे-दर्हणीयः। आह। समस्तमन्त्राम्नानं किमर्थम्? उच्यते। मन्त्रे भक्षशब्दस्य त्रिः पाठात् त्रिः पानविधानाच्च भक्षशब्दान्तैरेव मन्त्रा-वयवैः पानं स्यात्,—इत्यपि कदाचिदाशङ्का स्यात् कस्यचिन्मन्द-मतेः। अतस्तन्निरासार्थं मन्त्रान्तेन पानप्रतिपादनार्थम्, समा-म्नायप्रज्ञापनार्थञ्च, समस्तमन्त्राम्नानम्। तस्मात्, कौथुमादीनां मन्त्रान्तेनैव पानम्। येषान्तु 'श्रियो भक्षोसि'—इति मन्त्रपाठः, तेषां मन्त्रावयवैरेव पानं स्यात्। तथा च छन्दोगगृह्यान्तरम्। "मधुपर्कं त्रिः पिबेद् यशसो महसः श्रिय इति, तूष्णीं चतुर्थम्" इति। तदत्र, मन्त्रप्रतीकोपादानात् प्रतीकैरेव पानमवगम्यते। 'श्रीर्भक्षोसि'—इति खल्वस्मच्छाखायां मन्त्रपाठः।

इदमिदानीमत्र सन्दिह्यते। किं प्रतिपानं मन्त्रावृत्तिः, उत सकृन्मन्त्रेण पानत्रयम्?—इति। सकृन्मन्त्रप्रयोगः,—इति केचित्। कुतः? "एकद्रव्ये कर्म्मावृत्तौ सकृन्मन्त्रवाचनं कृत्वा,"—इति वच-नात्। तदसङ्गतम्। कस्मात्? द्रव्यभेदात्। द्रव्यभेदः खल्वत्र भवति। न हि यदेवादितः पिबति, परस्तादपि तदेव पिबति,—इत्यप्रमत्तः शक्नोति वदितुम्। तस्मादस्त्यत्र द्रव्यभेदः। उत्तरत्र तूष्णीमिति करणाच्चात्र प्रतिपानं मन्त्रावृत्तिमवगच्छामः। आह। मध्ये तर्हि आचमनं प्राप्नोति? अन्यथोच्छिष्टः कथं द्वितीयं तृतीयञ्च पानं करिष्यति, मन्त्रं वा पठिष्यति। उच्यते। उत्तरत्र

आचान्तोदकाय,—इति करणादिहोच्छिष्टतैव न भवतीत्यवगच्छामः। तस्मात्, प्राणाग्निहोत्रवत् सोमभक्षणवच्च अकृताचमनस्यैव मन्त्रपाठः स्यात्। तथाच गृह्यासंग्रहः।

> "मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च।
> अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः।
> प्राणाहुतिषु सोमेषु मधुपर्के तथैवच।
> आस्यहोमेषु सर्व्वेषु नोच्छिष्टो भवति द्विजः"।

इति। इदमपरं चिन्त्यते। मधुपर्कस्य पिबति-चोदना तावदुपलभ्यते, मन्त्रे च भक्षशब्दश्रुतिः। तत्र, किं पात्रेण पातव्यम्? आहोस्वित् हस्तेन भक्षयितव्यम्?—इति। तत्र केचिदाहुः। मन्त्रलिङ्गात् प्रसिद्धेश्च हस्तेन भक्षयितव्यम्। पिबति चोदना तु भोजनधर्म्मस्य पूर्व्वापरद्विराचमनादेर्निवृत्त्यर्थतयाऽप्युपपद्यते,—इति। अपरे ब्रुवन्ति। 'मन्त्राणामविधायकत्वात् प्रसिद्धेश्चानैकान्तिकत्वात् विधिवचनीयस्त्वाच्च पात्रेण पातव्यम्, इति। अन्ये तु मन्यन्ते। मधुसंयोगात् द्रवदेव्मधुपर्कः स्यात्, तदा पात्रेण पातव्यम्। अथ दध्नः काठिन्यात् पानानुपपत्तिः, सर्पिषस्तु कृतान्नस्य, तदा हस्तेन भक्षयितव्यम्—इति। तदत्र भगवन्तो भूमिदेवाः प्रमाणम् ॥ ० ॥ १५ ॥ ० ॥

तृष्णीं चतुर्थम् ॥ १६ ॥

मधुपर्कस्य पिबेत् ॥ ० ॥ १६ ॥ ० ॥

भूय एवाभिपाय शेषं ब्राह्मणाय दद्यात् ॥ १७ ॥

भूयः--पुनरपि, एवकारकरणात्,--तूष्णीमेव, अभिपाय आभिमुख्येन पीत्वा, शेषमवशिष्टं ब्राह्मणाय दद्यात्। तच्च पुत्राय शिष्याय वा, न पुनरविशेषेण यस्मै कस्मैचित्। कथं ज्ञायते? "उच्छिष्टं कस्यचिन्न पातव्यं नापि दातव्यम्"--इति शास्त्रान्तरे अन्यस्मै उच्छिष्टदानस्य अन्योच्छिष्टभक्षणस्य च निषेधनात्। गुर्व्वाद्युच्छिष्टभोजनन्तु प्रसिद्धमेव। तथा स्मृत्यन्तरम्। "नोच्छिष्टं कस्यचिद्दद्यादन्यत्र जायापुत्रशिष्येभ्यः"--इति। वशिष्ठोऽप्याह। "उच्छिष्टमगुरोरभोज्यम्"--इति। तदभावे पुनरब्राह्मणायापि दद्यात्, तच्च अद्भिःसंप्रोच्य,--इति विशेषः। तथाच द्राह्यायणसूत्रम्। "तदभावेऽद्भिः सम्प्रोच्याब्राह्मणाय"--इति। लाट्यायनोऽप्येवमेव सूत्रयाञ्चकार॥ ० ॥ १७ ॥ ० ॥

आचान्तोदकाय गौरिति नापितस्त्रिर्ब्रूयात् ॥ १८ ॥

आचान्तोदकाय अर्हणीयाय। तादर्थ्ये चतुर्थी, क्रियाग्रहणात् वा। आचान्तोदकमर्हणीयमुद्दिश्य,--इति वा वर्णनीयम्। नापितो-गौरिति त्रिर्वारत्रयं ब्रूयात्। आचान्तोदकाय,--इति कुर्व्वन् उच्चैस्त्वं द्योतयति। कथं नाम? यथा खल्वर्हणीयः शृणोति, तथोच्चैर्ब्रूयात्,--इति। एवं खल्वाचान्तोदकार्थता कथनस्य सम्पद्यते। अन्ये तु वर्णयन्ति। 'आचान्तोदकाय,--इति सप्तम्यर्थे चतुर्थी। तेन, अर्हणीये आचान्तोदके सतीत्यर्थः'

—इति। मधुपर्कभक्षणे उच्छिष्टता न प्राप्नोति,—इति खल्वाचार्य्य आचान्तोदकाय,—इत्याह। तेन, इतः पूर्व्वं नास्त्येवाचमनम् ॥ ० ॥ १८ ॥ ० ॥

नापितेन त्रिर्गौरित्युक्ते स्वयमर्हणीयः, तमेव नापितम्,—

मुञ्च गां वरुणपाशाद् द्विषन्तं मेऽभिधेहीति तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकमिति ब्रूयात् ॥ १९ ॥

मुञ्च गामिति मन्त्रं ब्रूयात्। आह। समस्तमन्त्राम्नानं किमर्थम्? समाम्नायप्रज्ञापनार्थम्। एवमेव मन्त्रस्य पाठार्थश्च। तेन, मे,—इत्यादौ निराकाङ्क्षत्वार्थं न नामप्रयोगः। तेन, अमुष्य,—इत्यप्यनूह एव स्यात्,—इति केचित्। ते खलु, 'मेऽभिधेहीति'—इत्यत्र, इति-कारं किमिति न लिखितवन्तः,—इति प्रष्टव्याः। तस्मात्, 'अमुष्य'-पदस्थाने तावदर्हयितुर्नामादेशः कर्त्तव्यः। कुतः? अदःपदस्थाने नामादेशस्य प्रसिद्धत्वात्। "समस्तमन्त्राम्नानं 'जहि' 'अमुष्य'—इति पदयोरन्तरा शब्दान्तराध्याहारशङ्कानिवृत्त्यर्थम्। अन्यथा, मम विष्णुदत्तस्य च,—इत्येवं प्रयोगः स्यात्। तच्चायुक्तम्। मेऽभिधेहीति मे—शब्देन तदर्थसिद्धेः"—इति केचित्। तेषामपि तदुक्तयैव युक्त्या अध्याहारशङ्काया अप्रसक्तेः समस्तमन्त्राम्नानं किमर्थमिति न विद्मः। मेऽभिधेहीति,—इत्यत्र इतिकरणं किमर्थम्? परस्तान्मन्त्रपदस्य रूपान्तरत्वप्रज्ञापनार्थम्। प्रागितिशब्दप्रक्षेपात् यथापठितानामेव मन्त्रपदानां प्रयो-

गार्थञ्च। तेन; 'अमुष्य'-परस्थाने नामादेशः स्यात्। तर्हि 'तम्' --इत्यत्रापि स्यात्? नैष दोषः। इतिकरणात् प्राक्तनेन 'हिष-त्तम्'--इति पदेन तस्य सम्बन्धात्।

तस्मादियमेवावधारणा;--'समस्तमन्त्राम्नानं समाम्नायप्रज्ञा-पनार्थम्। मध्ये इतिकारकरणं ततः प्राक्तनस्य मन्त्रभागस्य यथा-श्रुतपाठार्थम्, पराचीनस्य 'अमुष्य' पदस्य स्थाने नामादेशसूच-नार्थञ्च। अन्यस्य पराचीनत्वेऽपि न नामादेशः, प्रमाणाभावात्। नाप्यध्याहारः, समस्तमन्त्राम्नानात्'--इति। तथा च छन्दोग-गृह्यान्तरम्। "सञ्चोदितामनुमन्त्रयेत मुञ्च गामित्यमुष्य चेत्य-र्हयितुर्नाम ब्रूयात्"--इति। भट्टभाष्येऽप्युक्तम्,--"मेऽभिधेहीत्य-त्रेतिशब्दप्रक्षेपात् 'मेऽभिधेहि'-इत्येव प्रयोगः। न तु निराकाङ्क्षी-करणाय मे वक्तुरिति। अमुष्यपदस्थाने अर्हयितुर्नामादेशः"--इति।

अत्र च, पठ्यमानमन्त्रकाण्डे 'इति' पदं न पठ्यते, केवल-माचार्य्येणैव उक्तमर्थं प्रतिपिपादयिषुणा प्रक्षिप्तं तदिति बोद्धव्यम्। भट्टनारायणोऽपि प्रक्षिप्तत्वमितिकारस्य स्पष्टमाचष्टे। व्याख्या-तारोऽपि पूर्व्वाचार्य्या एवमेव प्रतिपन्नाः। भवदेवभट्टोऽपि मन्त्रे इतिकारं न लिलेख। यच्च,-उक्तभट्टभाष्यप्रतीकं लिखित्वा, रघु-नन्दनेनोक्तम्,--"मेऽभिधेहीत्यत्र भवदेवभट्टेन यत् इतिपदं न लिखितम्, तद् हेयम्, भट्टभाष्यविरोधात्, प्रमाणाभावाच्च",-- इति। तदेव हेयम्। कस्मात्? भट्टभाष्यविरोधाभावात्। तत्र खल्वितिशब्दस्य प्रक्षेपत्वकथनादप्युक्तमितिशब्दस्य मन्त्रानङ्गत्वमुक्तम्। प्रमाणञ्चात्र मन्त्रसमाम्नायोऽध्येतृसम्प्रदायश्च। तस्मात्,--भट्ट-

भाष्यपङ्क्तेस्तात्पर्य्यापर्य्यालोचनात् समाम्नायानवलोकनप्रमादाच्च अप्रमाणं प्रमाणविरुद्धञ्च वर्णितमित्यनादरणीयम्॥ ० ॥ १९ ॥ ० ॥

ततो नापितेन मुञ्चा तामेव गामवलोकयन्नर्हणीयः,—

माता रुद्राणामित्यनुमन्त्रयेत् ॥ २० ॥

ऋज्वर्थं सूत्रम्॥ ० ॥ २० ॥ ० ॥

किं सर्व्वत्रैवार्हणकर्म्मणि नापितेन गौरित्युक्ते मुञ्च गामित्युक्त्वा माता रुद्राणामित्यनेन तामनुमन्त्रयेदर्हणीयः? एवं खलु प्राप्तम्। एवं प्राप्ते इदमारभ्यते,—

अन्यत्र यज्ञात्॥ २१ ॥

यज्ञोऽग्निष्टोमादिः। तस्मादन्यत्रैवं कुर्य्यात्॥ ० ॥ २१ ॥ ० ॥

यज्ञे तर्हि किं कुर्य्यात्? उच्यते,—

कुरुतेत्यधियज्ञम् ॥ २२ ॥

यज्ञमधिकृत्य,—इत्यधियज्ञम्। यज्ञमधिकृत्य यदर्हणं क्रियते, तत्र नापितेन गौरित्युक्ते स्वस्त्ययमर्हणीयः 'कुरुत'—इति ब्रूयात्। कुरुत आलभध्वमित्यग्निस्वामिप्रभृतयः। "कुरुतेति गवि प्रोक्तायां ब्रूयात्"—इति च लाट्यायनसूत्रम् ॥ ० ॥ २२ ॥ ०॥

कति पुनरर्हणीया भवन्ति? उच्यते,—

षड़र्घ्यार्हा भवन्ति ॥ २३ ॥

अर्घ्यमर्हणम् । तदर्हन्तीत्यर्घ्यार्हाः । ते खल्विमे षट्सङ्ख्याका भवन्ति ॥ ० ॥ २३ ॥ ० ॥

त इमे षड़र्हणीया नामतो निर्दिश्यन्ते,—

आचार्य्य ऋत्विक् स्नातको राजा विवाह्यः प्रियोऽतिथिरिति ॥ २४ ॥

आचार्य्यः,—

"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते" ।

इत्युक्तलक्षणः । ऋत्विक्,—

"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते" ।

इत्युक्तलक्षणः । स्नातकास्त्रयो व्याख्याताः । राजा अभिषेकादिगुणयुक्तो नरेश्वरः । विवाह्यो विवाहयितव्यो जामाता,—इत्येतत् । प्रियः,—विद्यातपःप्रभृतिर्गुणैः प्रीतिविषयोऽतिथिर्यथोक्तलक्षणः । इत्येते षड़र्घ्यार्हा नामतो निर्दिष्टाः । प्रियः—इति विशेषणात् विद्यादिगुणवानेवातिथिरर्घ्यार्हो भवति, न यः कश्चित्,—इति दर्शयति ॥ ० ॥ २४ ॥ ० ॥

किमेतानाचार्य्यादीन् सकृदेवार्हयेत् ? न । किन्तर्हि ?,—

परिसंवत्सरानर्हयेयुः ॥ २५ ॥

परिगतः संवत्सरो येषां, तान् परिसंवत्सरान् आचार्य्यादीन् अर्हयेयुः । 'पुनर्',—इति पराचीनमिहाप्यन्वीयते । मध्यगणिन्यायात् । तेन, एकस्मादर्हणकालादारभ्य संवत्सरादूर्द्धमागतानेतानाचार्य्यादीन् पुनरर्हयेयुरित्यर्थः ॥ ० ॥ २५ ॥ ० ॥

पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च ॥ २६ ॥

यज्ञविवाहौ व्याख्यातौ । तयोर्निमित्तभूतयोः संवत्सरमध्येऽप्यागतानाचार्य्यादीन् पुनरर्हयेयुः । अपरं आह । 'यज्ञविवाहयोर्निमित्तयोरर्व्वागपि संवत्सरादृत्विगाचार्य्यौ प्राप्तौ पुनरर्हयेयुः',—इति । चः समुच्चये परिसंवत्सरकालमेव समुच्चिनोति । पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च,—इति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ ० ॥ २६ ॥ ० ॥

अत्रैव शिवम् ।

शाण्डिल्यस्य महामुनेरकलुषे वंशे प्रसंशोत्तरे
क्षीराब्धाविव कलङ्कमक्षुलवपुः कान्तः कलानां निधिः ।
वाक्पीयूषकरैर्हरन्नितरां चेतांसि सर्वेषामपि
चात्मोऽभूत् परमात्मबोधनिपुणोभोगेष्वनासक्तधीः ॥
राधाकान्तो निरवधि मतः सर्व्वथा सज्जनानां
मेधोत्कर्षप्रथितमहिमा धीमतामग्रगण्यः ।
शास्त्रालापव्यसनरसिकः सन्निवृत्तोऽन्यदोषात्
साक्षात् दोषाकर इव सतामाकरोऽभूद्गुणानाम् ॥

सिद्धान्तवागीश इति प्रसिद्धो-
यः सर्व्वसिद्धान्तगणेष्वभिज्ञः ।
काले मितं वाक्यमुदर्कपथ्यं
यस्योपदेष्टाऽऽगमवज्जनानाम् ॥

कृपापारावारः स खलु शरणं रूढ़विपदां
परानिष्टद्वेष्टा परमभिनिविष्टः श्रुतिविधौ ।
स्फुरद्भक्तिश्रद्धाविमलमतिरुच्चैर्गिरिसुता-
पदाम्भोजद्वन्द्वप्रचुरमकरन्दे मधुकरः ॥

योऽध्यापयामास परःसहस्रा-
ननन्यकाम्यानपि शिष्यसङ्घान् ।
यस्यान्तकाले विससर्ज्ज देहं
सुरापगातीररसान्तरस्थः ॥

अद्वैतवादनिरतो नवावतार इव भक्तियोगस्य ।
अपरिमितो यत्प्रेमा रोमाञ्चमिषादलक्षि वाह्येऽपि ॥

केनापि कस्मिन्नपि वा कथञ्चित्
प्रवर्त्तिते विश्वपतेः प्रसङ्गे ।
वाष्पप्रपूरः परितः प्रसर्पन्
वपुर्विभोः प्लावयतेस्म यस्य ॥

श्रीचन्द्रकान्तनामा ब्रह्मविदः कौथुमो धरादेवः ।
तस्मान्महानुभावात्सर्कालङ्कारलाञ्छनो जातः ॥

सोऽयं ब्रह्ममयीसुतो मतिमतामाराधनेषूत्सुकः
पित्रैवामरगुर्व्व-नूनमतिना भूयो विनीतोऽस्त्वयत् ।

तस्येश्वरचरणारविन्दकृपयाऽन्येषां गुरूणां तथा
किञ्चिद्बोधलवोदयातिचपलः शार्दूलविक्रीडितम् ॥

कामरूपप्रजापुञ्जावन्तरा कैकयेषु यः ।
पुण्ये खेरपुरे रम्ये करोति वसतिं द्विजः ॥

श्रीमद्विजयिनी देवी साम्प्रतं भारतेश्वरी ।
यद्वङ्गसाम्राज्यगतं तद्रक्षार्थाधिकृता यया ॥

मन्वादीनां सम्यक् तथा वचांसि च निबन्धकर्तॄणाम् ।
बुद्ध्या विचार्य्य भूयो मीमांसाद्वितयमप्यथालोच्य ॥

गौतमकणादतन्त्रमवलोक्य कपिलमुनिरचिततन्त्रमपि ।
अपि च पतञ्जलितन्त्रं सामानि विशेषतः समालोच्य ॥

लाट्यायनीयकल्पं द्राह्यायणरचितमाश्वलायनकृतम् ।
गृह्यान्तरकर्तॄणां परिशिष्टकृताश्च विचार्य्य वचः ॥

रचयाञ्चकार भाष्यं कठिनच्छन्दोगगृह्यसूत्रेषु ।
श्रीचन्द्रकान्त एतत्सरलाल्पमतिर्यथाबुद्धि ॥

वेदाङ्कशैलचन्द्रे शकनरपतिहायने समाप्तैषा ।
आश्विनमङ्गलवारे रसेन्दुदिवसे कृतिस्तस्य ॥

स्खलितं यदत्र दैवात्तदखिलमखिलेश्वरः शमं नयतु ।
प्रीणातु परपिताऽसौ बालकपरिचापलादस्मात् ॥

मन्दोत्तममध्यानामुपासकानामनुग्रहार्थं यः ।
धत्ते विविधशरीरं स हरतु दुरितं ममेशानः ॥

यस्याज्ञाविवशाऽचलापि चलति भ्राम्यन्ति शून्ये ग्रहा-
वातो वाति, तपत्यथापि तपनो मृत्युस्तथा धावति ।

यः सर्व्वत्र गतोपि नैव सुमहानप्यन्तिके लक्ष्यते
सोऽयं श्रीपरमेश्वरः प्रकुरुतादन्तेऽपि मे मङ्गलम् ॥
पित्रोश्चरणसरोजं विकसतु हृदये ममानिशं वल्गु ।
तमसां विघटनदक्षाः स्फुरन्ति नखरेन्दवो यत्र ॥
सन्तः सन्ति जगत्सु ये परगुणं दोषोत्करैरावृतं
सम्लाघं परिशोध्य साधु बहुलीकुर्व्वन्ति निर्व्वासनाः ।
तेषां तद्व्रतमेव, तेषु विफला सत्यं कृपाप्रार्थना
तद्भक्तिप्लुतमानसास्तु शिरसा तेभ्यो नमस्कुर्म्महे ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य दशमी खण्डिका समाप्ता ॥ ० ॥

समाप्तश्चायं चतुर्थः प्रपाठकः ॥ ० ॥

समाप्तञ्चेदं गोभिलगृह्यसूत्रभाष्यम् ॥ ० ॥

शुभमस्तु ॥ श्रीरस्तु ॥

———